"पितुश्शतगुणं माता गौरवेणातिरिच्यते" ।

इति तु शि(शु)श्रूष(ा)मात्रेण(न) तु वचनकरणे, पितुरेव नियन्तृत्वात् । अत एव "माता भस्त्रा पितुः पुत्रौ(त्रो) यस्माज्जातस्स एव सः" । इति वचनेनाप्यविरोधः । तदिति.

No. 1899. रामायणव्याख्या—मणिमेखला.

RĀMĀYAṆAVYĀKHYĀ: MAṆIMĒKHALĀ.

Substance, palm-leaf. Size, $20\frac{5}{8} \times 1\frac{1}{2}$ inches. Pages, 145. Lines, 9 on a page. Character, Grantha. Condition, injured. Appearance, new.

Āraṇya-Kāṇḍa, complete.

The commentary is by Gōvindarāja.

[श्री]वाप्स्य(त्स्य) श्रीशठगो(को) पदेशिकवरश्रीपादरेण्वञ्जनैः
दृष्ट्वा निर्मलया निरीक्ष्य . . . . . . ।
श्रीमत्कौशिकवंशसागरमणिर्गोविन्दराजाह्वयो
व्याचक्ष्ये(क्षेऽ)हमरण्यकाण्डमधुना पश्यन्तु निर्मत्सराः ॥
श्रीरामायणराजस्य दत्वा पीताम्बरं महत् ।
अर्पये परया लक्ष्म्या राजन्तीं रत्नमेखलाम् ॥

एवं पूर्वस्मिन् काण्डे जगज्जन्मादिकारणस्य वेदान्तवेद्यस्य ब्रह्मणो निरस्तसमस्त(ा)विद्यात्वं, नित्यानन्दपरिपूर्णत्वं, निखिलान्तर्यामित्वं, निरतिशयौज्ज्वल्यं, निरुपमधर्मप्रवर्तकत्वमित्याद्यनन्तकल्याणगुणजातमुपवर्णितम् । संप्रति सज्जनसंरक्षणरूपं धर्मविशेषमभिधातुं तृतीयं काण्डमारभ्यते प्रविश्येत्यादि । यद्वा पूर्वकाण्डे पितृवचनपरिपालनरूपो महान् धर्मस्सर्वैरनुष्ठातव्य इति प्राधान्येन दर्शितम् । अथ सज्जनसंरक्षणरूपं धर्मविशेषं प्रतिपादयितुमारण्यकाण्डमारभ्यते प्रविश्येत्यादि । तुशब्दः पूर्वारण्याद्वैलक्षि(क्ष)ण्यं द्योतयति । महारण्यम् इतरदुरवगाहं दण्डकारण्यं दण्डकस्य राज्ञोऽरण्यं शुक्रशापादरण्यभूतं जनपदं प्रविश्य आत्मवान् धैर्यवान् दुरवगाहमहागहनप्रवेशेऽप्यजनितभयलेश इत्यर्थः.

End:

प्रतिकूलयन् वने पथिकजन[ल] प्रतिकूलभूत . . . मरुकान्तारमननं यस्यास्ताम् अनेकनानाविधपक्षिणः शुकशारिकाकोकिलप्रभृतयो यस्यान्तां कानन . . रापक्षिजालवत्वं तादृशीं पर.

Colophon:

इति श्रीरामायणभूषणे अरण्यकाण्डव्याख्याने मणिमेखलाख्यायां पञ्चसप्ततितमस्सर्गः ॥

इत्यौ (त्थं) कौशिक . . . .
खिलदेशिकोत्तमकृतव्याख्यानशैलीचितम् ।
व्याचख्यौ तदरण्यकाण्डमखिलं गोविन्दराजाभिधः ॥

अरण्यकाण्डस्समाप्तः ॥

No. 1900. रामायणदीपिका.
RĀMĀYAṆADĪPIKĀ.

Substance, palm-leaf. Size, $17\frac{3}{8} \times 1\frac{5}{8}$ inches. Pages, 324. Lines, 7 on a page. Character, Grantha. Condition, much injured. (The left hand corners of the leaves are much indented). Appearance, old.

A commentary on the Rāmāyaṇa attributed, according to a statement on the fly leaf, to Vaidyanāthadīksita: for Ayōdhyā-Kāṇḍa, Sargas 1 to 90.

Beginning:

मातुलकुलं मातुलगृहम्; कुलं गृहेऽपि—इत्यमरः। नित्यशत्रवः तान् हन्तीति नित्यशत्रुघ्नः। अनेन सद्गुणसंपत्तिः दर्शिता। राघ(वो) भरतो निसर्गप्रवृत्तया प्रीत्या स्नेहेन पुरस्कृतः। एतेन भरतादिनिर्बन्धतो गमनशङ्का वारिता। स भरतः विशेषेण भोजनादिरूपेण सत्कारेण सत्कृतः।

End:

क संप्रतीति प्रश्नस्योत्तरमाह जान इति। . . . कामितार्थप्रदानसमर्थाः प्रतीतरूपः प्रसिद्धयशाः रूप्यं यशस्याभिरूप्यमिति . . . . .

Colophon:

नवतितमस्सर्गः ॥

कृतबुद्धिमिति। कृतनिश्चयम्। आतिथ्येन हेतौ तृतीया . . . .

मधुमूलफलोपेतं चित्रकूटं व्रजेति ह।
वासमौपयिकं मन्ये तव राम महाबल ॥

No. **1901.** रामायणव्याख्या.
RĀMĀYAṆAVYĀKHYĀ.

Substance, palm-leaf. Size, 17 × $1\frac{3}{8}$ inches. Pages, 363. Lines, 11 on a page. Character, Telugu. Condition, injured. Appearance, old.

The first leaf is numbered 178 and the last 359.

Āraṇya-Kāṇḍa, complete.

A commentary on the Rāmāyaṇa by Raṅgācārya of Ātrēya-gōtra Gōpālaguru of Vādihamsa family: it is called Rāmāyaṇānvyaī.

Beginning:

प्रविश्य तु महारण्यं दण्डकारण्य(मात्मवान्)।
ददर्श रामो दुर्धर्षस्तापसाश्रममण्डलम् ॥

कुशचीरपरिक्षिप्तं ब्राह्मचा लक्ष्म्या समावृतम् ।
यथा प्रदीप्तं दुर्दर्शं गगने सूर्यमण्डलम् ॥

* * * *

प्रविश्य तापसाश्रममण्डलं तापसानां दण्डकारण्यवासिनां मुनीनामाश्रमाणां मण्डलं समूहं ददर्श। सार्धैस्सप्तभिश्श्लोकैः आश्रममण्डलं विशिनष्टि कुशेत्यादिभिः । कुशचीरपरिक्षिप्तं कुशवल्कलैर्व्याप्तं ब्राह्मचा ब्रह्मवर्चससंपन्नमुनिनिवासे तब्रा(द्रा)ह्मचा लक्ष्म्या समावृतम् । अत एव गगने आकाशे सूर्यमण्डलं यथा रविमण्डलमिव स्थितं दुर्दर्शं रक्षोभिर्द्रष्टुमप्यशक्यमित्यर्थः। दुर्धर्षमिति पाठे रक्षोभिराक्रमितुमशक्यामित्यर्थः। रविमण्डलपक्षे गायत्र्यभिमन्त्रितैः ब्राह्मणदत्तैरर्घ्यैर्दानवानां निवारणात्तै(:) दुर्धषत्वं द्रष्टव्यम । एतत्तैत्तिरीयकशाखायां प्रसिद्धम् । प्रदीप्तमाश्रमन्ददर्शेति पूर्वेण सम्बन्धः.

End:

ततो महद्वर्त्म च दूरसंक्रमं क्रमेण गत्वा प्रविलोकयन् वनम् ।
ददर्श पम्पां शुभदर्शकाननामनेकनानाविधपुष्पसङ्कुलाम् ॥

Colophon:

इति श्रीमद्रामायणे आदिकाव्ये श्रीमद्वाल्मीकीये श्रीमदरण्यकाण्डे पञ्चसप्ततितमस्सर्गः ॥

ऋश्यमूकमिति शेषः ॥

इति श्रीमद्रामायणे आदिकाव्ये श्रीमदरण्यकाण्डे गर्भव्याख्याने पञ्चसप्ततितमस्सर्गः ॥

वादिहंसवलाहकान्वयरत्नाकरसुधाकरश्रीगोपालगुरुकटाक्षप्रसरणनिवारितविद्यापटलेन रङ्गाचार्येण विरचिते रामायणान्वयिसमाख्याने व्याख्याने अरण्यकाण्डस्समाप्तः ॥

श्रीसाकेतपुराधिपस्य कृपया सीतामनोहारिणः
श्रीरामस्य दिनान्धकारपटलच्छेदोष्णरश्मेर्गुरोः

श्रीरामायणासिन्धुपातसदृशां(शीं)टीकां मनोहारिणीं
रङ्गाचार्यबुधोऽलिखत्स विदुषामात्रेयवंशोद्भवः ॥
आरण्यकाण्डगास्सर्गाः पञ्चसप्ततिरीरिताः ॥

No. 1902. रामायणव्याख्या (चतुरर्थी).

RĀMĀYAṆAVYĀKHYĀ (CATURARTHĪ.)

Substance, palm-leaf. Size, $17\frac{1}{8} \times 1\frac{3}{8}$ inches. Pages, 132. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old.

Incomplete.

A commentary evolving 4 meanings out of each of certain stanzas in the Rāmāyaṇa.

Beginning:

परस्परतपस्संपत्फलायितपरस्परौ ।
प्रपञ्चमातापितरौ प्राञ्चौ जायापती स्तुमः ॥
कूजन्तं रामरामेति मधुरं मधु राक्षरम् ।
आरूह्य कविताशाखां वन्दे वाल्मीकिकोकिलम् ॥

मधु(रं) मंधु राक्षरमिति पदविभागः । मस्य मकारस्य धूः भारो यः उपरिस्थितत्वा(त्), ऋक्पूरब्धूःपथामानर्क्ष(क्ष)इति समासान्तोऽप्रत्ययः । रेत्यक्षरं राक्षरं सर्वं मिळित्वा मरेत्यर्थः । पुरा खलु किरातजातिपतितस्य प्राचेतसस्य कारुण्यात्सप्त ऋषयः मरेति मन्त्रोपदेशमुपदिष्टवन्त इति कथात्रानुसन्धेया । तादृङ्मन्त्रे बहुधा उच्चार्यमाणे सति रामरामेति स्यात् । मधु क्षौद्रकल्पं रामरामेति कूजन्तं जल्पन्तम्.

End:

कुण्डलालङ्कृतं कुण्डं श्मशानकुण्डं लाति गृह्णातीति कुण्डलम् भलङ्कृतं [अलंकृतं]यस्य तत् श्मशानकुण्डमिव बिभ्रतमित्यर्थः । महत् कुम्भकर्णशिरः भाति प्रकाशते ॥

No. 1903. रामायणार्थप्रकाशिका.

RĀMĀYAṆĀRTHAPRAKĀŚIKĀ.

Substance, palm-leaf. Size, $17\frac{1}{4} \times 1\frac{3}{8}$ inches. Pages, 119. Lines, 7 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

A discussion on certain minor incidents in the Rāmāyaṇa, by Vēṅkaṭa, son of Lakṣmaṇa : from the 74th Sarga to the end of the Ayōdhyā-Kāṇḍa and from the 20th Sarga to the end of the Yuddha-Kāṇḍa.

Copying finished on the 12th of the Śuklapakṣa of Caitra in Kīlaka.

Beginning :

चतुस्सप्ततितमे—

यत्त्वया यादृशं पापं कृतं घोरेण कर्मणा ।
सर्वलोकप्रियं हित्वा मयाप्यासादितं भयम् ॥ २४५ ॥
सदाप्रतिमवृत्ता यां लोकधारणकामया ।
श्रीमत्या गुणनित्या या स्वभावपरिवेषया ॥
यस्याः पुत्रसहस्राणि सापि शोचति कामधुक् ।
किं पुनर्या विना रामं कौसल्या वर्तयिष्यति ॥ २४६ ॥
इति नाग इवारण्ये तोमराङ्कुशचोदितः ।
पपात भुवि संक्रुद्धो निश्वसन्निव पन्नगः ॥ २४७ ॥

पञ्चसप्ततितमे—

कारयित्वा महत्कर्म भर्ता भृत्यमनर्थकम् ।
अधर्मो योऽस्य सोऽस्यास्तु यस्यार्योऽनुमते गतः ॥
विप्रलुप्तप्रजातस्य दुष्कृतं ब्राह्मणस्य च ।
तदेतत्प्रतिपद्येत यस्यार्योऽनुमते गतः ॥
भक्त्या विवदमानेषु मार्गमाश्रित्य पश्यतः ।
तत्पापं प्रतिपद्येत यस्यार्योऽनुमते गतः ॥ २५० ॥

सप्तसप्ततितमे—

अवदारणकाले तु पृथिवी नावदीर्यते ।
विहीना या त्वया[त्वया]राज्ञा धर्मज्ञेन महात्मना ॥

End:

पूर्वन्त्वित्यादि । अत्र भरतलक्ष्मणयोः स्नानाद्यभिधानकाले शत्रुघ्नस्य स्नानानभिधानात्, सर्वेषां स्नानाधि(दि)कारयितृत्वस्यैवाभिधानात्, भरतादीनां व्रताद्यङ्गीकारकाले व्रताद्यङ्गीकारानभिधानाच्च अस्य व्रतित्वं नास्तीत्यवगम्यते । नन्दिग्रामे जटां हित्वा भ्रातृभिस्सहितोऽनघ इति बालकाण्डेऽभिहितत्वात् अत्र अनुक्तमपि व्रतादिकं शत्रुघ्नस्याप्यस्तीति मावगन्तव्यम् ॥ २३७ ॥

Colophon:

इति श्रीमद्युद्धकाण्डस्समाप्तः ॥
षट्काण्डश्लोकाः ॥ ११८ ॥

श्रीलक्ष्मणप्रपुत्रेण वेङ्कटाख्येन सूरिणा ।
अर्थप्रकाशिका व्याख्या वाल्मीकीये मुदा कृता ॥
टीकान्तराणि सर्वाणि संशोध्य न पुनस्स्वतः ।
इमां टीकां बुधास्सर्वेऽप्यङ्गीकुर्वन्तु पण्डिताः ॥
व्याख्यानश्लोकाः १००४८ (?)

No. 1904. रामायणसारसङ्ग्रहः.

RĀMĀYAṆASĀRASAṄGRAHAḤ.

Substance, paper. Size, 13⅝ × 8¼ inches. Pages, 69. Lines, 23 on a page. Character, Grantha. Condition, good. Appearance, new.

This is a record of the events in the Rāmāyaṇa, chronologically arranged by Vēṅkaṭācārya.

Begins on fol. 1*a*. The other works herein are Gōdāpariṇayaḥ 37*a*, Daśāvatāramañjarīstōtram 77*a*, Daśāvatārastōtradīpikā 79*a*, Kanakasabhāpatikārikā (Prayōgādarśa) 95*a*.

Beginning:

श्रीरामस्य जननानन्तरमष्टमवर्षे उपनयनम्, द्वादशे विश्वामित्रेण सह निर्गमनम्, तदारभ्य ताटकावधयज्ञसंरक्षणसीतापाणिग्रहणादिपर्यन्तं द्वादश वत्सरा एव । ततोऽयोध्यायां द्वादश संवत्सरा गताः । पञ्चविंशे चैत्रशुद्धपञ्चमीदिने वनवासारम्भः । इतश्चित्रकूटगमनादारभ्य सकलऋष्याश्रमनिवासेन दश संवत्सराः अनुभूताः । सुतीक्ष्णाश्रमे द्वौ वत्सरौ.

End:

ततस्सप्तम्युदयानन्तरं पुष्यनक्षत्रे गुरुवासरे अभिजिद्वेळायां श्रीरामपट्टाभिषेकः ॥

ततस्स प्रयतो वृद्धो वसिष्ठो ब्राह्मणैस्सह ।
रामं रत्नमये पीठे सहसीतं न्यवेशयत् ॥

तथा

अभ्यषिञ्चन्नरव्याघ्रं प्रसन्नेन सुगन्धिना ।
सलिलेन सहस्राक्षं वसवो वासवं यथा ॥

तदानीम्

छत्रं तु तस्य जग्राह सुग्रीवः पाण्डरं शुभम् ।
श्वेतं च वालव्यजनं सुग्रीवो वानरेश्वरः ॥
अपरं चन्द्रसङ्काशं राक्षसेन्द्रो विभीषणः ।

किं च

प्रजग्मु(गु)र्देवगन्धर्वा ननृतुश्चाप्सरोगणाः ॥
अभिषेके ततस्तस्य तदा रामस्य धीमतः ।
भूमिस्सस्यवती चैव फलवन्तश्च पादपाः ॥
गन्धवन्ति च पुष्पाणि बभूवू राघवोत्सवे ।

Colophon:

इति श्रीमद्वेङ्कटाचार्यकृतश्रीरामायणसारसङ्ग्रहे अर्धदिनोत्तरद्वाविंशद्दि-(तिदि)नसम्मितो युद्धकाण्डस्समाप्तः ॥

No. **1905.** रामायणसारसङ्ग्रहः.

RĀMĀYAṆASĀRASAṄGRAHAḤ.

Substance, palm-leaf. Size, $15\frac{3}{4} \times 1\frac{1}{4}$ inches. Pages, 74. Lines, 5 on a page. Character, Grantha. Condition, injured. Appearance, new.

Complete. Same as the last.

Colophon:

इति श्रीमन्मुप्पिराळकौण्डिन्यगोत्रोद्भवेन श्रीवेङ्कटाचार्येण कृते श्रीमद्रामायणसारसंग्रहे अर्धदिनोत्तरद्वाविंशतिदिनपर्यन्तो युद्धकाण्डस्समाप्तः ॥

No. **1906.** रामायणसारसङ्ग्रहः.

RĀMĀYAṆASĀRASAṄGRAHAḤ.

Substance, palm-leaf. Size, $15\frac{1}{2} \times 1\frac{3}{8}$ inches. Pages, 82. Lines, 7 on a page. Character, Grantha. Condition, fair. Appearance, old.

Complete. Same as the last.

Copying finished on Wednesday of Āvaṇi in Krōdhana.

Appended to this are two Adhyāyas of over 17 pages, from the Brahmāṇḍa Purāṇa, treating of the meritoriousness attached to the reading, &c., of the Rāmāyaṇa.

No. **1907.** रामायणसारसङ्ग्रहः.

RĀMĀYAṆASĀRASAṄGRAHAḤ.

Substance, palm-leaf. Size, $16\frac{5}{8} \times 1\frac{1}{8}$ inches. Pages, 24. Lines, 6 on a page. Character, Grantha. Condition, much injured. Appearance, old.

Incomplete. Same as the above.

No. 1908. रामायणसारसङ्ग्रहः.

RĀMĀYAṆASĀRASAṄGRAHAḤ.

Substance, palm-leaf. Size, 18¼ × 1¼ inches. Pages, 58. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Bhāgavatārādhanavaibhanam 30*a*.

Complete. Same as the above.

No. 1909. रामावतारकालनिर्णयसूचिका.

RĀMĀVATĀRAKĀLANIRṆAYASŪCIKĀ.

Substance, paper. Size, 8⅜ × 6⅜ inches. Pages, 18. Lines, 30 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other works herein are Nītiślōkaḥ 27*a*, Sūryāṣṭōttaraśatanāmāvaliḥ 30*a*, Sūryasiddhāntagrahapadakam 34*a*.

This is a work determining the date of the birth of Rāma and of certain incidents in his life.

Beginning :

ततश्च द्वादशे मासि चैत्रे नावमिके तिथौ ।
नक्षत्रेऽदितिदैवत्ये स्वोच्चसंस्थेषु पञ्चसु ॥
ग्रहेषु कर्कटे लग्ने वाक्पताविन्दुना सह ।
प्रोद्यमाने जगन्नाथं सर्वलक्षणसंयुतम् ॥
विष्णोरर्धं महाभागं पुत्रमैक्ष्वाकवर्धनम् ।
कौसल्या शुशुभे तेन पुत्रेणामिततेजसा ॥
यथा वरेण देवानामदितिर्वज्रपाणिना ।
गुणदोषौ बुधो गृह्णन् इन्दुक्ष्वेळाविवेश्वरः ।
शिरसा श्लाघते पूर्वं परं कण्ठे नियच्छति ॥

षण्मनूनां सुसम्पिण्डच्च कालं तत्सन्धिभिस्सह ।
कल्पादिसन्धिना सार्धं वैवस्वतमनोस्तथा ॥

End:

मामाश्रितानि कान्याहुः पौरजानपदा जनाः ।
किं च सीतां समाश्रित्य भरतं किञ्च लक्ष्मणम् ॥
किन्नु शत्रुघ्नमुद्दिश्य कैकेयीं किन्नु मातरम् ।
वक्तव्यता च राजानो नवे राज्ये व्रजन्ति हि ॥
काञ्चनं मम पत्नीश्च दीक्षार्हां यज्ञकर्मणि ।
अग्रतो भरतः कृत्वा गच्छत्वग्रे महायशाः ॥
न सीतायाः परां भार्यां[वव्रे राम]वव्रे स रघुनन्दनः ।
यज्ञे यज्ञे च पत्न्यर्थं जानकी काञ्चनाभवत् ॥

* * * *

No. 1910. वासिष्ठरामायणम्—सव्याख्यानम्.

VĀSIṢṬHARĀMĀYAṆAM WITH COMMENTARY.

Substance, paper. Size, 17½ × 7½ inches. Pages, 355. Lines, 15 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Sthiti-Prakaraṇa (62 Sargas) 1*a*, Vairāgya-Prakaraṇa (33 Sargas) 89*a*, Mumukṣutva-Prakaraṇa (20 Sargas) 138*a*.

The text is accompanied with the commentary of Ānanda-bōdhēndra-Sarasvatī, pupil of Gaṅgādharēndra-Sarasvatī, disciple of Rāmacandrēndra-Sarasvatī, disciple of Sarvajña-Sarasvatī.

The copying of this portion completed on the 12th of Kārtika-Śuddha in Krōdhana by Subbāvadhāni.

This is a work in six Prakaraṇas treating mainly of Yōga and Advaita-Vēdānta by means of illustrative stories. The work is attributed to Vālmīki and is said to have been first taught to Rāma by Vasiṣṭha. The six Prakaraṇas are (1) Vairāgya (2) Mumukṣutva (3) Utpatti (4) Sthiti (5) Upaśama and (6) Nirvāṇa.

Beginning:

(मू)

अथोत्पत्तिप्रकरणादनन्तरमिदं शृणु ।
स्थितिप्रकरणं राम ज्ञातं निर्वाणकारि यत् ॥ १ ॥

एवं तावदिदं विद्धि दृश्यं जगदिति स्थितम् ।
अहं वेत्याद्यनाकारं भ्रान्तिमात्रमसन्मयम् ॥ २ ॥

अकर्तृकमरङ्गं च गगने चित्रमुत्थितम् ।
अद्रष्टृकं चानुभवमनिद्रं स्वप्नदर्शनम् ॥ ३ ॥

भविष्यत्पुरनिर्माणं चित्तसंस्थामिवोदितम् ।
मर्कटानलतापान्तमसदेवार्थसाधकम् ॥ ४ ॥

(व्या)

सदभयनिजपूर्णानन्दसंवित्प्रतिष्ठं
यदिह निजमहिम्ना विश्वरूपाणि बिभ्रत् ।
विहरति च विमोहात्तेषु नानात्मबुद्ध्या
श्रुतिविदितस(सु)तत्त्वं तत्परं ब्रह्म वन्दे ॥ १ ॥
प्रसिद्धचित्रवैधर्म्यं जगच्चित्रस्य वर्ण्यते ।
साङ्ख्यादिमतमुन्मृज्य साध्यते ब्रह्ममात्रता ॥ २ ॥

उत्पत्तिप्रकरणे "यतो वा इमानि भूतानि जायन्ते" इत्यादीनां सर्वेषां सृष्टिप्रतिपादकवाक्यानामद्वये ब्रह्मणि जगदध्यारोपप्रदर्शनद्वारा तटस्थलक्षणतया तात्पर्यविश्रान्तिप्रदर्शनमुखेन जगज्जीवादिभेदं निरस्य प्रत्यग्ब्रह्मैकरस्यं व्युत्पादितम् । इदानीम् "येन जातानि जीवन्ति । येन द्यौः पृथिवी दृढा, एतस्यैवाक्षरस्य प्रसा(शास)ने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः, को ह्येवान्यात्कः प्राण्यात् । यदेष आकाश आनन्दो न स्यात् । एष ह्येवानन्दयाति, भीषास्माद्वातः पवते, एको द(ा)धार भुवनानि विश्वा, य एको जालवानीशत ईशनीभिः परमशक्ति-

भिः, अनुज्ञाता ह्ययमात्मास्य सर्वस्य स्वात्मानं ददाति" इत्यादिसाम्प्रतिकजगत्स्थितिनिर्वाहकताप्रतिपादकश्रुतीनाम्, "सदेव सोम्येदमग्र आसीत्, आत्मा वा इदमेक एवाग्र आसीत्" इत्यादिप्रलयकालिकजगत्सत्तानिर्वाहकत्वप्रतिपादकश्रुतीनां च पूरुषमतिवैचित्र्यप्रभवनाना तात्पर्योत्प्रेक्षणप्रयुक्तभ्रान्तिवैचित्र्यनिरासेन सच्चिदानन्दैकरसे ब्रह्मणि सच्चिद्रूपतोपपादनेन तटस्थलक्षणतात्पर्यपर्यवसानप्रदर्शनमुखेनापि विस्तरोपपादितं ब्रह्मैक्यज्ञानं स्थिरीकर्तुं स्थितिप्रकरणमारभमाणो भगवान् वसिष्ठः सङ्गतिं प्रदर्शयन् प्रतिजानीते अथेति । उत्पत्तेः स्थितिहेतुत्वाद्धेतुतासङ्गतिरिति भावः ॥

Beginning of Vairāgyaprakaraṇa.

व्या——

अजममरमनाद्यनन्तमन्तर्निजसुखबोधसदद्वितीयपूर्णम् ।
शिवमखिलहृदिस्फुरत्स्वमायाविकासितविश्वविलासमानताः स्मः ॥

* * * *

विद्याभिस्सह विश्रुता श्रितवती येषां मुखं भारती
सत्त्वोत्कर्षसमाधिभिस्स्थिरमहो तद्ब्रह्म येषां हृदि ।
पादाम्भोरुहमाश्रिताश्च सततं तीर्थैस्समं संपदः
श्रीसर्वज्ञसरस्वतीति विदितान् श्रीमद्गुरूंस्तान् भजे ॥

श्रीस्संश्रितेव चरणौ हृदयं च राम-
श्चन्द्रो मुखं गुणभरेण सरस्वती च ।
येषामतस्तदभिधाङ्कितनामधेया-
नस्मद्गुरून् गुरुतरान् प्रणतोऽस्मि नित्यम् ॥

तापध्वंसिव्यापृतकारुण्यकटाक्ष-
व्याख्यावाणीनिर्वृतसर्वाङ्गिशरण्यान् ।

श्रीमद्रामानन्दमुनीनद्भुतचर्या-
नार्यान्नित्यं देशिकवर्यान् प्रणतोऽस्मि ॥

* * * *

यत्कृपालेशमात्रेण तीर्णोऽस्मि भवसागरम् ।
श्रीमद्गङ्गाधरेन्द्राख्यान् श्रीगुरूंस्तान् सदा भजे ॥
आनन्दबोधयतिना श्रीमद्गुरुवचोऽमृतैः ।
वासिष्ठार्थप्रकाशोऽयं यथामति वितन्यते ॥

* * * *

अथ जगदिदमनादिमहामोहनिशासुप्तम् . . . . संसारमहारण्ये मोमुह्यमानं विवेकान्धं प्रबोधदौर्लभ्याद्विषीदन्तमुदीक्ष्य . . . परमकारुणीको भगवान् वाल्मीकिः . . . . . तटस्थस्वरूपलक्षणाभ्यां संक्षिप्य दिदर्शयिषुः . . . . तत्पदार्थं नमस्यति यत इति—

यतस्सर्वाणि भूतानि प्रतिभान्ति स्थितानि च ।
यत्रैवोपशमं यान्ति तस्मै सत्यात्मने नमः ॥

End of Vairāgyaprakaraṇa.

मू—

सकललोकचमत्कृतिकारिणोऽप्यभिमतं यदि राघवचेतसः ।
फलति नोदितमेव हि यमेव हि स्फुट तरंमुनयो हतबुद्धयः ॥

Colophon :

इति श्रीवाल्मीकिविरचिते महारामाणणे देवहूतोक्ते द्वात्रिंशत्सहस्र्यां संहितायां मोक्षोपाये वैराग्यप्रकरणे नभश्चरमहीचरसंमेलनं नाम त्रयस्त्रिंशत्तमस्सर्गः ॥

व्या—

नो इति नञ्पर्यायो निपातः; तर्हि हतबुद्धयो दुर्बुद्धयः । अभिज्ञता निष्फलैव स्यादिति भावः । तस्मादवश्यमुपदेष्टव्यमिति सिद्धम् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्री(रा)मच्च(च)न्द्रेन्द्रसरस्वतीपूज्यपादप्रशिष्येण श्रीगङ्गाधरेन्द्रसरस्वतीपूज्यपादशिष्येण श्रीमदानन्दबोधेन्द्रसरस्वत्याख्यभिक्षुणा विरचिते वासिष्ठतात्पर्यप्रकाशे वैराग्यप्रकरणे त्रयस्त्रिंशत्तमस्सर्गः ॥

ग्रन्थसख्या मूल ११४५ ॥ टीका २१२७ ॥

End :

(मू)

ज्ञानसत्पुरुषेहाभ्यामकर्त्रा कर्तृरूपिणा ।
त था पुंसा निरिच्छेन सममासाद्यते पदम् ॥ ११ ॥

सदाचार[ः]क्रमः प्रोक्तो मयैवं रघुनन्दन ।
तथोपदिश्यते सम्यगेवं ज्ञानक्रमोऽधुना ॥ १२ ॥

इदं यशस्यमायुष्यं पुरुषार्थफलप्रदम् ।
तज्ज्ञादाप्ताच्च सच्छास्त्रं श्रोतव्यं किल धीमता ॥ १३ ॥

श्रुत्वा त्वं बुद्धिनैर्मल्याद्बलाद्यास्यसि तत्पदम् ।
यथा कतकसंश्लो (श्ले)षात्प्रसादं कलुषं पयः ॥ १४ ॥

विदितवेद्यमिदं हि मनो मुनेर्विवशमेव हि याति परं पदम् ।
यदवबुद्धमखण्डितमुत्तमं तदवबोधवशान्न जहाति हि ॥ १५ ॥

Colophon :

इत्यार्षे श्रीमहारामायणे देवहूतोक्ते द्वात्रिंशत्सहस्रयां संहितायां वासिष्ठे वाल्मीकीये मोक्षोपाये मुमुक्षुव्यवहारप्रकरणे सदाचारनिरूपणं नाम विंशस्सर्गः ॥ ॥ २० ॥

प्रकरणं संपूर्णम् ॥

* * * *

(व्या)

अवधूयाज्ञानतत्कार्यं बुद्धं जागरूकम् । अखण्डितम् उत्तमम् । यत् पदं तन्मनो न जहाति अज्ञानतत्कार्यान्तरैस्समं बाधत एवेत्यर्थः । हीति विद्वत्प्रसिद्धौ ।

तथा चाहुः :—

"देहात्मज्ञानवद् ज्ञानदेहात्मज्ञानबाधकम् ।
आत्मन्येव भवेद्यस्य स नेच्छन्नपि मुच्यते" ॥ इति ॥ ॥ १५ ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीरामचन्द्रेन्द्रसरस्वतीपूज्यप(ा)-दप्रशिष्येण गङ्गाधरेन्द्रसरस्वतीशिष्येण श्रीआनन्दबोधेन्द्रसरस्वत्याख्यभि-क्षुणा विरचिते वासिष्ठतात्पर्यप्रकाशे मुमुक्षुव्यवहारप्रकरणे विंशतितम-स्सर्गः ॥ २० ॥ प्रकरणं सम्पूर्णम् ॥ ग्रन्थसंख्या ८२८ टीका १४९३ एवं संख्या २३२१ ॥

No. 1191. वासिष्ठरामायणम्—सव्याख्यानम्.

VĀSIṢṬHARĀMĀYAṆAM: WITH COMMENTARY.

Substance, palm-leaf (Śrītala). Size, 16 × 2⅞ inches. Pages, 570. Lines, 14 on a page. Character, Grantha. Condition, good. Appearance, new.

Upaśama-Prakaraṇa, complete; together with the commentary of Ānandabōdhēndra Sarasvati.

Beginning:

भुवनरचनपालनोपशान्ति-
प्रथितमहाविभवस्वभावपूर्णम् ।
निगमहृदयसाक्षि निष्प्रपञ्चं
निजसुखबोधघनं शिवं प्रपद्ये ॥

उत्पत्तिप्रकरणे सर्वसृष्टिश्रुतितात्पर्योद्घाटनाय मनोऽधीनैव सर्वप्रपञ्च-रचनेति दर्शितम्। स्थितिप्रकरणे च सर्वजगत्स्थितिप्रतिपादकश्रुतितात्पर्य-प्रदर्शनाय मनस्थित्यधीनैव सर्वप्रपञ्चस्थितिरिति दर्शितम्। इदानीम् "यथा गार्ग्य मरीचयोऽर्कस्यास्तं गच्छत एतस्मिन् तेजोमण्डल एकीभवन्ति, सुषुप्तिकाले सकले विलीने, यत्प्रयन्त्यभिसंविशन्ति, यथा नद्यस्स्यन्दमानास्समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय, गताः कलाः पञ्चदश प्रतिष्ठाः, एवमेवास्य परिद्रष्टुरिमाः षोडशकलाः पुरुषायणाः पुरुषं प्राप्यास्तं गच्छन्ति" इत्यादीनां सुषुप्तिप्रळयसमाधिसाक्षात्कारविदेहकैवल्येषु प्रपञ्चोपशमात् जीवस्य ब्रह्मस्वभावताप्राप्तिप्रतिपादनेन प्रत्यग्ब्रह्मैकरसा-खण्डवस्तुलक्षणश्रुतीनामपि मनउपशमादेव सर्वप्रपञ्चोपशमेन स्वरूप-प्रतिष्ठायां तात्पर्यमिति रहस्योद्घाटनायोपशमप्रकरणमारभमाणः पूर्वोत्तर-प्रकरणयोस्सङ्गतिं दर्शयन् विषयप्रयोजने निर्दिश्य शिष्यमवधारयन् प्रतिजानीते अथेति।

(मू)

श्रीवसिष्ठः—

अथ स्थितिप्रकरणादनन्तरमिदं शृणु।
उपशमप्रकरणं ज्ञातं निर्वाणकारि यत्॥ १॥

मध्याह्नशङ्खध्वनिना सहोत्थानमिहोच्यते।
वसिष्ठस्याह्निकं रात्रौ विश्वामित्रसहस्थितिः॥ २॥

(व्या)

अथ स्थितिप्रतिपादकश्रुतितात्पर्यवर्णनानन्तरम् उपसंहारबोधक-श्रुतितात्पर्यवर्णनस्यावसरसङ्गतेरित्यर्थः। ज्ञातं निर्वाणकारीति। तथा च पूर्वप्रकरणप्रयोजनमेवास्यापीत्येककार्यकारिता सङ्गतिरपि दर्शिता बोद्धव्या।

(मू)

वाल्मीकिरुवाच—

शरत्तारकिताकाशस्तिमितायां सुसंसदि ।
कथयत्येवमाह्लादि वसिष्ठे पावनं वचः ॥ ३ ॥

End:

(मू)

तयोदितप्रसरविलासशुद्धया
गतज्वरं पदमवलम्बयामलम् ।
धियेद्धया पुनरिह जन्मबन्धनै-
र्निबध्यसे समधिगतात्मदृश्यया ॥ १०१ ॥

Colophon:

इति श्रीमहारामायणे शतसाहस्त्र्यां संहितायां बालकाण्डे वासिष्ठ-मोक्षोपाये उपशमप्रकरणे समदर्शनं नाम त्रिन(ण)वतितमस्सर्गः ॥

(व्या)

तया विचारणया। उदितप्रसरस्य समाधेर्विलासेन ।

* * * *

तस्मात्तत्त्वसाक्षात्कारेणैवाविद्यातत्कार्यसर्वानर्थोपशमनान्नित्यनिरतिशयानन्दस्वरूपे प्रतिष्ठेति सिद्धम् ॥ १०१ ॥

इति श्रीवासिष्ठतात्पर्यप्रकाशे उपशमप्रकरणे त्रिन(ण)वतितमस्सर्गः ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमत्सर्वज्ञसरस्वतीपूज्यपादशिष्यस्य श्रीरामचन्द्रसरस्वतीपूज्यपादशिष्यश्रीमद्गङ्गाधरेन्द्रसरस्वत्याख्यभिक्षोश्शिष्येण श्रीमदानन्दबोधेन्द्रसरस्वत्याख्यभिक्षुणा विरचिते वासिष्ठतात्पर्यप्रकाशे उपशमप्रकरणं समाप्तम् ॥

टीकामूलसहितग्रन्थसङ्ख्या दशसहस्रम् ॥

No. 1912. वासिष्ठरामायणम्—सव्याख्यानम्.

VĀSIṢṬHARĀMĀYAṆAM: WITH COMMENTARY.

Substance, paper. Size, 13¼ × 8⅛ inches. Pages, 805. Lines, 22 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Nirvāṇa-Prakaraṇa, with the commentary of Ānandabōdhēndrasarasvatī.

Beginning:

श्रीराम उवाच :—

नैष्कर्म्यात्कल्पनात्यागात्तनुः पतति देहिनः ।
कथमेतदतो ब्रह्मन् सम्भवत्याशु जीवतः ॥ १ ॥

श्रीवसिष्ठ उवाच :—

जीवतः कल्पनात्यागो युज्यते न त्वजीवतः ।
रूपमस्य यथातत्त्वं शृणु श्रवणभूषणम् ॥ २ ॥

अहम्भावनमेवाहुः कल्पनं कल्पनाविदः ।
नभोऽर्थभावनं तस्य सङ्कल्पत्याग उच्यते ॥ ३ ॥

पदार्थरसमेवाहुः कल्पनं कल्पनाविदः ।
नभोऽर्थभावनं तस्य सङ्कल्पत्याग उच्यते ॥ ४ ॥

इदं वस्त्विति संवेगमाहुः कल्पनमुत्तमाः ।
नभोऽर्थभावनं तस्य सङ्कल्पत्याग उच्यते ॥ ५ ॥

(व्या)

शिवमभयमनन्तसौख्यसिन्धुं
हृदि निहितं हितमस्तमोहजालम् ।
जगदुदयलयस्थितिप्रवीणं
निरुपमबोधघनात्मदेवमीडे ॥

निर्ममा निरहङ्कारा निस्सङ्कल्पविकल्पनाः ।
यथा जीवन्ति चे . . . . क्तिस्तथोच्यते ॥

पूर्वार्धे श्रीरामसमाधिप्रदर्शनव्याजेनोत्तमाधिकारिणः श्रवणावृत्तिपरिपा- . . . . त्कारज्ञानोदयेन परमपदे सकृद्विश्रान्तिर्भवतीति दर्शितम् । तस्य दैवात् पुनर्व्युत्थानेऽपि यथा अविरतं त . . . . . तिरनायासेन सिध्यति । तथोत्तरभूमिकारोपणायोत्तरार्धमिदमारभ्यते । अत्रादौ रामः

" अहं ममेति संविदन् न दुव(ऽख)ता विमुच्यते ।
असंविदन् विमुच्यते यदीप्सितं तदाचर ॥ "

इत्थं(इति त्व)दुक्तम्; तत्र सर्वकल्पनात्यागे कल्पनाधीनदेहधारणादिव्यवहारासिद्धिं शङ्कते नैष्कर्म्यादिति ।

देहे प्राणादिष्वहन्तादिकल्पनात्यागाद्धेतोः नैष्कर्म्यात् सर्वक्रियोपरमात् हे(दे)हधारकप्राणादिचेष्टोपरमे देहिनस्तनुराशु पतति । अतः एतत् त्वदुक्तम् । तस्य जीवतः । व्यवहारादि कथं सम्भवतीत्यर्थः ॥ १ ॥

End:

(मू)

स्वामिन् तव प्रसादेन उत्तीर्णोऽहं भवाम्बुधेः ।
आपूरितजगज्जालं स्थितोऽस्मि गतसंशयः ॥ २४ ॥
यत्सर्वं खल्विदं ब्रह्म तज्जलानीति वं स्फुटम् ।
श्रुत्या . . . . साम्नि तस्मै ब्रह्मात्मने नमः ॥ २५ ॥

Colophon:

इति श्रीमहारामायणे निर्वाणप्रकरणे बालकाण्डे मोक्षोपाये देवदूतोक्ते शतसाहस्र्यां संहितायां वासिष्ठे ब्रह्मदर्शने नि . . . णोत्तरार्धे एकोनविंशत्युत्तराद्विशततमः सर्गः ॥

निर्वाणप्रकरणं सम्पूर्णम् ॥ २१९ ॥

(व्या)

हे स्वामिन् अहं तव प्रसादेन भवाम्बुधेरुत्तीर्णस्सन् पूर्णानन्दभावेनापूरितजगज्जालं यथा स्यात्तथा स्थितोऽस्मि नात्र संशय इत्यर्थः ॥ २४ ॥

गजवदनं शुभरदनं सज्जनभरणं समस्तगुणसदनम् ।
सच्चित्सुखसारघनं सदयं हृदये सदा वन्दे ॥ अ ॥

ग्रन्थस्य सर्वोपनिषत्सारार्थोपबृंहणत्वान्मुमुक्षुभिरादरणीयतां सूचयन् "सर्वं खल्विदं ब्रह्म तज्जलानीति शान्त उपासीत" इति छान्दोग्योपनिषत्प्रदर्शितस्फुटतरोपायसाहितज्ञानाधिगतसर्वात्मकसच्चिदानन्दाद्वयब्रह्मतत्त्वमनुसन्धायान्ते मङ्गळार्थं नमस्यति यत्सर्वमिति ।

* * * *

निरुपमनिजविस्तारं निस्संसारं नितान्तगम्भीरम् ।
नित्यसुखामृतपूरं पारावारं स्वमेव भजे ॥ २ ॥

ऋतुरसतुरगमहीशकविकारिशुभवत्सरस्य शिशिरत्रौः(र्तौ) ।
फाल्गुनसितसप्तम्यां भृगुरौहिणवृषभलग्नकसिद्धम् ॥ ३ ॥

वाक्यपुष्पाञ्जलिस्सोऽयं मया भक्त्या सम(र्पि)तः ।
धियः प्रेरकयोः श्रीमच्छिवयोश्श्रीपदाब्जयोः ॥ ४ ॥

Colophon:

इति श्रीवासिष्ठतात्पर्यप्रकाशे निर्वाणप्रकरणे उत्तरार्धे एकोनविंशत्युत्तरद्विशततमस्सर्गः ॥ २१९ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीसर्वज्ञसरस्वतीपूज्यपादशिष्यश्रीरामचन्द्रसरस्वतीपूज्यपादशिष्यश्रीगङ्गाधरेन्द्रसरस्वत्याख्यभिक्षोः शिष्येण आनन्दबाधन्द्रभिक्षुणा विरचितः श्रीवासिष्ठतात्पर्यप्रकाशस्सम्पूर्णः ॥

No. 1913. वासिष्ठरामायणम्—सव्याख्यानम्.

VĀSIṢṬHARĀMĀYAṆAM WITH COMMENTARY.

Substance, paper. Size, 13⅜ × 6⅝ inches. Pages, 365. Lines, 22 on a page. Character, Dēvanāgarī. Condition, good. Appearance, old.

Nirvāṇa-Prakaraṇa, Adhyāyas 39 to the end, with the commentary of Ānandabōdhēndrasarasvatī.

No. 1914. वासिष्ठरामायणम्—सव्याख्यानम्.

VĀSIṢṬHARĀMĀYAṆAM WITH COMMENTARY.

Substance, palm-leaf (Śrītāla). Size, 15⅝ × 2⅛ inches. Pages, 223. Lines, 12 on a page. Character, Grantha. Condition, good. Appearance, new.

Nirvāṇa-Prakaraṇa; breaks off in the 39th Sarga.

No. 1915. महाभारतम्.

MAHĀBHĀRATAM.

Substance, palm-leaf. Size, 17 × 1⅝ inches. Pages, 681. Lines, 8 on a page. Character, Telugu. Condition, good. Appearance, old.

Ādiparvan; Adhyāyas 1 to 250, excepting Adhyāyas 127 to 132 owing to 9 leaves from 202 to 210 being lost.

Beginning:

पाराशर्यवचस्सरोजममलं गीतार्थगन्धोत्कटं
नानाभ्या(ख्या)नककेसरं हरिकथासङ्गानुना बोधितम् ।
लोके सज्जनषट्पदैरहरहः पेपीयमानं मुदा
भूयात्भ(द्भा)रतपङ्कजं कलिमलप्रध्वंसि नः श्रेयसे ॥

* * * *

रोमहर्षणपुत्र उग्रश्रवास्सौतिः पौराणिको नैमिशारण्ये शौनकस्य कुलपतेः द्वादशवार्षिके सत्रे

सुखासीनानभ्यगच्छद्ब्रह्मर्षीन् संशितव्रतान् ।
विनयावनतो भूत्वा कदाचित्सूतनन्दनः ॥
तमाश्रममनुप्राप्तो नैमिशारण्यवासिनाम् ।
चित्राः श्रोतुं कथास्तत्र परिवव्रुस्तपस्विनः ॥
अभिवाद्य मुनींस्तांस्तु सर्वानेव कृताञ्जलिः ।
अपृच्छत्स तपोवृद्धान् सद्भिश्चैवाभिपूजितः ॥
अथ तेषूपविष्टेषु सर्वेष्वेव तपस्विषु ।
निर्दिष्टमासनं भेजे विनयाल्लोमहर्षणिः ॥
सुखासीनं ततस्तन्तु विश्रान्तमुपलक्ष्य च ।
अथापृच्छदृषिस्तत्र कश्चित्प्रास्तावयत्कथाः ॥
कुत आगम्यते सौति(ते) क्व चायं विहृतस्त्वया ।
कालः कमलपत्राक्ष शंशै(सै) तत्पृच्छतो मम ॥

* * * *

सौतिरुवाच—

जनमेजयस्य राजर्षेस्सर्पसत्रे महात्मनः ।
समीपे पार्थिवेन्द्रस्य सम्यक् पारीक्षितस्य च ॥
कृष्णद्वैपायनप्रोक्तास्सुपुण्या विविधा(:) कथाः ।
कथिताश्चापि विधिवद्यो वैशम्पायनेन वै ॥
श्रुत्वाहं ता विचित्रार्थमहाभारतसंश्रिता(:) ।
बहूनि संपरिक्रम्य तीर्थान्यायतनानि च ॥

End:

दद्याद्वै ब्राह्मणेभ्यश्च भोजनञ्च सदक्षिणम् ।
इदं स्वर्गप्रदं श्रेष्ठं ब्रह्महत्यानिवारणम् ॥

अगम्यागमनोत्थश्च पापं नाशयति ध्रुवम् ।
अर्थकामरसैर्भक्त्या सप्तधान्यमनुत्तमम् ॥

. . . . द्देयं द्विजातये ।
इत्येतदादिपर्वोक्तं प्रथमं बहुविस्तरम् ॥

श्रृणुयादिदमादिपर्व मुख्यं तदादि यः पठति विशुद्धबुद्धिः ।
स प्राप्नोति परं सुखं नृलोके नाकं गत्वा परमसुखतां प्राप्नुयात् ॥

Colophon:

इति श्रीमहाभारते शतसहस्रिकायां वैयासिक्यां संहितायामादिपर्वणि पञ्चाशदधिकद्विशततमोऽध्यायः ॥

No. 1916. महाभारतम्.

MAHĀBHĀRATAM.

Substance, palm-leaf. Size, $18\frac{1}{8} \times 1\frac{3}{4}$ inches. Pages, 512. Lines, 8 on a page. Character, Telugu. Condition, injured. Appearance, old.

Ādiparvan, complete.

नव श्लोकसहस्राणि शतानि नव चैव तत् ।
श्लोकात्स(स्स)चतुराशीतिरस्मिन् ग्रन्थे महात्मना ॥

No. 1917. महाभारतम्.

MAHABHĀRATAM.

Substance, paper. Size, $12\frac{1}{2} \times 8\frac{1}{8}$ inches. Pages, 400. Lines, 25 on a page. Character, Telugu. Condition, slightly injured. Appearance, new.

Adhyāyas 132 to 250 in the Ādiparvan.

No. 1918. महाभारतम्.

MAHĀBHĀRATAM.

Substance, palm-leaf. Size, $17\frac{3}{4} \times 1\frac{3}{8}$ inches. Pages, 601. Lines, 7 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Adhyāyas 26 to 250 in the Ādiparvan, and Adhyāyas 1 to 75 in the Sabhāparvan. Forty-two leaves in the beginning are lost.

No. 1919. महाभारतम्.

MAHĀBHĀRATAM.

Substance, paper. Size, $12\frac{1}{4} \times 7\frac{7}{8}$ inches. Pages, 921. Lines, 22 on a page. Character, Telugu. Condition, good. Appearance, new.

Adiparvan 1*a*, Adhyāyas 1 to 131; and Sabhāparvan 324*a*, Adhyāyas 1 to 75.

No. 1920. महाभारतम्.

MAHĀBHĀRATAM.

Substance, palm-leaf. Size, $17\frac{3}{8} \times 1\frac{1}{2}$ inches. Pages, 18. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

Ādiparvan, Adhyāyas 1 and 2.

No. 1921. महाभारतम् सटीकम्.

MAHĀBHĀRATAM WITH MEANING.

Substance, palm-leaf. Size, $19\frac{1}{8} \times 1\frac{1}{2}$ inches. Pages, 602. Lines, 10 on a page. Character, Grantha and Tamil. Condition, slightly injured. Appearance, old.

Adhyāyas 1 to 245 in the Ādiparvan; with a Tamil commentary by Śrīnivāsa-kavi.

No. 1922. महाभारतम्.

MAHĀBHĀRATAM.

Substance, palm-leaf. Size, 18 × 1⅝ inches. Pages, 171. Lines, 8 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Adhyāyas 1 to 75, in the Sabhāparvan.

Beginning:

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥

कृष्णः करोतु कल्याणं कंसकुञ्जरकेसरी ।
कालिन्दीजलकल्लोलकोलाहलकुतूहली ॥

* * * *

वैशम्पायनः ।

ततोऽब्रवीन्मयः पार्थं वासुदेवस्य सन्निधौ ।
प्राञ्जलिः प्रयतो भूत्वा हर्षयित्वा पुनः पुनः ॥

मय उवाच—

अस्माच्च कृष्णात्संरब्धात्पावकाच्च दिधक्षतः ।
त्वया त्रातोऽस्मि कौन्तेय ब्रूहि किं करवाणि ते ॥

अर्जुन उवाच—

कृतमेव त्वया सर्वं स्वस्ति तेऽस्तु प्रजासु च ।
प्रीतिमान(ा)वयोस्त्वं हि प्रीतिमन्तो वयञ्च ते ॥

मयः—

युक्तमेतत्त्वयि विभो यदात्थ पुरुषर्षभ ।
प्रीतिपूर्वमहं किञ्चित्कर्तुमिच्छामि भारत ॥

End:

कुरुभ्यो हि सदा मन्ये पाण्डवान् बलवत्तरान् ।
तथा वै बलवान्राजा जरासन्धो महाद्युतिः ॥
बाहुप्रहरणेनैव भीमेन निहतो युधि ।
तस्यार्थे शम एवास्तु पाण्डवैर्भरतर्षभ ॥
उभयोः पक्षयोर्युक्तं क्रियतामविशङ्कया ।
एवं कृते महाराज परं श्रेयस्त्वमाप्स्यसि ॥
एतद्गावल्गाणि(:) क्षत्ता धर्मार्थसहितं वचः ।
उक्तवानगृहीतञ्च मया पुत्रपरीप्सया ॥

Colophon:

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां सभापर्वण्य-नुद्यूते धृतराष्ट्रपरिदेवनं नाम पञ्चसप्ततितमोऽध्यायः ॥

No. 1923. महाभारतम्.

MAHĀBHĀRATAM.

Substance, palm-leaf. Size, 17¾ × 1½ inches. Pages, 213. Lines, 7 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Adhyāyas 1 to 80, in the Sabhāparvan.

Written out by Appalācārya of Bhōjanapalla; and completed on the 18th of Caitra in the year Jaya.

No. 1924. महाभारतम्.

MAHĀBHĀRATAM.

Substance, palm-leaf. Size, 16¼ × 1½ inches. Pages, 227. Lines, 9 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Sabhāparvan; breaks off in the 73rd Adhyāya.

No. 1925. महाभारतम्.
MAHĀBHĀRATAM.

Substance, palm-leaf. Size, 19⅝ × 1½ inches. Pages, 548. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Āraṇyaparvan, complete in 313 Adhyāyas.

Said to have been copied by Nallapāḍi Veṅkaṭaperumāḷ for Kōṭi Gōvinda Nāyakar.

Beginning:

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥

* * * *

जनमेजयः—

एवं द्यूतजिताः पार्थाः कोपिताश्च दुरात्मभिः ।
धार्तराष्ट्रैस्सहामात्यैर्निकृत्या द्विजसत्तम ॥

श्राविताः प[।]रुषा वाचः स्वबुद्धिर्वैरमुत्तमम् ।
किमवर्तन्त कौरव्या मम पूर्वपितामहाः ॥

कथश्चैश्वर्यविभ्रष्टाः सहसा दुःखमीयुषः ।
वने विजह्रिरे पार्थाः शक्रप्रतिमतेजसः ॥

के वै तानन्ववर्त्तन्त प्राप्तान्व्यसनमुत्तमम् ।
किमाचाराः किमाहाराः क्व च वासो महात्मनाम् ॥

कथञ्च द्वादश समाः वने तेषां महामुने ।
व्यतीयुः ब्राह्मणश्रेष्ठाः शूराणामरिघातिनाम् ।
कथश्च राजपुत्री सा प्रवरा स्स(स)र्वयोषिताम ॥

* * * *

एतदाचक्ष्व मे सर्वं विस्तरेण तपोधन ।
श्रोतुमिच्छामि चरितं भूरिद्रविणतेजसाम् ॥
कथ्यमानं त्वया विप्र परं कौतूहलं हि मे ।

End:

इत्युक्ते भीमसेनेन ब्राह्मणाः परमाशिषः ।
प्रयुज्यापृच्छ्य भरतान्यथा स्वस्वाश्रमं ययुः ॥
गृहीत्वाज्ञां वेदविदस्सर्वे ते मुनयस्तदा ।
आसेदुस्ते यथान्यायं पुनर्दर्शनकाङ्क्षया ॥
सह धौम्येन विद्वांसस्तथा पञ्च च पाण्डवाः ।
उत्थाय प्रययुर्वीराः कृष्णामादाय सत्वराः ॥
क्रोशमात्रमुपागम्य तस्माद्देशान्निमित्ततः ।
श्वोभूते मनुजव्याघ्राश्छन्नावासार्थमुद्यताः ॥
पृथक्छास्त्रविदस्सर्वे सर्वे मन्त्रविशारदाः ।
नीतिशास्त्रार्थतत्त्वज्ञा मन्त्राय समुपाविशन् ॥

Colophon:

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां श्रीआरण्यपर्वणि अरणिहरणसमाप्तिर्नाम त्रयोदशोत्तरत्रिशततमोऽध्यायः ॥

सूतः—

एतद्वः कथितं विप्रा अरण्यं पर्व चोत्तमम् ।
आरण्यफलमूलैश्च तर्पणं कारयेद्बुधः ॥
आरण्यपर्वणि तथा जलकुम्भं प्रदापयेत् ।
मृष्टान्नानि च मुख्येभ्यो ब्राह्मणेभ्यः प्रदापयेत् ॥
वाचकं पूजयेद्भक्त्या यथा तुष्येद्द्विजर्षभः ॥
कीलकनामसंवत्सर वैशाखशुद्ध ५.

No. 1926. महाभारतम्.
MAHĀBHĀRATAM.

Substance, palm-leaf. Size, $21\frac{1}{4} \times 1\frac{1}{3}$ inches. Pages, 528. Lines, 7 on a page. Character, Telugu. Condition, much injured. Appearance, old.

Āraṇyaparvan ; complete in 307 Adhyāyas.

No. 1927. महाभारतम्.
MAHĀBHĀRATAM.

Substance, paper. Size, $12\frac{1}{2} \times 7\frac{7}{8}$ inches. Pages, 624. Lines, 25 on a page. Character, Telugu. Condition, good. Appearance, new.

Āraṇyaparvan ; Adhyāyas 1 to 177.

No. 1928. महाभारतम्.
MAHĀBHĀRATAM.

Substance, paper. Size, $12\frac{1}{2} \times 7\frac{3}{4}$ inches. Pages, 488. Lines, 24 on a page. Character, Telugu. Condition, good. Appearance, new.

Āraṇyaparvan ; Adhyāyas 178 to 301.

No. 1929. महाभारतम्.
MAHĀBHĀRATAM.

Substance, palm-leaf. Size, $18\frac{1}{4} \times 1\frac{3}{8}$ inches. Pages, 270. Lines, 8 on a page. Character, Grantha. Condition, much injured. Appearance, old.

Adhyāyas 1 to 140, in the Āraṇyaparvan.

No. 1930. महाभारतम्.
MAHĀBHĀRATAM.

Substance, palm-leaf. Size, $18\frac{3}{4} \times 1\frac{1}{2}$ inches. Pages, 248. Lines, 9 on a page. Character, Nandināgarī. Condition, good. Appearance, new.

Āraṇyaparvan ; breaks off in the 153rd Adhyāya.

No. 1931. महाभारतम्.

MAHĀBHĀRATAM.

Substance, palm-leaf. Size, 16⅜ × 1⅜ inches. Pages, 261. Lines, 7 on a page. Character, Telugu. Condition, fair. Appearance, old.

Adhyāyas 1 to 75, in the Virāṭaparvan.

Beginning:

जनमेजय उवाच—

कथं विराटनगरे मम पूर्वपितामहाः ।
अज्ञातवासमुषिता दुर्योधनभयार्दि(ताः) ॥

(पतिव्रता महाभागा सततं दु:ख) भागिनी ।
द्रौपदी वा कथं ब्रह्मन् अजा(ज्ञा)ता दुःखितावसत् ॥

ते तु द्विजातिमुख्यास्तु मुदा पौरोहित(गवै)स्सह ।
अज्ञा (तवासमवसन् कथं च परिचारकाः) ॥

(तथा) स तान्वरान् लब्ध्वा धर्मराजो युधिष्ठिरः ।
गत्वाश्रमं ब्राह्मणेभ्यो ह्याचख्यौ वृत्तमात्मनः ॥

कथयित्वा तदा . . . . ।
(अरणी)सहितं बाण्डं ब्राह्मणाय न्यवेदयत् ॥

End:

पट्टवासांसि चित्राणि दासीदासान् बहून् ददौ ॥

नागरान् प्रीतिभिर्दिव्यैः तर्पयामास भूपतिः ।
तन्महोत्सवसंकाशं हृष्टपुष्टजनायुतम् ॥

नगरे मत्स्यराजस्य शुशुभे भरतर्षभ ।
पुरोहितैरमात्यैश्च पूर्वैर्जानपदैस्सह ॥

विराटो नृपतिः श्रीमान् सौभद्रायाभिमन्यवे ।
तां सुतामुत्तरां दत्वा मुमुदे परमन्तदा ॥

जनमेजयः—

वृत्ते विवाहे हृष्टात्मा यदुवाच युधिष्ठिरः ।
तत्सर्वं कथयस्त्वे(स्वे)ह कृतवन्तो यदुत्तरम् ॥

Colophon:

इति विराटपर्वणि पञ्चसप्ततितमोऽध्यायः ॥

No. 1932. महाभारतम्.

MAHĀBHĀRATAM.

Substance, paper. Size, $12\frac{1}{4} \times 7\frac{7}{8}$ inches. Pages, 1,015. Lines, 20 on a page. Character, Telugu. Condition, good. Appearance, new.

Virāṭaparvan (1*a*), 1 to 75 Adhyāyas. Udyōgaparvan (182*a*), 1 to 201 Adhyāyas.

No. 1933. महाभारतम्.

MAHĀBHĀRATAM.

Substance, palm-leaf. Size, $15\frac{3}{4} \times 1\frac{3}{8}$ inches. Pages, 300. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, old.

Adhyāyas 1 to 78, in the Virāṭaparvan.

No. 1934. महाभारतम्.

MAHĀBHĀRATAM.

Substance, palm-leaf. Size, $15\frac{7}{8} \times 1\frac{3}{8}$ inches. Pages, 487. Lines, 6 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Adhyāyas 1 to 200, in the Udyōgaparvan.

Beginning :

व्यासं वसिष्ठनप्तारं शक्तेः पौत्रमकल्मषम् ।
पराशरात्मजं वन्दे शुकतातं तपोनिधिम् ॥

यो गोशतं कनकशृङ्गमयं ददाति विप्राय वेदविदुषे सुबहुश्रुताय ।
पुण्याञ्च भारतकथां शृणुयाच्च नित्यं तुल्यं फलं भवति तस्य च तस्य चैव ॥

अचतुर्वदनो ब्रह्मा द्विबाहुरपरो हरिः ।
अफाललोचनश्शम्भुर्भगवान्बादरायणः ॥

श्रीमत्फुल्लजपाप्रसूनसुषमासादृश्यदेहप्रभं
दोर्भिर्वेदमितैरपूपुरदसा पाशाङ्कुशौ तुन्दिलम् ॥
बिभ्राणं फणियज्ञसूत्रममलाकल्पं[सु]त्रिणेत्रं सदा
गण्डोपान्तगलन्मदं गणपतिं गौरीतनूजं भजे ॥

कृत्वा विवाहं तु कुरुप्रवीरास्तथाभिमन्योर्मुदितस्वपक्षाः ।
विश्रम्य चत्वार्युषसः प्रतीताः स्स(स्वच्छा) विराटस्य ततोऽभिजग्मुः ॥
सभा तु सा मत्स्यपतेस्समृद्धा मणिप्रवालोत्तमरत्नचित्रा ।
न्यस्तासना माल्यवती सुगन्धा तामध्ययुस्ते नरराजवृद्धाः ॥
अथासनान्याविशतां पुरस्तादुभौ विराटद्रुपदौ नरेन्द्रौ ।
वृद्धाश्च मान्याः पृथिवीपतीनां पित्रा समौ रामजनार्दनाभ्याम् ॥
पाञ्चालराजस्य समीपतस्तु शिनिप्रवीरस्सहरौहिणेयः ।
मत्स्यस्य राज्ञस्तु स सन्निकृष्टौ जनार्दनश्चैव युधिष्ठिरश्च ॥

End :

एवं तस्य बलं भीमं कुन्तीपुत्रस्य धामतः ।
यथाश्रित्याथ युयुधे धार्तराष्ट्र(:) सुयोधनम्(:) ॥
ततोऽन्ये शतशः पश्चात् सहस्रायुतशौ नराः ।
नर्दन्तः प्रययुस्तेषामनीकानि सहस्रशः ॥

तत्र भेरीसहस्राणि शङ्खानामयुतानि च ।
न्यवादयन्त संहृष्टास्सहस्रायुतशो नराः ॥

Colophon :

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम् उद्योगपर्वणि पाण्डवयुद्धसन्नाहो नाम द्विशततमोऽध्यायः ॥

कीलकनामसंवत्सर श्रावणबहुळ १० जयनारान आमंश्च मङ्गय्यगारिकि पाल्गुम्मि लिङ्गमूर्तिभारतम् उद्योगपर्वं संपूर्णङ्गात्राशेनु ॥

No. 1935. महाभारतम्.

MAHĀBHĀRATAM.

Substance, palm-leaf Size, 18½ × 1½ inches. Pages, 476. Lines, 8 on a page. Character, Grantha. Condition, much injured. Appearance, old.

Udyōgaparvan ; breaks off in the 195th Adhyāya.

No. 1936. महाभारतम्.

MAHĀBHĀRATAM.

Substance, paper. Size, 7½ × 6⅛ inches. Pages, 113. Lines, 37 on a page. Character, Grantha. Condition, good. Appearance, new.

Udyōgaparvan ; breaks off in the 59th Adhyāya.

No. 1937. महाभारतम्.

MAHĀBHĀRATAM.

Substance, palm-leaf. Size, 14¾ × 1⅜ inches. Pages, 154. Lines, 10 on a page. Character, Grantha. Condition, much injured. Appearance, old.

Udyōgaparvan, Adhyāyas 178 to 200 ; and Aśvamēdhaparvan, Adhyāyas 99 to 125.

No. 1938. महाभारतम्.

MAHĀBHĀRATAM.

Substance, palm-leaf. Size, 16¼ × 1⅓ inches. Pages, 449. Lines, 9 on a page. Character, Telugu. Condition, good. Appearance, old.

Udyōgaparvan ; complete in 199 Adhyāyas.

No. 1939. महाभारतम्.

MAHĀBHĀRATAM.

Substance, palm-leaf. Size, 18¼ × 1⅓ inches. Pages, 378. Lines, 8 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Udyōgaparvan ; complete in 201 Adhyāyas.

No. 1940. महाभारतम्.

MAHĀBHĀRATAM.

Substance, palm-leaf. Size, 16⅞ × 1½ inches. Pages, 372. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Bhīṣmaparvan ; complete in 120 Adhyāyas.

The MS. is dated—Sunday the 14th of Caitra-Śuddha in the year Plavaṅga. It is said to have been copied by Gaḍḍamanaga Muttamıāju for Gōvinda Nāyakar.

Beginning :

नारायणं नमस्कृत्य नरञ्चैव नरोत्तमम् ।
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥

जनमेजय उवाच—

कथं युयुधिरे वीराः कुरुपाण्डवसोमकाः ।
पर्थिवास्सुमहात्मानो नानादेशसमागताः ॥

वैशम्पायन[म]:—

यथा युयुधिरे वीराः कुरुपाण्डवसोमकाः ।
कुरुक्षेत्रे तपःक्षेत्रे शृणु त्वं पृथिवीपते ॥

तेऽवतीर्य कुरुक्षेत्रे पाण्डवास्सहसोमकाः ।
कौरवास्समवर्तन्त जिगीषन्तो महाबलाः ॥

वेदाध्ययनसंपन्नाः सर्वे युद्धाभिनन्दिनः ।
आशंसन्तो जयं युद्धे बलेनाभिमुखा रणे ॥

अभियाय च दुर्धर्षा धार्तराष्ट्रस्य वाहिनीम् ।
प्राङ्मुखाः पश्चिमे भागे न्यविशन्त ससैनिकाः ॥

समन्तपञ्चकाद्बाह्यं शिबिराणि सहस्रशः ।
कारयामास विधिवत्कुन्तीपुत्रो युधिष्ठिरः ॥

End :

युध्यस्व निरहङ्कारो बलवीर्यव्यपाश्रयः ।
धर्माद्धि युद्धाच्छ्रेयोऽन्यत्क्षत्रियस्य न विद्यते ॥

प्रशमे हि कृतो यत्नः सुमहांस्तु चिरं मया ।
न चैवं शक्तितः कर्तुं यतो धर्मस्ततो जयः ॥

सञ्जयः—

इत्युक्तवति गाङ्गेये अभिवाद्य प्ररुद्य च ।
राधेयो रथमारुह्य प्रायात्तव सुतं प्रति ॥

Colophon :

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां भीष्मपर्वसमाप्तिर्नाम विंशत्युत्तरशततमोऽध्यायः ॥

भीष्मपर्वणि राजेन्द्र दत्वा यानमनुत्तमम् ।
ततस्सर्वगुणोपेतमन्नं दद्यात् सुसंस्कृतम् ॥

No. 1941. महाभारतम्.

MAHĀBHĀRATAM.

Substance, palm-leaf. Size, $15\frac{3}{4} \times 1\frac{1}{4}$ inches. Pages, 404. Lines, 7 on a page. Character, Telugu. Condition, fair. Appearance, old.

Bhīṣmaparvan; breaks off in the 120th Adhyāya.

No. 1942. महाभारतम्.

MAHĀBHĀRATAM.

Substance, paper. Size, $12\frac{1}{8} \times 7\frac{7}{8}$ inches. Pages, 985. Lines, 20 on a page. Character, Telugu. Condition, good. Appearance, new.

Adhyāyas 1 to 205; in the Drōṇaparvan.

No. 1943. महाभारतम्.

MAHĀBHĀRATAM.

Substance, palm-leaf. Size, $19\frac{7}{8} \times 1\frac{3}{4}$ inches. Pages, 220. Lines, 10 on a page. Character, Telugu. Condition, injured. Appearance, old.

Drōṇaparvan; begins in the course of the 5th Adhyāya and breaks off in the 143rd Adhyāya. Three leaves are lost in the beginning.

No. 1944. महाभारतम्.

MAHĀBHĀRATAM.

Substance, paper. Size, $12\frac{1}{2} \times 7\frac{5}{8}$ inches. Pages, 383. Lines, 26 on a page. Character, Telugu. Condition, good. Appearance, new.

Karṇaparvan; complete in 94 Adhyāyas.

The other work herein is Śiśupālavadha with commentary.

No. 1945. महाभारतम्.

MAHĀBHĀRATAM.

Substance, palm-leaf. Size, 18 × $1\frac{5}{8}$ inches. Pages, 619. Lines, 8 on a page. Character, Telugu. Condition, good. Appearance, old.

Contains the following parvans.

Karṇaparvan (1*a*), Adhyāyas 103.

Śalyaparvan (164*a*), Adhyāyas 30.

Gadāparvan (208*a*), Adhyāyas 37.

Sauptikaparvan (261*a*), Adhyāyas 19 including Aiṣika.

Strīparvan (286*a*), Adhyāyas 19.

No. 1946. महाभारतम्.

MAHĀBHĀRATAM.

Substance, palm-leaf. Size, $16\frac{7}{8}$ × $1\frac{3}{8}$ inches. Pages, 213. Lines, 8 on a page. Character, Telugu. Condition, good. Appearance, old.

Śalyaparvan (30 Adhyāyas) fol. 1*a*; and Gadāparvan (37 Adhyāyas) fol. 46*a*; complete.

No. 1947. महाभारतम्.

MAHĀBHĀRATAM.

Substance, palm-leaf. Size, 19 × $1\frac{1}{8}$ inches. Pages, 756. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Śāntiparvan; complete in 190 Adhyāyas

Beginning:

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥
नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥

श्रीवैशम्पायन उवाच—

कृतोदकास्ते सुहृदां सर्वेषां पाण्डुनन्दनाः ।
विदुरो धृतराष्ट्रश्च सर्वाश्च भरत स्त्रियः ॥

तत्र ते सुमहात्मानो न्यवसन् पाण्डुनन्दनाः ।
शौचं निर्वर्तयिष्यन्तो मासमात्रं बहिः पुरात् ॥

कृतोदकं तु राजानं धर्मपुत्रं युधिष्ठिरः(म्) ।
अभिजग्मुर्महात्मानः सिद्धा देवर्षिसत्तमाः ॥

द्वैपायनो नारदश्च देवलश्च महानृषिः ।
देवस्थानश्च कण्वश्च तेषां शिष्याश्च सत्तमाः ॥

अन्ये च वेदविद्वांसः कृतप्रज्ञा द्विजातयः ।
गृहस्थाः स्नातकास्सि(स्सू)ता ददृशुः कुरुसत्तमम् ॥

तेऽभिगम्य महात्मानः पूजिताश्च यथाविधि ।
आसनेषु महार्हेषु विविशुस्ते महर्षयः ॥

End:

यद्वै प्रोक्तं तात सम्यक् प्रधानं नित्यं चैतच्छाश्वतं चाव्ययं च ।
यद्वै सूते धातुराद्यं विधानं तद्वै विप्राः प्रवदन्ते निरुद्धम् ॥

यद्वै लोके वैदु(दि)कं कर्म साधु आशीर्युक्तस्तद्धि तस्यैव भाव्यम् ।
देवास्सर्वे मुनयस्साधु ताताः तं प्राग्यज्ञैर्यज्ञभागं यजन्ते ॥

अहं ब्रह्म आद्य ईशः प्रजानां तस्माज्जातस्त्वं च मत्तः प्रसूत ।
मत्तो जगज्जङ्गमं स्थावरं च सर्वे वेदास्सरहस्या हि पुत्र ॥

चतुर्विभक्तः पुरुषः स क्रीडति यथेच्छसि ।
एवं स भगवान् स्वेन ज्ञानेन प्रतिबोधितः ॥

एतत्ते कथितं पुत्र यथावदनुपृच्छतः ।
साङ्ख्यज्ञाने तथा योगे यथावदनुवर्णितम् ॥

Colophon :

इति श्रीमहाभारते शान्तिपर्वणि मोक्षधर्मे नारायणीयसमाप्तिर्नाम नवत्युत्तरशततमोऽध्यायः ॥ मोक्षधर्मास्समाप्ताः ॥

शान्तिपर्व च सं श्रुत्वा पूजयेद्वाचकं ततः ।
वस्त्रैराभरणैर्माल्यैः गन्धपुष्पाक्षतादिभिः ॥
ब्राह्मणान् भोजयेत्पश्चात् यदा(था)विभवसारतः ।
हरिर्ददाति तत्सर्वं साम्राज्यं मोक्षमेव च ॥

प्लवङ्गनामसंवत्सरज्येष्ठबहुळसप्तम्यां कोठिगोविन्दनायकवर्याय नल्लपाडि वेङ्कटपेरुमळाख्येन शान्तिपर्व संपूर्णं लिखितम् ॥

No. **1948.** महाभारतम्.

MAHĀBHĀRATAM.

Substance, palm-leaf. Size, $17\frac{7}{8} \times 1\frac{1}{4}$ inches. Pages, 183. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old.

Śāntiparvan; Adhyāyas 114 to 170.

No. **1949.** महाभारतम्.

MAHĀBHĀRATAM.

Substance, palm-leaf. Size, $18 \times 1\frac{1}{2}$ inches. Pages, 710. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Ānuśāsanikaparvan; complete in 249 Adhyāyas. An index of 9 pages is added.

Beginning :

युधिष्ठिरः—

शमो बहुविधाकारस्सूक्ष्मश्चोक्तस्त्वयानघ ।
न चैव हृदये शान्तिः अस्ति काचिन्ममानघ ॥

अस्मिन्नर्थे बहुविधा शान्तिरुक्ता त्वयानघ ।
स्वकृतात्मानुशान्तिः स्यात् शमाद्बहुविधादपि ॥

शराचितं शरीरं हि तीव्रव्रणमुदीक्ष्यते ।
शमं नोपलभे वीर दुष्कृतान्यनुचिन्तयन् ॥

रुधिरेणावसिक्ताङ्गं प्रस्रवन्तं यथाचलम् ।
त्वां दृष्ट्वा पुरुषव्याघ्र निंदेदा(ददुः) वर्षमम्बुदाः ॥

अतः कष्टतरं किन्नु मत्कृतन्तु पितामह ।
इमामवस्थां गमितः प्रत्यमित्रे रणाजिरे ॥

अन्ये नृपतयश्चान्ये सपुत्रास्सहबान्धवाः ।
वयं वा धार्तराष्ट्राश्च काममन्युवशङ्गताः ॥

कृत्वैवं निन्दितं कर्म प्राप्स्यामः कां गतिं नृप ।
सोऽहमार्तिकरो जातः सुहृद्वधकरस्तथा ॥

न शान्तिमधिगच्छामि कुतश्चित्संशितव्रतः ।

भीष्मः—

परतन्त्रः कथं हेतुमात्मानमनुपश्यसि ।
कर्मण्यस्मिन् महाभाग सूक्ष्मं हेत(तु)रतीन्द्रियम् ॥

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
संवादं मृत्युगौतम्याः काललुब्धकपन्नगैः ॥

गोतमी नाम काप्यासीत् स्थविराशयसंयुता ।
सर्पेण दष्टं त्वं(स्वं)पुत्रमपश्यद्गतजीवनम (चेतसम्) ॥

अथ तं लुब्धको राजन् बध्वा सर्पममर्षणः ।
लुब्धको जनको नाम गौतम्यास्समुपानयत् ॥

* * * *

Colophon :

इत्यानुशासनिके पर्वणि गौतमीलुब्धकपन्नगमृत्युकालसंवादो नाम प्रथमोऽध्यायः ॥

End :

न शक्तस्संयुगे हन्तुं साक्षादपि शतक्रतुः ।
स्वच्छन्देन सुतस्तुभ्यं गतः स्वर्गं शुभानने ॥
न शक्तास्तं निहन्तुं हि रणे तं सर्वदेवताः ।
तस्माना(न्मा)तं सरिच्छ्रे(च्छ्रे)ष्ठे शोचस्व कुरुनन्दनम् ॥
वसुने(रे)ष गतो देवि पुत्रस्ते विज्वरा भव ।
वैशम्पायनः—
इत्युक्त्वा(क्ता)सा तु कृष्णेन व्यासेन सत(रि)तां वरा ।
त्यक्त्वा शोकं महाराज स्वदार्यप(धाम्न्यव)ततार ह ॥
सत्कृत्य ते तां सरितं ततः कृष्णमुखा नृपाः ।
अनुज्ञाप्य च ते सर्वे न्यवर्तन्त जनाधिपाः ॥

Colophon :

इति श्रीमहाभारते शतसहस्र्यां वैयासिक्यां शान्तिपर्वणि उत्तमानुशासनिके दानधर्मे भीष्मस्वर्गारोहणप्रसङ्गो नाम एकोनपञ्चाशदुत्तरद्विशततमोऽध्यायः ॥

अस्मिन् पर्वणि य(ये) श्लोका अध्यायाः परिकीर्तिताः ।
अध्यायानान्तु द्विशतं षट्पञ्चाशत्तथैव च ॥
श्लोकानान्तु सहस्राणि द्वादशानुप्र(की)र्त्यते ।
पञ्चैतं शतान्याहुरष्टौ षष्ठिस्तथैव च ॥

अनुशासनिकप्रथमाध्याये गौतमीलुब्धकपन्नगमृत्युकालसंवादः, अतिथिपूजाविधौ सुदर्शनोपाख्यानम्, विश्वामित्रोपाख्यानम्, वीतहव्योपाख्यानम्, दैवपुरुषकारनिर्णयः, सूक्ष्मेण सकलधर्मनिर्णयः, शुकश-

कसंवादः, ब्राह्मणप्रशंसा, चतुर्वेदसंवादः, युधिष्ठिरप्रश्नः, भगवद्भक्तिः संक्षेपेण प्रोक्ता, सनत्कुमारनारदसंवादः, वैकुण्ठसुपर्णसंवादः, ऋषीणां वियोनिसम्भवप्रकारः, मार्कण्डेयनारदसंवादः, पात्रापात्रनिर्णयः, श्राद्धे पात्रापात्रनिर्णयः, धर्माधर्मस्वर्गनिरयप्राप्तिनिर्णयः, अहिंसया ब्रह्महत्यानिर्णयः, नानातीर्थमाहात्म्यप्रसङ्गः.

* * * *

प्रत्यक्षागमयोः संस्कारणं भवेदिति प्रश्नः, केचिद्धर्मं नोपसेवन्ते केचिद्धर्ममुपासत इति प्रश्नः, असाधुस्साधुः सन्तोऽसन्तश्च कीदृशा इति प्रश्नः, सभाग्याभाग्यपुरुषप्रश्नः, भीष्मानुज्ञया युधिष्ठिरहास्तिनापुरप्रवेशः, पुनर्भीष्मं प्रति जनार्दनविदुरधृतराष्ट्रादिपौरजानपदैस्सह युधिष्ठिरागमनम्, धृतराष्ट्रं प्रति भीष्मेण शमोपदेशः, भीष्मोक्तकृष्णस्तुतिः, भीष्मयोगेन विशल्यो भवति । योगेनैव मूर्धानं विनिर्भिद्य स्वर्गप्राप्त(प्ति)ः । इत्यानुशासनिके अमी वृत्तान्ताः ।

प्लवङ्गनामसंवत्सरे चैत्रशुद्धद्वितीयायां बुधवासरे सायं महाराजाय गोविन्दनायकवर्याय मुक्कामला सुन्दररायेण आनुशासनिकं लिखितम् ॥

No. 1950. महाभारतम्.
MAHĀBHĀRATAM.

Substance, palm-leaf. Size, 14 × 2 inches. Pages, 375. Lines, 15 on a page. Character, Grantha. Condition, good. Appearance, old.

Ānuśāsanikaparvan ; in 247 Adhyāyas.

No. 1951. महाभारतम्.
MAHĀBHĀRATAM.

Substance, palm-leaf. Size, $18\frac{1}{8} \times 1\frac{1}{2}$ inches. Pages, 106. Lines, 7 on a page. Character, Telugu. Condition, injured, Appearance, old.

Ānuśāsanikaparvan, Adhyāyas 237 to 243 with index, fol. 1*a*. Aśvamēdhaparvan (20*a*), breaks off in the 39th Adhyāya.

No. 1952. महाभारतम्.

MAHĀBHĀRATAM.

Substance, palm-leaf (Śrītāla). Size, 28¼ × 2¼ inches. Pages, 23 Lines, 9 on a page. Character, Kanarese. Condition, injured. Appearance, old.

Begins on fol. 42*a*. The other works herein are Rukmāṅgadacaritram (1*a*). Hariścandrōpākhyānam—(25*a*), Vāyupurāṇam Lakṣmīsaṁhitā, (55*a*).

Āśvamēdhikaparvan ; Adhyāyas 4 to 15.

No. 1953. महाभारतम्.

MAHĀBHĀRATAM.

Substance, palm-leaf. Size, 15¾ × 1⅜ inches. Pages, 473. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Āśvamēdhikaparvan, Adhyāyas 1 to 117 (fol. 1*a*.)
Āśramavāsaparvan, Adhyāyas 1 to 46 (fol. 172*a*.)
Mausalaparvan, Adhyāyas 1 to 9 (fol. 208*a*).
Mahāprasthānaparvan, Adhyāyas 1 to 3 (fol. 220*a*.)
Svargārōhaṇaparvan, Adhyāyas 1 to 5 (fol. 227*a*.)

Beginning :

नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥

वैशम्पायनः—

कृतोदकन्तु राजानं धृतराष्ट्रं युधिष्ठिरः ।
पुरस्कृत्य महाबाहुरुत्तताराकुलेन्द्रियः ॥
उत्तीर्य तु महाबाहुर्बाष्पव्याकुललोचनः ।
पपात तीरे गङ्गाया व्याधविद्ध इव द्विपः ॥

तं सीदमानं जग्राह भीमः कृष्णेन चोदितः ।
मैवमित्यब्रवीच्चैनं कृष्णः परबलार्दनः ॥
तमार्तं पतितं भूमौ श्वसन्तं च मुहुर्मुहुः ।
ददृशुः पार्थिवा राजन् धर्मपुत्रं युधिष्ठिरम् ॥
तं दृष्ट्वा दीनमनसं गतसत्त्वं नरेश्वरम् ।
भूयश्शोकसमाविष्टाः पाण्डवास्समुपाविशन् ॥
राजा तु धृतराष्ट्रश्च पुत्रशोकाभिपीडितः ।
वाक्यमाह महाबुद्धिः प्रज्ञाचक्षुर्जनेश्वरः ॥
उत्तिष्ठ कुरुशार्दूल कुरु कार्यमनन्तरम् ।
क्षत्रधर्मेण कौन्तेय जितेयमवनी त्वया ॥
भुङ्क्ष्व भोगान् भ्रातृभिश्च सुहृद्भिश्च मनोऽनुगान् ।

End:

त्रिभिर्वर्षैर्महत्पूर्वं कृष्णद्वैपायनः प्रभुः ।
निखिलं भारतं वेदं चकार भगवानृषिः ॥
पित्र्ये पञ्चदश ज्ञेयं नाग(क)लोकेऽष्टषष्ठकम् ।
एतं शतसहस्रं तु मानुषेषु प्रभा(षि)तुम् ॥
नारदोऽश्रावयद्देवान् नसितो देवलः पितॄन् ।
रक्षोयक्षाञ्छुको मर्त्यान् वैशम्पायन एव तु ॥
इतिहासमिमं पुण्यं महार्थं वेदसम्मितम् ।
व्यासोक्तं श्रूयते येन कृत्वा ब्राह्मणमग्रतः ॥
स नरस्सर्वकामांश्च कीर्तिं प्राप्येह शौनक ।
गच्छेत्परमिकां सिद्धिमत्र मे नास्ति संशयः ॥
वासुदेवं स्मरन्विद्वान् पुण्डरीकायतेक्षणः (णम्) ।
भरताध्ययनात्पुण्यादपि पादमधीयता ॥

श्रद्धया परया भक्त्या श्राव्यते चापि येन तु ।
य इमां संहितां पुण्यां पुत्रमध्यापयच्छुकम् ॥

मातापितृसहस्राणि पुत्रदारशतानि च ।
संसारेष्वनुभूतानि यान्ति यास्यन्ति चापरे ॥

हर्षस्थानसहस्राणि भयस्थानशतानि च ।
दिवसे दिवसे मूढमाविशन्ति न पण्डितम् ॥

ऊर्ध्वबाहुर्विरौम्येष न च कश्चिच्छृणोति मे ।
धर्मश्चार्थश्च(श्च) कामश्च स किमर्थं न सेव्यते ॥

न जातु कामान्न भयान्न लोभात्
धर्मं त्यजेज्जीवितस्यापि हेतोः ।
नित्यो धर्मस्सुखदुःखे त्वनित्ये
जीवो नित्यो हेतुरस्य त्वनित्यः ॥

इमां भारतसावित्रीं प्रातरुत्थाय यः पठेत् ।
स भारतफलं प्राप्य परं ब्रह्माधिगच्छति ॥

यथा समुद्रो भगवान् यथा च हिमवान्गिरिः ।
ख्यातावुभौ रत्ननिधी तथा भारतमुच्यते ॥

इमं भारतमाख्यानं यः पठेत्सुसमाहितः ।
स गच्छेत्परमां सिद्धिमिह नास्ति हि संशयः ॥

द्वैपायनोष्ठपुटनिस्सृतमप्रमेयं
पुण्यं पवित्रमथ पापहरं शिवं च ।
यो भारतं समधिगच्छति वाच्यमानं
किं तस्य पुष्करजलैरभिषेचनेन ॥

पुराणवाचको भक्त्या पूजनीयः प्रयत्नतः ।
वस्त्रालङ्कारदानैश्च क्षेत्रदानेन सर्वदा ॥

अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥

Colophon:

इति श्रीमहाभारते शतसहस्रयां संहितायां वैयासिक्यां स्वर्गारोहपर्वसमाप्तिर्नाम पञ्चमोऽध्यायः ॥

पराभवाभिधानेऽब्दे मार्गशीर्षे सिते शुभे ।
स्वर्गारोहणपर्वापि वीरराघवजस्सुधीः ॥
गोविन्दनायकेन्द्राय व्यलिखद्धुल्लवंशजः ॥

No. **1954.** महाभारतम्.

MAHĀBHĀRATAM.

Substance, palm-leaf (Śrītāla). Size, 20½ × 2⅛ inches. Pages, 151. Lines, 11 on a page. Character, Nandināgarī. Condition, injured. Appearance, old.

Āśvamēdhikaparvan, Adhyāyas 2 to 115 (fol. 1*a.*)
Āśramavāsikaparvan, Adhyāyas 1 to 46 (fol. 56*a.*)
Mausalaparvan, Adhyāyas 1 to 9 (fol. 70*a.*)
Mahāprasthānikaparvan, 1 to 3 (fol. 74*a.*)
Svargārōhaṇaparvan, breaks off in the 5th Adhyāya (fol. 75*a.*)

No. **1955.** महाभारतम्.

MAHĀBHĀRATAM.

Substance, palm-leaf. Size, 19¾ × 1½ inches. Pages, 102. Lines, 8 on a page. Character, Telugu. Condition, injured. Appearance, old.

Āśramavāsaparvan, Mausalaparvan, Mahāprasthānaparvan and Svargārōhaṇaparvan; complete. Copying finished on the 1st of Śrāvaṇa-śukla in the year Pārthiva.

No. 1956. महाभारतम्.

MAHĀBHĀRATAM.

Substance, palm-leaf. Size, 16¾ × 1½ inches. Pages, 446. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Aśvamēdhaparvan, Adhyāyas 1 to 115 (fol. 1*a*.)

Mausalaparvan, Adhyāyas 1 to 9 (fol. 188*a*).
Mahāprasthānikaparvan, Adhyāyas 1 to 3 (fol. 205*a*).
Svargārōhaṇaparvan (fol 213*a*.), complete.

अब्दे दुर्मुखिसंज्ञेऽस्मिन् माधवे प्रतिपत्तिथौ ।
कृष्णपक्षे सोमवारे श्रीनिवासस्य प्रीतये ॥
पुरुषोत्तमदासेन लिखितश्चाश्वमेधिकम् ।
गोपालाचार्यविदुषे तन्मोदाय समर्पितम् ॥

No. 1957. महाभारतम्.

MAHĀBHĀRATAM.

Substance, palm-leaf. Size, 17½ × 1½ inches. Pages, 86. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old.

Adhyāyas 8 to 198 in the Udyōgaparvan, but many leaves and hence many Adhyāyas are lost in the MS.

No. 1958. महाभारतव्याख्या.

MAHĀBHĀRATAVYĀKHYĀ.

Substance, palm-leaf. Size, 18⅜ × 1½ inches. Pages, 242. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Ādiparvan, Adhyāyas 1 to 125.

The commentary is by Nīlakaṇṭha, son of Gōvindasūri, and is called Bhāratabhāvadīpa.

यं वक्तुं मुकुरा इवेन्द्रियमनोमायाः पराग्दश्यतां
निन्युस्तत्थविमादि(त्तदुपाधि) नापि च विराट्सूत्रेशभावं गतम् ।
तं प्रत्यग्दगदृश्यमक्षयमणुं त्यक्तोपनेत्रत्रयाः
श्रीगोपालमुपास्महे श्रुतिशिरोवल्लीरवैर्दर्शितम् ॥

बाह्य[ा]स्तेनाभिभाषी बहिरुदवासितं पाति तर्कोऽप्रतिष्ठो
मीमांसा प्रातिहार्यं भजति गुणगणं यस्य संख्याति सांख्यः ।
हृत्पीठे योगशुद्धे विलसदु(पनि)षद्वाहवृन्दैः परं मे
भाग्यं श्रीलक्ष्मणार्यो जगति विजयते यस्य वेशाश्शिवाद्याः ॥

हरिविध(धि)वाशि(सि)ष्ठशक्तिपराशरव्यासशुकदेवान् ।
वैशम्पायनमुग्रश्रवसं च नुमः पुराणगुरुमुख्यान् ॥

कणमु(भ)क्षमक्षचरणं जैमिनिकपिलौ पतञ्जलिं च नुमः ।
श्रीमद्व्यासवचोऽम्बुधिनयसी(शी)करवर्षिणो मुदिरान् ॥

सर्वे विद्येशतामाविश्चिकीर्षू पूर्वपूरुषौ ।
श्रीनारायणधीरेशरूपौ हरिहरौ नुमः ॥

बह्वन् समाहृत्य विभिन्नदेश्यान् कोशान्विनिश्चित्य च पाठमग्र्यम् ।
प्राचां गुरूणामनुसृत्य वाचम् आरभ्यते भारतभावदीपः ॥

टीकान्तराणीन्दुरविप्रभाणि बाह्यार्थरत्नानि च कासयन्तु ।
अन्तर्निगूढार्थचयप्रकाशे दीपः क्षमो भारतमन्दिरेऽस्मिन् ॥

ईशप्रसादादवितुं स्ववंश्यान् भगीरथेने(व) मया प्रणीता ।
एषा महाभारततीर्थगङ्गा लोकत्रयीचोद्यमलं धुनोतु ॥

इह खलु भगवान् पाराशर्यः परमकारुणिको मन्दमध्यममतीन् अनुगृहीतुं चतुर्दशविद्यास्थानरहस्यानेकत्र(पि)प्रथयिषुः महाभारताख्यमितिहासं प्रणेष्यन् प्रारिप्सितस्य ग्रन्थस्य निष्प्रत्यूहपरिपूरणाय प्रचयगमनाय च कृतं मङ्गलं शिष्यशिक्षायै श्लोकरूपेण निबध्नन् अर्थात्तत्र प्रेक्षवा-

प्रवृत्त्यङ्गमभिधेयादि दर्शयति नारायणमिति । नरोऽविद्यावच्छिन्नं चैतन्यं जीवः । तेन विषयीकृते अनवच्छिन्नचैतन्यरूपे ब्रह्मणि शुक्तौ रजतवत्कल्पितं चराचरम् ।

End:

अत एव नाभिरूपा प्रच्छन्नवेषा तेन हेतुना लक्ष्यालक्ष्या च । इष्टम् आप्तं तथारुन्धती . . . . सापि कल्याणी सर्वभूतेषु विश्रुता । तथैवमपि अपत्यहेतोः व्याकुले सति सालपितापि तथैव वर्तते । अतस्त्रीणामाप्तोऽति(पि)[स्ति]नास्तीत्याह न हीति । कार्यं भर्तृशुश्रूषा . . . . करोति ॥ २१ ॥

Colophon:

भावदीपे आदिपर्वणि चतुर्विंशोत्तरद्विशततमः ॥

युष्माकं मातुर्धर्मज्ञतां च वः मातुः युष्मत्सम्बन्धितया धर्मज्ञतां युष्मदीयपरम . . . विज्ञायेत्यर्थः (२) ब्रह्म तत् वेदान्तप्रसिद्धम् । (५) चरतं यत्र वाञ्छितमित्यनेनाप्रति[ग](ह)तगतित्वं द्वयोरपि दत्तं मयेत्यर्थः ॥

इति श्रीमत्पदवाक्य . . . . . दाधुरन्धरचतुर्धरवंशावतंसगोविन्दसूरिसूनोः नीलकण्ठस्य कृतौ भारतभावदीपे आदिपर्वणि खाण्डवदाहार्थप्रकाशे पञ्चविंशोत्तराद्विशततमः ॥

Dated: 12th of Phalguna Kṛṣṇapakṣa in Viśvāvasu. The copyist gives his name as Dulla Paṭṭābhirāma.

No. 1959. महाभारतव्याख्या.
MAHĀBHĀRATAVYĀKHYĀ.

Substance, paper. Size, 12⅛ × 8 inches. Pages, 271. Lines, 21 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other work herein is Mahābhāratasūci 144*a*.

Ādiparvan, with the commentary of Nīlakaṇṭha. Complete in 250 Adhyāyas.

No. 1960. महाभारतव्याख्या.

MAHĀBHĀRATAVYĀKHYĀ.

Substance, palm-leaf. Size, 17 × 1½ inches. Pages, 439. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Sabhāparvan, complete. Āraṇyaparvan, Adhyāyas 1 to 305. An index, in 3 pages, of the Āraṇyaparvan is added at the end

The commentary is by Nīlakaṇṭha.

Beginning:

बीजाङ्कुरद्रुमसमेश्वरसूत्रविश्वान्
मोक्षाय चिन्तयत यूयमभेदबुद्ध्या ।
दारयाय बीजशतगर्भफलाभमेकं
गोपालमेव कलयाम जगन्निदानम् ॥
जीवे भुजिः स्वर(स)सृष्टवपुर्युजेव
यत्रेशता पराधिया निजमायया वा ।
सृष्टैरुपाधिभिरसङ्कचितावपीष्ट(ा)
तस्मिन्ममास्तु रतिआ(रा)त्मनि लक्ष्मणार्ये ॥
प्रणम्य नारायणतीर्थ . . . .
. . . . |
प्राचां गुरूणां हृदयानुरूपं कुर्मरसभापर्वणि भावदीपम् ॥

तत्र पूर्वस्मिन् पर्वणि अन्ते शार्ङ्(र्ङ्गी)ङ्गाः ज्ञानबलादेव वह्निमुखाद्विमुक्ता इत्युक्तम् । तच्च ज्ञानं भगवद्भक्तिबलादेव इति प्रतिपादनायेदं सभापर्व आरभ्यते । तत्र भक्तावपि मत्युत्पादनार्थं भक्तिबलेनैव

पाण्डवानां दिव्यसभालाभाद्यैश्वर्यं, द्वेषेणापि भगवद्ध्यानं भगवत्सायुज्यप्रापकमिति शिशुपालनिर्णयेन ध्यानमाहात्म्यं, निरपराधिष्वपि पाण्डवेषु अभक्तानां दुर्योधनादीनां द्वेषोत्पत्त्या अभक्तदोषाः, द्यूते द्रौपदीत्राणेन भगवतो भक्तपक्षपातित्वं, समर्थानामपि पाण्डवानां सापराधेष्वपि दुर्योधनादिषु अप्रकोपेन भक्तानां तितिक्षा चेति भगवति गुणाश्च दर्शिताः ॥

* * * *

Colophon:

इति श्रीमहाभारते सभापर्वणि सभाख्याने प्रथमोऽध्यायः ॥

End:

न चचाल छलेन शत्रुवधं नाङ्गीकृतवान् ॥ २१ ॥
श्रीशियोक्तौ आशिष्यं प्रयुज्य मन्त्रार्थविचारार्थम् ॥

इत्यारण्यके भारतभावदीपे अरण्यपर्वार्थप्रकाशसमाप्तिर्नाम पञ्चाधिकत्रिशततमोऽध्यायः ॥

श्रीकृष्णश्शरणं ममेति परमो मन्त्रोऽयमष्टाक्षरः ॥

अतः परं विराट्पर्व भविष्यति । यस्यायमाद्यश्लोकः जनमेजयः—

कथं विराटनगरे मम पूर्वपितामहाः ।
अज्ञातवासमुषिता दुर्योधनभयार्दिताः ॥

आरण्यके पर्वणि अमी वृत्तान्ताः—

१. पौराभिगमनम् ।
२. पाण्डवप्रव्राजनम् ।
३. विदुरविवासनम् ।
४. शौनकवाक्यम् ।
५. आदित्यनामाष्टकशतम् ।
६. विदुरागमनम् ।
७. धृतराष्ट्रपरितापः ।
८. विदुरानयनम् ।
९. सुरभीन्द्रसंवादः ।
१०. मैत्रेयागमनं तच्छापकिर्मीरवधः ।
११. वृष्णिपाण्डवसमागमः ।

. . . .

मार्कण्डेयपुराणम् ।
मण्डूकोपाख्यानम् ।
आङ्गिरसम् ।
स्कन्दजननम् ।

द्रौपदीसत्यभामासंवादः । द्रौपदीप्रमादः ।
घोषयात्रा । गन्धर्वयुद्धम् । कोटिकाश्यम् ।
दुर्योधनप्रायोपवेशः । रामोपाख्यानम् ।
कर्णदिग्विजयः । धृतराष्ट्रयज्ञः । सावित्र्युपाख्यानम् ।
दूर्वासोपाख्यानम् । मृगस्वप्नदर्शनम् । कुण्डलाहरणम् ।
व्रीहिद्रौणिकम् । आरणेयम् ॥

इत्यारण्यके पर्वणि आख्यानानि समाप्तानि ॥

Dated: Wednesday the 14th of Āṣāḍha-Śuddha in Kīlaka. The copyist's name is Dulla Paṭṭābhirāma.

No. 1961. महाभारतव्याख्या.

MAHĀBHĀRATAVYĀKHYĀ.

Substance, palm-leaf. Size, 17½ × 1⅛ inches. Pages, 68. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other work herein is Gītārthaprakāśaḥ 35*a*.

Virāṭaparvan; complete.

The commentary is by Nīlakaṇṭha.

Beginning:

श्रीमद्गोपालमानम्य प्राचीनाचार्यवर्त्मना ।
विराट्प(टप)र्वप्रद्योती भावदीपो वितन्यते ॥

तत्र पूर्वस्मिन् पर्वणि ।

दिष्ट्या पञ्चसु रक्तोऽसि दिष्ट्या ते षट्पदी जिता ।
द्वे पूर्वे मध्यमे द्वे च द्वे चान्त्ये साम्परायिके ॥

इति । शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वा सन्नेवात्मानं पश्यतीति श्रुतिप्रसिद्धेष्वात्मदर्शनसाधनेषु शमादिषु रक्तः । षड्ढूर्मिलक्षण

षट्पदीम्—जातमात्रस्याशना(या)पिपासे, प्ररूढस्य शोकमोहौ, वृद्धस्य जरामृत्यू । इति.

End :

एवञ्च स्नुषात्वेन एनां वरयतो मे ब्रह्मचर्यशुद्धिरपि भविष्यतीत्याह शुद्ध इति । अपि शापात् भार्यार्थे प्रतिग्रहेऽनयोः प्रागेव सम्बन्ध आसीदिति कल्पयतो लोकस्य दुर्वाक्यभयात् अन्वशासत् आज्ञापितवान् । संयोगं विवाहसम्बन्धम् । प्रेषयामास । आह्वानार्थं दूतानिति शेषः । उपप्लव्यं विराटनगरसमीपस्थं नगरान्तरम् । सुरा नानाद्रव्यसाररूपं मद्यं मैरेयं वृक्षरसरूपं मद्यम् । अभ्यभवन् अभिभूताः ॥

Colophon :

इति श्रीमत्पदवाक्यप्रमाणमर्यादाधुरन्धरचतुर्धरवंशावतंसगोविन्दसूरिसूनोर्नीलकण्ठस्य कृतौ भारतभावदीपे विराटपर्वार्थप्रकाशः समाप्तिमगमत् ॥ [आत्मानमेव च प्रादादिति पूर्वेणान्वयः] ॥

इति विराटपर्व समाप्तः(म्) ॥

No. 1962. महाभारतव्याख्या.

MAHĀBHĀRATAVYĀKHYĀ.

Substance, palm-leaf. Size, 17 × 1½ inches. Pages, 222. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Karṇaparvan ; complete, fol. 1*a*. Ānuśāsanikaparvan ; Adhyāyas 1 to 78, fol. 24*a*. Bhīṣmaparvan, 91*a*.

The commentary is by Nīlakaṇṭha.

Beginning :

नरनारायणौ नत्वा प्राचीनाचार्यवर्त्मना ।
कर्णपर्वार्थविद्योतिभावदीपो वितन्यते ॥

ननु विराटादिपर्वचतुष्टयतात्पर्यं क्रमेणार्थलुब्ध्वा(ब्धा)नामर्थः सेवया, नि(नी)त्या, कपटपूर्वकेण कुलच्छ्द्मवधेन, नृशंसानृतपूर्वकेण महागुरुवधेन च सिध्यतीत्युक्तम्; तावतैवार्थनिरूपणं समाप्तम् । अतः परं काममोक्षावेव निरूपणीयाविति कर्णपर्वाणि(दि)त्रयं नारम्भणीयम् इति चेत्; सत्यं यथा धर्मार्थौ निरूपितौ एवं धर्माभासोऽर्थाभात्य(स)श्च निरूपणीयः परिहाराय । एवमधर्मानर्थौ अधर्माभासानर्थाभासौ च निरूपणीयो(यौ) हानावो(यो)पादानाय च । तदर्थमुत्तरग्रन्थः काममोक्षयोः प्रागावश्यकः । तत्र चोरेभ्यः कार्प(प)टिकमार्गमुपदिशतः सत्यवादिनस्सत्यवदने धर्माभासः । एवमविचार्य घ्राणचक्षुषं राक्षसं घ्नतो व्याधस्य हिंस्रत्वमधर्माभासः । तथा शोकहेतुना कुलक्षयेण प्राप्तोऽर्थोऽर्थाभासः । सुप्तानां हननमधर्मः । तत्कृतोऽश्वत्थाम्नोऽभिभवोऽनर्थः । शरणागतस्वसैनिकत्राणार्थमन्यायेनापि कृतो ब्रह्मवधो न इतर ब्रह्मवधवदन(र्थ) इत्यर्थः । अपि त्वनर्थाभास(ा)वा(पा)तेन ब्रह्महा भवेत् इत्या(दि) । तथापि वधे दोषाभावस्व(स्म)रणादित्येहा(षा)मर्थानां निरूपणार्थ उत्तरस्सन्दर्भः । आख्यायिका तु सुखप्रतिपत्त्यर्था । तस्मादिदमपि पर्वत्रयमावश्यकमेव ।

* * * *

Colophon :

इति नैलकण्ठीये भारतभावदीपे कर्णपर्वणि प्रथमोऽध्यायः ॥

* * * *

इति भीष्मपर्वणि षोडशोऽध्यायः ॥

यथा सः । मघाविषयगः सोमस्तद्दिनं प्रत्यपद्यतेति यथा पित्र्यं नक्षत्रं तस्य विषयो देशः पितृलोकः तद्गतस्सोमः कुरुपाण्डवयुद्धारम्भदिनमुक्तम् ।

End :

अभिमन्योः सत्त्ववन्तं बलवन्तम् अलातसदृशप्रभम् । भ्राम्यमाणे(णो)- [उ]ल्मुकसममण्डलाकारमित्यर्थः । पुत्रेण उत्तरेण । केसरी सिंहः । प्रगृही-

ताम्रहस्तेन मण्डलीकृतशुण्डाग्रेण । तस्य वेगमिति सम्बन्धः । रथे रथोपरि । तस्य शल्यस्य । बृहतः पुष्टान् । साधुवाहिनः सम्यग्वहनशीलान् । तम(सा)मोहं(हेन)प्रमुक्तम् हस्ताद्ग ळातमङ्कुशाकिदं यस्य । इतः पर्वान्तग्रन्थार्थो(र्थः) स्पष्टः । तस्मान्न कृतं व्याख्यानम् ॥

No. 1963. महाभारतव्याख्या.

MAHĀBHĀRATAVYĀKHYĀ.

Substance, palm-leaf. Size, 17½ × 1¼ inches. Pages, 514. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Śāntiparvan ; complete.

The commentary is by Ānandapūrṇamunīndra *alias* Vidyāsāgara, pupil of Abhayānandapūjyapāda.

Beginning :

यः श्वेतत्वमुपागतः कृतयुगे त्रेतायुगे रक्तताम्
युग्मे यः कपिलो (लः) कलौ च भगवान् कृष्णत्वमभ्यागतः ।
यं वेदान्तविदो वदन्ति मुनयो यो योगिभिर्ध्यीयते
स ब्रह्मा यदि वा हरो यदि हरिर्योऽसौ स तस्मै नमः ॥

. . . . रमुग्धस्मेरवक्त्रारविन्दा
मधुकरमृदुधीरप्रोल्लसत्सप्ततन्त्री ।
मधुपतिरिव बृन्दाराधितश्रीपदाब्जा
वदनकुहरबृन्दे नृत्यतां भारती नः ॥

राजधर्मद्वारा त्रिवर्गं श्रुत्वा तत्र गूढोक्तमपवर्गं विस्तरेण बुभुत्सुर्युधिष्ठिरः चोदयति भीष्मम् धर्माः पितामहेनेति । धर्मा अध्ययनाध्यापनयजनयाजनदानप्रतिग्रहयुद्धप्रजापालनदण्डप्रणयनकृषिगोरक्ष्यवाणिज्यद्विजशुश्रूषारूपाः । पितामहेन गौरवस्नेह . . . क्यसूचनाय पितामहे-

नेत्युक्तम् । राजनियोगात् वर्णधर्मप्रवृत्ति(:) राजधर्माश्रिता । शुभाः हितकराः । इदानीमाश्रमिणां ब्रह्मचर्यादीनां धर्मं श्रेष्ठं सर्वेषां साधारणमुत्कृष्टफलं च वक्तुमर्हसीत्यर्थः । मोक्षधर्मस्योत्तमत्वं वक्तुमितरधर्मस्य निकृष्टत्वमाह सर्वत्रेति ॥

* * * *

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यसागरमुनिविरचिते व्याख्यानरत्ने शान्तिपर्वणि मोक्षधर्मे प्रथमोऽध्यायः ॥

End:

उत्तराध्याये विरूढं दशरात्रस्यैकं पदं व्याख्यायते दशरात्रसम्बन्धित्वेन यथा विरूढमङ्कुरितं भवति तथायमाह दाकृतः भुक्त इत्यर्थः । इतः परं तत्र व्याख्येयानि पदानि व्याख्यायन्ते । क्षाम्य क्षमां कुरु अभिमुखाभिमुख्ययोग्य सौम्यानतिक्रम्यालङ्घनीय । तस्य चेति । तस्य नागस्य क्लेशकरणं पीडाकरं कार्यं रथोद्वहनं समाहितम् । तस्मै स्वस्त्यस्तु । स्वगुणैर्गभस्ति(भि)स्त्वं प्रकाशितश्शशाङ्करसंस्पर्शैश्शशाङ्ककिरणवत्सुखकरैरात्मन्यात्मप्रकाशिभिर्द्वयोरन्यरूपप्रकाशितैरनुपमैरित्यर्थः । एकचक्रं कालचक्रः शुके(क्ले)तामसित इति यस्य वारिधरोदधेः मेघ[घ]जलमधः(निधेः) पाद इव पादो देहभागश्शुक्ले प्रकाशात्मन्यादित्ये तामासितस्तमोयुक्त इव उपसवितुराच्छादकत्वात्तत आकृष्य वर्षासु प्रावृषीत्यर्थः । शुचिनादीत्येन प्रत्यादत्तं विसृजति प्रत्यादित्यप्रतीकाशः द्वितीयभास्कर इव प्रकाशमानः । अनिलसखो वह्निः स(सं)हिता वैदिकी अन्तरभिहुता मनसा जप्ता असन्निधिः कुसूलनिहितधान्यरहितः । उञ्छशिलाशनः क्षेत्रव्रीह्यादिषु स्वामिभिरपकृत्ये(त्ते)षु तत्र पतितां मञ्जरीमादाय तत्र निक्षिप्य पक्षिभिः भक्ष्यते । तत्र पतितधान्यपतितायाशनशीलः । अन्वर्थोपगतेस्सम्प्रेषणमाज्ञाकरणं नियोजनं प्रवर्तनं तैर्हेतुभिः स्मरणीयोऽस्मि । नातिरिक्ता

नाधिकाः परिगणितोञ्छशिलाशनः । पक्षान्तरे द्वात्रिंशत्रु(त्तु)गृहस्थानामिति पर(रि)चितमनतिक्रम्योञ्छशिलाशन आसीदित्यर्थः ।

Colophon:

इति द्व्यशीत्युत्तरशततमोऽध्यायः ॥

उदश्चदजपत्तनस्तपदमर्त्यकल्पोऽविनी-
तरागपरिपन्थिनीममृतबिन्दुनिष्यन्दिनीम् ।
अपारगुणगुम्भितामनिशम(कृत योऽ)स्य रीत्यो(विद्यो)दधे-
रुपासत विपश्चितं(तः)स्मरणभारतीचातुरीम् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यभयानन्दपादपूज्यपादशिष्येणानन्दपूर्णमुनीन्द्रेण विद्यासागरापरनामधेयेन विरचितायां व्याख्यानरत्नमाल्यां शान्तिपर्वणि मोक्षधर्म(टि)प्पणिका समाप्ता ॥

Dated: Tuesday the 9th of Kārtika-Śuddha in Parābhava. The copyist's name is Mukkamalla Nuñjirarāma.

No. 1964. महाभारतव्याख्या.

MAHĀBHĀRATAVYĀKHYĀ.

Substance, paper. Size, 15¾ × 8¼ inches. Pages, 481. Lines, 16 on a page. Character, Telugu. Condition, much injured. Appearance, old.

Śāntiparvan ; complete in 188 Adhyāyas.

The commentary is by Nīlakaṇṭha.

No. 1965. महाभारतव्याख्या.

MAHĀBHĀRATAVYĀKHYĀ.

Substance, palm-leaf. Size, 16½ × 1⅝ inches. Pages, 98. Lines, 6 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Āśvamēdhikaparvan ; complete.

The commentary is by Nīlakaṇṭha.

Beginning:

श्रीमद्गोपालमानम्य प्राचीनाचार्यवर्तिना ।
आश्वमेधिकभावार्थः श्रीकृष्णेन प्रकाश्यते ॥
अश्विस्तुत्यार्थयायाताष्टावक्रीयेषु सूत्रितम् ।
सनत्सुजाते विवृतं गीतायां विपुलीकृतम् ॥
मोक्षधर्मेषु च पुनर्नानाख्यानोपबृंहणैः ।
अतीव व्याकृतं प्रत्यगात्मतत्त्वमनाकुलम् ॥
यज्जिज्ञासोदयो(या)यैव जपदानादयः स्मृताः ।
आनुशासनिके सम्यक् चित्तदोषविनाशकाः ॥
यत्र प्रावण्यलाभाय वैराग्योदयसिद्धये ।
कुरुक्षयादिको . . . वृत्तान्त उपवर्णितः ॥
तदेव स्पष्टमात्रोपसंहृरव्यदेशतः ।
आत्मतत्त्वं विवृणुते मुनिराख्यानकैस्त्रिभिः ॥

आख्यानत्रयं च संवर्तमरुत्तीयम्, कृष्णधर्मसंवादः, कृष्णार्जुनसंवादश्च । तत्राद्यः काश्यां मृतस्य मुक्तिं लिङ्गेनैव सूचयित्वा ईश्वराराधनादिना धर्मेणैव धनं लब्ध्वा आत्मशुद्धये यष्टव्यमित्युक्तम् । द्वितीये शास्त्रार्थसूत्रणं तृतीये तद्विवरणं चेति । तत्रोर्ध्वम् उतङ्कीस्थावकन्याद्याख्यानैः सामोपयोगिगुरुशुश्रूषामहा[म]हिंस्रात्मकयज्ञनिन्दाद्वि(दि)च यथायथं तात्पर्यविषयतया ज्ञेयम् । तत्रायमाद्यः श्लोकः नारायणमिति ।

"आपो नारायणः (इति)प्रोक्ता आपो वै नरसूनवः ।
अयनं तस्य(ताः) प्रोक्तं तेन नारायणः स्मृतः ॥"

इति स्मृतेः, "आपः पुरुषवचसः" इति श्रुतेश्चाम्भःप्रधान(नं)भूतं(त)पञ्चकम् । भ(न)रेणान्तर्यामिणा सृष्टं नारम् । तत्सृष्ट्वा । तदेवानु (प्राविशत् । तदनु) प्रविश्य । (सच्च त्यच्चाभव) दिति श्रुतेः; स्रष्टा प्रवेष्टा च नारायण ईश्वरः । स एव प्रविश्योपाधिधर्मानभिमन्यमानो नरो जीवः

नाम्यामु(नरेषू)त्तमो नरोत्तमः । कार्यकारणोपाधिद्वयनिर्मुक्तः स चेष्टा च परमात्मा एतत्त्रयं तत्त्वरूपप्रकाशितम् । सरस्वतीं देवीं च प्रणम्य जयं महाभारताख्यमितिहासम् । सर्वं श्रुतिस्मृतिसारभूतमुदीरयेदिति तस्यार्थः । एतेन तत्त्वमस्यादिवाक्यं च ब्रह्माभेदोपथ(पाधि)प्रतिपाद्यो दर्शितः । वैशम्पायन उवाच । "कृतोदकन्तु राजानम्" इति ॥

End:

यदिष्टं वेदेन गृह्णन्ति नान्यथा ते परिपुष्टिकाः । पाठान्तरे परिपुष्टिका अपि त एव व्यासंख्यानास्तत्कालमात्रसङ्ग्रहः । अप्रक्षाला इति पाठे शेषहीनाः । चिन्तायज्ञं मानसयज्ञं सङ्कल्पमात्रेणैव देवान् ऋषींश्च तर्पयिष्यामीत्यर्थः । स्पर्शयज्ञमुपाहृ(त)द्रव्यत्वात् स्पर्शेनैव तास्तर्पयिष्यामि, एवं हृष्टियज्ञोऽपि ज्ञेयः । कलावित्यादि शेषकथाक्रोधजपस्योत्कर्षवर्णनार्थम् । पिठरं पात्रं धर्म आविश तृतत(?)पयः पीतवानित्यर्थः । रोषणे त्वमेव मिथ्यारोषस्य जितत्वात्त्वया ।

Colophon:

इति श्रीगोविन्दसूरिसूनोः नीलकण्ठस्य कृतौ भारतभावदीपे आश्वमेधिकपर्वार्थप्रकाशः समाप्तिमगमत् ॥

No. 1966. महाभारतव्याख्यानम्—लक्षाभरणम्.

MAHĀBHĀRATAVYĀKHYĀNAM: LAKṢĀBHARAṆAM.

Substance, palm-leaf. Size, 17 × $1\frac{3}{8}$ inches. Pages, 98. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Incomplete.

A commentary on certain difficult stanzas in the Mahābhārata which are called Vyāsaghaṭṭa commonly.

Beginning:

अथ सभापर्वणि श्लोकाः—

ऐक्यसंयोगसमवायविशारद इति। नानावाक्यैराग्नेयोऽष्टाकपालो भवति इत्यादिभिरेकं प्रधानं दर्शपूर्णमासादियागजन्यमपूर्वमुत्पाद्यते, संयोगोऽपि कर्मणामङ्गाङ्गीभावः, नानात्वं यागदानहोमानां भेदः, समवायस्सन्धिः प्रसिद्ध एव ।

पञ्चावयवयुक्तस्य वाक्यस्य गुणदोषवित् ।

वाक्यावयवान् पञ्चैव मोक्षधर्मे वक्ष्यति । सूक्ष्म[ा]संज्ञाक्रमनिर्णयप्रयोजनवन्त इत्यर्थः ॥

End:

एकमुक्तलक्षणं ब्रह्माणमनुत्साद्यापरित्याज्यावगम्य प्राज्ञः पण्डितो भवति न तु वेदपाठनात । नित्यदानमध्ययनं यज्ञश्चेत्येतत्सर्वं ब्रह्मावगमलोभाद्धेतोः प्रवर्तते विद्वत्सु[ः] ।

सत्याप्रच्यवमानानां सङ्कल्पो वितथो भवेत् ।
ततो यज्ञः प्रतायेत सत्येनैवावधारणात् ॥

निमित्तात्सत्यस्यैवावधारणायैव यज्ञः । प्रतायेत विस्तीर्येत, यज्ञः सत्यज्ञानार्थमेव यज्ञः क्रियते विद्वद्भिरित्यर्थः । विद्वान् बहुपठः ॥

No. 1967. महाभारतसूची.

MAHĀBHĀRATASŪCĪ.

Substance, paper. Size, $12\frac{1}{8} \times 8$ inches. Pages, 499. Lines, 18 on a page. Character, Telugu. Condition, good. Appearance, new.

This contains the index of the following Parvans :—

Adiparvan (144*a*), Sabhāparvan (216*a*), Āraṇyaparvan (232*a*,) Udyōgaparvan (311*a*), Drōṇaparvan (350*a*).

Beginning:

अस्मिन् प्रथमाध्यायप्रारम्भे श्रीविष्णुध्यानम्, भारतस्य पङ्कजत्वेन निरूपणम्, एतच्छ्रवणे शतगोदानफलमिति, एतत्पठने सर्वतीर्थावगाहनफलमिति भारतस्तुतिः, व्यासस्तवः, एतद्ग्रन्थारम्भे नारायणादिवन्दनपूर्वकं ग्रन्थप्रवचनम्, पौराणिकस्योग्रश्रवसः नैमिशारण्ये शौनकमुनेस्सत्रस्थितमहर्षीन् प्रत्यागमनकथनम्, भारतकथाप्रवचने सूतवरणकथनम्। सूतः मुनीनभिवाद्य तदनुज्ञया उपविष्टवान् इति कथनम्, कुतो भवदागमनमिति ऋषिप्रश्नः, जनमेजयसर्पयागे वैशम्पायनकथितभारतकथाः श्रुत्वा तीर्थानि परिक्रम्य समन्तपञ्चकं गत्वा भवत्समीपमागतोऽस्मीति सूतोत्तरम्॥

* * * *

Colophon:

इति आदिपर्वसूचिका॥

End:

सः कः ममाचक्ष्वेत्यर्जुनप्रश्नः, हे पार्थ प्रजापतीनां प्रथमं शङ्करं दृष्टवानसि। तं शरणं गच्छ स्तुत्वा नमस्कुरुष्वेति महादेवकृतत्रिपुरसंहारादिकं चतुर्मुखप्रमुखलेखकृतमहेश्वरस्तुतिं च तत्फलं च सर्वमुपदिश्य शतरुद्रीयपठनात् त्र्यम्बके प्रसन्ने सति वरान् कामान् लभते। ते गोप्ता जनार्दनः तव पराजयो नास्तीत्यर्जुनमुक्त्वा पराशरसुतो यथागतं जगाम। सञ्जयः धृतराष्ट्रस्य सर्वमेतदाख्याय कर्णवैशसं द्रष्टुं शिबिराय पुनः प्रयात इति कथनम्॥

इति द्रोणपर्वसूचिका सम्पूर्णा॥

No. 1968. हरिवंशम्.
HARIVAMŚAM.

Substance, palm-leaf. Size, $18\frac{1}{2} \times 1\frac{5}{8}$ inches. Pages, 486. Lines, 9 on a page. Character, Telugu. Condition, good. Appearance, old.

Breaks off in the 178th Adhyāya.

This is a supplement to the Mahābhārata, and deals with the story of Kṛṣṇa and his descendants.

Beginning:

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥
विघ्नध्वान्तनिवारणैकतरणिर्विघ्नाटवीहव्यवाट्
विघ्नव्याळकुलेन्द्रमत्तगरुडो विघ्नेभपञ्चाननः ।
विघ्नोत्तुङ्गगिरिप्रभेदनपविः विघ्नाब्धिकुम्भोद्भवः
विघ्नाभ्रौघघनप्रचण्डपवनः विघ्नेश्वरः पातु माम् ॥
इन्दिराकुचपाटीरपङ्कसङ्कलितोदरः ।
दद्यादमन्दमानन्दमचिरान्नो नृकेसरी ॥
कृष्णः करोतु कल्याणं कंसकुञ्जरकेसरी ।
काळिन्दीजलकल्लोलकोलाहलकुतूहली ॥
चक्रं यस्य भुजे गभस्तिललितं विद्युत्प्रभं राजि(ज)ते
शम्भो यस्य विराजि(ज)ते करतले सम्पूर्णचन्द्रप्रभः ।
माला यस्य सचम्पका सतिलका साशोकनीलोत्पला
सो नः पातु षडर्धविक्रमगतिस्त्रैलोक्यनाथो हरिः ॥
यो विद्याद्वैरशेषैर्मनसि विनिह(हि)तैः क्लेशसंज्ञैस्त्रिदोषैः
अस्पृश्यो निर्गुणत्वात् परमगुरुरयं कर्मभिस्तत्फलैर्वा ।
सर्वज्ञत्वादियुक्तो निरतिशयसुखप्राप्तिहेतुर्यतीनां
सोऽनादिर्वासुदेवश्शमयतु दुरितं सर्वजन्मार्जितं वः ॥
नमस्ते पुण्डरीकाक्ष नमस्ते विश्वभावन ।
नमस्तेऽस्तु हृषीकेश नमः पुरुषपूर्वज ॥
आद्यं पुरुषमीशानं पुरुहूतं पुरुष्टुतम् ।

* * * *

नमस्कृत्य हृषीकेशं चराचरगुरुं हरिम् ।
नैमिशारण्यकुलपतिः शौनको नाम विश्रुतः ॥
पप्रच्छ सूतं धर्मात्मा सर्वशास्त्रविशारदम् ।

श्रीशौनकः—

सौते सुमहदाख्यानं भवता परिकीर्तितम् ।
भारतानाञ्च सर्वेषां पार्थिवानां तथैव च ॥
देवानां दानवानाञ्च गन्धर्वोरगरक्षसाम् ।

* * * *

विचित्रांश्च कथायोगान् जन्म चाग्र्यमनुत्तमम् ।
कथितं भवता पुण्यं पुराणं सूक्ष्मया गिरा ॥
मनःकर्णसुखं तन्मां प्रीणात्यमृतसंमितम् ।
तत्र जन्म कुरूणाञ्च त्वयोक्तं रोमहर्षणम् ॥
न तु वृष्ण्यन्धकानाञ्च तद्भवान् प्रब्रवीतु मे ।

सूतः—

जनमेजयेन सत्पृ(स्पृ)ष्टः शिष्यो व्यासस्य धर्मवित् ।
धर्मवत्कथयामास कुलं तेषां सविस्तरम् ॥
तत्तेऽहं सम्प्रवक्ष्यामि वृष्णीनां वंशमादितः ।

* * * *

Colophon:

इति श्रीमहाभारते हरिवंशे माथुरे प्रथमोऽध्यायः ॥

* * * *

इति श्रीहरिवंशे बाणासुरचरिते सप्तसप्तत्युत्तरशततमोऽध्यायः ॥

End:

एवंविधानि रूपाणि निमित्तानि निशामयन् ।
बाणो बलमदोन्मत्तो विस्मयं नाधिगच्छति ॥
विचेतास्त्वभवत्प्राज्ञः कुम्भाण्डस्तत्त्वदार्शिवान् ।
बाणस्य सचिवस्तत्र कीर्तयन् बहु किल्बिषम् ॥
उ . . . .

No. 1969. हरिवंशम्.

HARIVAMŚAM.

Substance, palm-leaf. Size, 15½ × 1⅝ inches. Pages, 265. Lines, 8 on a page. Character, Telugu. Condition, much injured. Appearance, old.

Adhyāyas 1 to 57.

No. 1970. हरिवंशम्.

HARIVAMŚAM.

Substance, palm-leaf. Size, 19 × 1½ inches. Pages, 439. Lines, 9 on a page. Character, Telugu. Condition, good. Appearance, old.

Adhyāyas 124 to 332.

Beginning :

वैशम्पायनः—

ततः काले व्यतीते तु रुक्मी महति वीर्यवान् ।
दुहितुः कारयामास स्वयंवरमरिन्दमः ॥
तत्राहूताश्च राजानो राजपुत्राश्च रुक्मिणा ।
समाजग्मुर्महावीर्या नानादिग्भ्यश्श्रियान्विताः ॥
तत्राजगाम प्रद्युम्नः कुमारैरपरैर्वृतः ।
सहितं चकमे कन्यासहितां शुभलोचनाम् ॥
शुभाङ्गी नाम वैदर्भी कान्तिद्युतिसमन्विता ।
पृथिव्यामभवत्ख्याता रुक्मिणस्तनया तथा ॥
उपविष्टेषु सर्वेषु पार्थिवेषु महात्मसु ।
वैदर्भी वरयामास प्रद्युम्नमारिमर्दनम ॥
स हि सर्वास्त्रकुशलस्सिंहसंहननो युगा(वा) ।
रूपेणाप्रतिमो लोके केशवस्यात्मजोऽभवत् ॥

* * * *

Colophon :

इति श्रीहरिवंशे रुक्मिवधो नाम चतुर्विंशत्युत्तरशततमोऽध्यायः ॥

End :

द्वैपायनोष्ठपुटनिस्सृतमप्रमेयं पुण्यं पवित्रमथ पापहरं शिवश्च ।
यो भारतं समधिगच्छति वाच्यमानं किं तस्य पुष्करजलैरभिषेचनेन ॥
यो गोशतं कनकशृङ्गखुरं ददाति विप्राय वेदविदुषे विनयान्विताय ।
पुण्याश्च भारतकथां य इमां शृणोति तुल्यं फलं भवति तस्य च तस्य चैव ॥

इत्युक्त्वा विररामैव व्यासशिष्यो महातपाः ।
जनमेजयस्तु राजर्षिर्विष्णोर्वंशमनुत्तमम् ॥
श्रुत्वा शशास च नृपो राज्यं नि हि(ह)तकण्टकम् ।

Colophon :

इति श्रीहरिवंशे द्वात्रिंशदुत्तरत्रिशततमोऽध्यायः ॥

No. **1971.** हरिवंशम्.
HARIVAṀŚAM.

Substance, paper. Size, $11\frac{3}{4} \times 7\frac{3}{4}$ inches. Pages, 832. Lines, 20, on a page. Character, Telugu. Condition, good. Appearance, new.

Adhyāyas 1 to 142.

Beginning :

नमस्ते पुण्डरीकाक्ष नमस्ते विश्वभावन ।
नमस्तेऽस्तु हृषीकेश महापुरुष पूर्वज ॥

श्रीशौनकः—

सौते सुमहदाख्यानं भवता परिकीर्तितम् ।
भारतानाश्च सर्वेषां पार्थिवानां तथैव च ॥

* * * *

तत्र जन्म कुरूणां वै त्वयोक्तं रौमहर्षणे ।
न तु वृष्ण्यन्धकानां वै तन्मे प्रब्रूहि पृच्छतः ॥

* * * *

Colophon:

इति श्रीमहाभारते खिले हरिवंशे संहितायामादिसर्गो नाम प्रथमोऽध्यायः ॥

End:

यथैवेन्द्रवतां यातः स्वयमिच्छन् जनार्दनः ।
तथैव भ्रातुरिन्द्रस्य सम्मानं कर्तुमर्हति ॥
ज्येष्ठे(ष्ठ) मेवे(ते)न देवेन नारब्धं किं पुरा मुने ।
अथेदानीमापिछेत्त्य(पीच्छेत्स) ज्येष्ठन्तु मधुसूदनः ॥
सुनिश्चितं वलरिपुमीक्ष्य नारदो विसर्जितस्त्रिदशवरेण धर्मवित् ।
ययौ पुरीं यदुवृषभाभिरक्षितां कुशस्थलीं धृतिमतिमान् तपोधनः ॥

Colophon:

इति श्रीहरिवंशे पारिजातापहरणे द्विचत्वारिंशच्छततमोऽध्यायः ॥

No. 1972. हरिवंशम्.
HARIVAMŚAM.

Substance, paper. Size, $11\frac{3}{4} \times 7\frac{3}{4}$ inches. Pages, 787. Lines, 25 on a page. Character, Telugu. Condition, good. Appearance, old.

Adhyāyas 143 to 334. This seems to be the continuation of the MS. described under the last number.

Beginning:

वैशम्पायनः—
अथेत्य द्वारकां रम्यां नारदो मुनिसत्तमः ।
ददर्श पुरुषश्रेष्ठं नारायणमरिन्दमम् ॥

सुवेश्मनि समासीनं सहितं सत्यभामया ।
विराजमानं वपुषा सर्वतेजोऽतिगामिना ॥
तमेवार्थं महात्मानं चिन्तयन्तं दृढव्रतम् ।
केवलं योजयन्तश्च वाक्यमात्रेण भामिनीम् ॥
दृष्ट्वैव नारदं देवः प्रत्युत्थाय ह्यधोक्षजः ।
पूजयामास च तथा विधिदृष्टेन कर्मणा ॥

*　　*　　*　　*

Colophon:

इति श्रीहरिवंशे पारिजातापहरणे त्रिचत्वारिंशच्छततमोऽध्यायः ॥

End:

इत्युक्ता(क्त्वा) विररामैवं व्यासशिष्यो महातपाः ।
जनमेजयस्तु राजर्षिः विष्णुभक्तिं समुद्वहन् ॥
शशास च नृपो राजा राज्यं निहतकण्टकम् ।

Colophon:

इति श्रीहरिवंशे श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम् आश्चर्यपर्वणि खिलेषु श्रीपारणीये पारणविधिर्नाम चतुस्त्रिंशाधिकत्रिशततमोऽध्यायः ॥

Dated;—1832, March 28.

देवरकोण्ड वीरेश्वरशास्त्रिणा लिखितम् वारणासि रामस्वामिशास्त्रिणा च-

---

No. 1973. हरिवंशम्.

HARIVAṀŚAM.

Substance, palm-leaf. Size, $16\frac{1}{8} \times 1\frac{1}{2}$ inches. Pages, 552. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Adhyāyas, 1 to 123.

पराभवनामसंवत्सरे माघशुद्धदशम्यां द्वितीययामे राजश्रीगोविन्दनायकवर्याय मुक्कमुलसुन्दरामेण लिखितं संपूर्णम् ।

No. 1974. इतिहाससमुच्चयः.

ITIHĀSASAMUCCAYAḤ.

Substance, palm-leaf. Size, 14⅜ × 1⅛ inches. Pages, 228. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

Complete in 33 Adhyāyas.

This is a compilation from the Mahābhārata of certain interesting moral stories to be found therein.

Beginning:

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥

* * * *

पाराशर्यवचस्सरोजममलं गीतार्थगन्धोत्कटं
नानाख्यानककेसरं हरिकथासंबोधनाबोधितम् ।
लोके सज्जनषट्पदैरहरहः पेपियमानं मुदा
भूयाद्भारतपङ्कजं कलिमलप्रध्वंसि नः श्रेयसे ॥

* * * *

कृष्णद्वैपायनं व्यासं विद्धि नारायणं प्रभुम् ।
को ह्यन्यः पुण्डरीकाक्षान्महाभारतकृद्भवेत् ॥

End:

अजममरममेयं यो(ध्ये)यमाद्यन्तशून्यं सगुणमगुणमाद्यं स्थूलमत्यन्तसूक्ष्मम् ।
निरुपममुपमानं सर्वलोकेश्वराणां तमहमुभयरूपं संप्रपन्नोऽस्मि विष्णोः ।

द्वात्रिंशदो(ताधु)नाख्यानैर्विचित्रैः पुण्यवर्धनैः ।
अकङ्कृतंस(तस्स)माप्तोऽयमितिहाससमुच्चयः ॥

Colophon :

इति श्रीतिहासमुच्चये पुण्डरीकाख्य(ख्यानं)न्ना(ना)म त्रयस्त्रिंशोऽध्यायः ॥
इतिहाससमुच्चयं संपूर्णम् ॥

No. **1975.** इतिहाससमुच्चयः.

ITIHĀSASAMUCCAYAḤ.

Substance, palm-leaf. Size, $17\frac{3}{8} \times 1\frac{1}{5}$ inches. Pages, 97. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, old.

Adhyāyas 1 to 12, 27, 26 and 32.

Same as the above.

No. **1976.** इतिहाससमुच्चयः.

ITIHĀSASAMUCCAYAḤ.

Substance, palm-leaf. Size, $17\frac{7}{8} \times 1\frac{1}{4}$ inches. Pages, 172. Lines, 8 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Breaks off in the 30th Adhyāya.

No. **1977.** इतिहाससमुच्चयः.

ITIHĀSASAMUCCAYAḤ

Substance, palm-leaf. Size, $14\frac{1}{2} \times 1\frac{1}{2}$ inches. Pages, 118. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 15*a* (The other work herein is Itihāsasamuccayaḥ fol. 1*a*, which consists of 28 pages and contains Adhyāyas 1 to 3).

Adhyāyas 1 to 20, complete.

No. **1978.** इतिहासोत्तमः,

ITIHĀSŌTTAMAḤ.

Substance, palm-leaf. Size, $14 \times 1\frac{1}{2}$ inches. Pages, 188. Lines, 9 on a page. Character, Telugu. Condition, injured. Appearance, old.

Complete in 34 Adhyāyas.

This is another compilation from the Mahābhārata similar to Itihāsasamuccaya.

Beginning :

प्रणिपत्य जगन्नाथं नारायणमनामयम् ।
इतिहासोत्तमं पुण्यं प्रवक्ष्यामि यथातथम् ॥
इतिहासोत्तमं . . . . यैर्निषेवितम् ।
यः पठेन्नियतो नित्यं सोऽपि पापैः प्रमुच्यते ॥
इतिहासोत्तमोऽयं वै नित्यं श्रद्धासमन्वितैः ।
श्रोतव्यः पण्डितैस्सम्यक् परत्र हितकाङ्क्षिभिः ॥
अष्टादशपुराणेषु श्रुश्रुषुर्विधिपूर्वकम् ।
यत्फलं जायत पुंसां तदस्य श्रवणाद्भवेत् ॥
धर्मार्थकाममोक्षाख्यं फलमाकाङ्क्षता सदा ।
नरेणादरणीयोऽयमितिहासोत्तमः परः ॥

End :

इतिहासोत्तमं (मः)पुण्यः सेव्यतां हितकाङ्क्षिणा ।

* * * *

Colophon :

इति इतिहासोत्त नुक्रमणिका नाम चतुस्त्रिंशति (त्त)मोऽध्यायः ॥

समाप्तश्चेतिहासोत्तमः ॥
इतिहासोत्तममिदमार्यज्ञानसिद्ध्यै पुराणं संपूर्णम् ॥

No. 1979. कुशलवोपाख्यानम्.
KUŚALAVŌPĀKHYĀNAM.

Pages, 67. Lines, 22 on a page.

Begins on fol. 147*a* of the MS. described under No. 855.

Adhyāyas 1 to 13, complete.

This is a portion of the Āśvamedhikaparvan of the Jaimini-bhārata and treats of the heroic deeds of Kuśa and Lava.

Beginning:

जनमेजयः—

चित्रमुक्तं महाभाग यद्रामकुशयोर्भृशम् ।
तद्वक्तुमर्हसि त्वञ्च श्रोतुं कौतूहलं हि मे ॥

जैमिनिः—

शृणु राजन् महाबाहो रामस्य चरितं महत् ।
विस्तरेण यथा सर्वं वदतस्तन्निशामय ॥
रामस्तु रावणं हत्वा कुम्भकर्णं महाबलम् ।
अतिकायातिगान् घोरान् मेघनादमुखान्रणे ॥
सीतामग्निमुखाच्छुद्धामादाय स्वपुरं ययौ ।
विभीषणेन वीरेण लक्ष्मणेन महात्मना ॥

End:

जैमिनिः—

युद्धञ्च पुत्रयोर्यद्वत्पुरा चक्रे तदा रघुः ।
तद्वत्पार्थस्य कर्णस्य युद्धं प्रावर्तताद्भुतम् ॥
पारिक्षिताय सकलं कथयामास जैमिनिः ।
तथा युष्मभ्यमाख्यातं मयान्ये मुनिपुङ्गवाः ॥
नाख्या(ख्य)तापातितं युद्धं वाल्मीकिः पितृपुत्रयोः ।
युगान्ते वर्तमाने त्वं द्वापरे तु भविष्यति ॥
इदमाख्यानकं रम्यं मे(ये)शृण्वन्ति नरोत्तमाः ।
ते पुत्रपौत्रैर्नन्दन्ते लभन्ते वैष्णवं पदम् ॥

Colophon:

इति श्रीजैमिनिभारते आश्वमेधिकपर्वणि कुशलवोपाख्याने त्रयो-दशोऽध्यायः ॥

No. 1980. कुशलवोपाख्यानम्.

KUŚALAVŌPĀKHYĀNAM.

Substance, palm-leaf. Size, 16⅞ × 1⅛ inches. Pages, 56. Lines, 7 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Mārutimairāvaṇacaritram 29*a*.

Complete in 12 Adhyāyas.

The copying of this MS. is said to have been begun on the 20th of Vaiśākha in Tāraṇa and completed on the 5th of Āni by Cōtlūr Tātayyaṅgar of Dūsi also known as Śaṭhakōpapuram, a village in the North Arcot district.

End:

इत्येवमुक्तो भगवान् तामादाय ययौ मुनिः ।
उत्थाय राघवश्श्रीमान् सानुजस्सहसैनिके (क): ॥
सपुत्रभार्यस्साश्वश्च अयोध्यां प्रविवेश ह ।
समाप्य च क्रतु(तो)श्शेषं समग्रं वरदक्षिणम् ॥
ब्राह्मणेभ्यो धनं दत्वा नित्यश्रीसहितस्तदा ।
दशवर्षसहस्राणि दशवर्षशतानि च ॥
रामो दाशरथिश्श्रीमान् राज्यमेव चकार सः ।
इदमाख्यानतत्पु(कं पु)ण्यं ये शृण्वन्ति नरोत्तमाः ॥
ते लभन्ते महाराज तद्विष्णोः परमं पदम् ।

Colophon:

इति श्रीजैमिनिभारते आश्रमवासपर्वणि कुशलवोपाख्याने द्वादशोऽध्यायः ॥

No. 1981. कुशलवोपाख्यानम्.

KUŚALAVŌPĀKHYĀNAM.

Substance, palm-leaf. Size, 14⅛ × 1⅛ inches. Pages, 76. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 105*a*. The other works herein are Nalōpākhyānam 1*a*, Hariścandrōpākhyānam 53*a*, Pādmapurāṇam 82*a*.

Complete in 12 Adhyāyas.

No. 1982. ज्ञानवासिष्ठम्.

JÑĀNAVĀSIṢṬHAM.

Substance, palm-leaf. Size, 17⅞ × 1½ inches. Pages, 99. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, new.

Adhyāyas 1 to 13, consisting of Vairāgya, Mumukṣutva and Utpatti Prakaraṇas. 14th is incomplete;

This is an epitome in 44 Sargas of the big Vāsiṣṭharāmāyaṇa. The name of the compiler is given as Kāśmīrapaṇḍita in the MS. described under No. 1983. It is also called Laghuyōgavāsiṣṭha.

Beginning:

ओं नमः प्रणवार्थाय शुद्धज्ञानैकमूर्तये ।
निर्मलाय प्रसन्नाय दक्षिणामूर्तये नमः ॥
दिवि भूमौ तथाकाशे वहिरन्तश्च मे विभुः ।
यो विभात्यवभासात्मा तस्मै सर्वात्मने नमः ॥
अहं बद्धो विमुक्तस्स्यामिति यस्यास्ति निश्चयः ।
नात्यन्तमज्ञो नो तज्ज्ञस्सोऽस्मिन् शास्त्रेऽधिकारवान् ॥
गुरुमासीनमेकान्ते वाल्मीकिं सर्वदर्शिनम् ।
पप्रच्छ प्रणतो भूत्वा भरद्वाजो मृदुस्वरम् ॥
भगवन् ज्ञातुमिच्छामि कथं संसारसङ्कटे ।
रामो व्यवहृतो ह्यस्मिन् कारुण्याद्ब्रूहि मे गुरो ॥
कस्मादिदं समुत्पन्नं कस्मिन् लयमुपैष्यति ।
एतन्मे संशयं छिन्द्धि यथावद्द्विजसत्तम ॥

वाल्मीकिरुवाच :—

साधु वत्स भरद्वाज योग्योऽसि कथयामि ते ।
श्रुतेन येन संमोहमलं दूरीकरिष्यसि ॥

* * * *

इति श्रीवाल्मीकीये वासिष्ठरामायणमोक्षोपाये उत्पत्तिप्रकरणे लवणोपाख्यानमिति सप्तभूमिकोपाख्यानं नाम त्रयोदशः सर्गः। इति वासिष्ठे रामायणे उत्पत्तिप्रकरणं समाप्तम् ॥

End:

भृत्योऽभिमतकर्तृत्वान्मन्त्री सर्वार्थकारणात् ।
सामन्तश्चेन्द्रियाक्रान्ते(:) गुरुर्विद्याप्रदानतः ॥
लालनात्स्निग्धललना पावनात्पावनः पिता ।
सुहृदुत्तमविश्वासान्मनो मन्ये मनीषिणाम् ॥
स्वालोकितश्शास्त्रदृशा स्वं बुध्या स्वानुभावितः ।
प्रयच्छति परां सिद्धिं त्यक्त्वात्मानं मनः पिता ॥
सुवृष्टसुदृढो.

No. 1983. ज्ञानवासिष्ठम्.

JÑĀNAVĀSIṢṬHAM.

Pages, 176. Lines, 13 on a page.

Begins on fol. 1*a* of the MS. described under No. 255.

Abridged by Kāśmīrapaṇḍita from the Vāsiṣṭharāmāyaṇa.

Same as the last.

End:

चिदम्बरात्प्रोदित एष पूर्णशास्त्रेन्दुरानन्दनिधिस्सुपादः ।
सान्द्रामृतः काव्यकृतोपशोभस्स्फुरत्प्रकाशक्षपितान्धकारः ॥
स्नातं तेन समस्ततीर्थसलिलैस्सर्वापि दत्तावनिः
यज्ञानाश्च समस्तामिष्टमनघं देवाश्च संपूजिताः ।

संसाराच्च समुद्धृतास्स्वपितरस्त्रैलोक्यपूज्योऽप्यसौ
यस्य ब्रह्मविचारणे क्षणमिह स्थैर्यं मनः प्राप्नुयात् ॥

Colophon:

इति काश्मीरपण्डितानन्दसमुद्धृते वाल्मीकीये मोक्षोपाये शतसहस्रिकायां संहितायां फलश्रुतिर्नाम चतुश्चत्वारिंशस्सर्गः ॥

इति वसिष्ठषट्सहस्रिका समाप्ता ॥

इति श्रीवाल्मीकिप्रोक्तायां शतसहस्रिकायां ज्ञानखण्डे वसिष्ठ-रामसंवादे मोक्षोपाये काश्मीरपाण्डितेनोद्धृतस्सारसमुच्चयस्समाप्तः ॥

No. 1984. ज्ञानवासिष्ठम्—सव्याख्यानम्.

JÑĀNAVĀSIṢṬHAM WITH COMMENTARY.

Substance, palm-leaf. Size, $18\frac{1}{8} \times 1\frac{1}{8}$ inches. Pages, 195. Lines, 12 on a page. Character, Grantha. Condition, injured. Appearance, old.

Prakaraṇas 1 to 4, complete.

This book is said to have belonged to a certain Ramaliṅga.

Beginning:

शुक्लाम्बरधरं . . . . शान्तये ।
यत्प्रसादात्रिगुणिनि पुरुषार्थस्वकर्मणि ।
निष्प्रत्यूहफलं प्राहुस्तं वन्दे गणनायकम् ॥
जगत्रयं यदुद्भूतं यस्मिंश्च स्थितिमश्नुते ।
अन्ते यस्मिन् लयं याति तत्कारणमुपास्महे ॥

* * * *

इह निखिलजगदेकबीजं भगवान् सच्चिदानन्दघनः पुरुषोत्तमः गुण-त्रयमयीं स्वीयां मायामनुविदधानः चतुर्मुखप्रमुखैः राजसैस्स्वमूर्तिभेदैः विचित्रितभौतिकप्रपञ्चं परिकल्प्य . . . . . . वाल्मीकिर्लोकानुग्रहाय

कान्तासम्मितेन काव्यप्रबन्धेन संजगृहे । वसिष्ठोपदेशप्रवृत्तत्वाच्च वासिष्ठमिदं मोक्षशास्त्रम् । अत्र च वैराग्यं मुमुक्षुत्वम् उत्पत्तिः स्थितिरुपशमः निर्वाणमिति षट्प्रकरणानि । तत्र चायं क्रमः—प्रथमं दोषदर्शनाद्विषयेषु वैराग्यं, ततो मुमुक्षा, ततश्च विरक्तस्य मुमुक्षोरधिकारिणः तत्त्वं जिज्ञासमानस्य जगदुत्पत्तिस्थित्युपशमैः तत्त्वज्ञानोपदेशः ; निष्पन्ने च तत्त्वज्ञाने निर्वाणमिति.

* * * *

यतस्सर्वाणि भूतानि प्रतिभान्ति स्थितानि च ।
यत्रैवोपशमं यान्ति तस्मै सत्यात्मने नमः ॥

* * * *

दिवीति—

दिवि भूमौ तथाकाशे बहिरन्तश्च मे विभुः ।
यो विभात्यवभासात्मा तस्मै सर्वात्मने नमः ॥

अत्र च "आत्मैव देवतास्सर्वास्स वा" इति श्रुतेः, "अकृत्रिममनाद्यन्तं वेदनं देव उच्यते" इति वक्ष्यमाणत्वाच्च आत्मैवेष्टा देवता तस्यैव अवभासात्मकत्वात्सर्वात्मकत्वाच्च ।

End :

हितं महासत्त्व तयाऽत्मतत्त्वं विचार्य बुद्ध्या भव वीतशोकः ।
तत्र क्रमेणैव ततो जनोऽयं मुक्तो भविष्यत्यथ शोक(हीन)ः ॥

* * * *

सैषा करोति भवसङ्गविमोचनानाम् ॥

Colophon :

इत्यार्षे श्रीमद्रामायणे श्रीवासिष्ठविवरणे देवहूतोक्ते शतसहस्रिकायां संहितायां स्थितिप्रकरणे . . . . नाम त्रिंश[ति]स्सर्गः ॥

स्थितिप्रकरणं समाप्तम् ॥
उपरि उपशमप्रकरणम् ॥

No. 1985. ज्ञानवासिष्ठम्—सव्याख्यानम्.

JÑĀNAVĀSIṢṬHAM WITH COMMENTARY.

Substance, palm-leaf. Size, 17 × 1½ inches. Pages, 300. Lines, 8 on a page. Character, Telugu. Condition, good. Appearance, new.

Sargas 10 to 33 ; 10th wants beginning.

Utpatti, Sthiti, and Upaśama Prakaraṇas complete. Nirvāṇa Prakaraṇa, incomplete.

Beginning :

वसिष्ठ(ः)स्वयमेव स्पष्टीकरिष्यति ।
अस्यामेको हि पुरुषस्सहस्रकरलोचनः ।
पर्याकुलमतिर्भीमस्संस्थिता वितताकृतिः ॥
स सहस्रेण बाहूनामादाय परिघान् बहून् ।
प्रहरत्यात्मनः पृष्ठे स्वात्मनैव पलायते ॥
दृढप्रहारैः प्रहरन् स्वयमेवात्मनात्मनि ।
प्रविद्रवति भीमात्मा स योजनशतान्यपि ॥
रुदन् प[ा]ल(ा)यमानोऽसौ गत्वा दूरमितस्ततः ।
श्रमवान् विवशाकारो विशीर्णचरणाङ्गकः ॥
पतितोऽवश एवाशु महत्यन्धोऽन्धकूपके ।
कृष्णरात्रितमोभीमनभोगम्भीरकोटरे ॥

* * * *

योऽयमहं तेषां द्रष्टा स विवेक एव हि यस्मात् कारणान्मया तान्यवबोध्यन्ते । अतो बोधहेतुरहं विवेक एवेत्यर्थः.

End :

धनानि प्रसिद्धानि । वाजिविभवोऽश्वसम्पत्तिः । तदादि, यद्राज्ञा(मै)श्वर्यं तं च, यदप्यष्टयोगादि तमणिमादिकम् । तच्च सिद्धैरष्टमहा-

सिद्धिमद्भिर्देवयोनिभेदैस्तुष्टैरर्पितमपि जर्जरतृणं मेनाते। अन्तरायधियेति भावः ॥

(मू.)

अथैकदा पुरश्रेष्ठे कस्मिं . . . .

No. **1986.** ज्ञानवासिष्ठसारसमुच्चयः.

JÑĀNAVĀSIṢṬHASĀRASAMUCCAYAḤ.

Substance, paper. Size, $8\frac{3}{8} \times 6\frac{3}{8}$ inches. Pages, 173. Lines, 23 on a page. Character, Telugu. Condition, good. Appearance, old.

Complete in 6 Prakaraṇas; with a Telugu commentary.

This is an epitome in 700 stanzas of the abridged Jñānavāsiṣṭha described under the last number; by Kṛṣṇayya, son of Ulacanāḍu Nṛsiṁha and younger brother of Vēnkaṭaramaṇayya, the author of the Telugu Ṭīkā accompanying the text.

The colophon in Sanskrit seems to be wrong towards the end.

Beginning:

गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः।
गुरुस्साक्षात्परं ब्रह्म तस्मै श्रीगुरवे नमः ॥

नमः श्रीज्ञानवासिष्ठकर्त्रे गोप्त्रे महात्मने।
वसिष्ठमुनये वस्तुसाक्षिणेऽस्तु सदा नमः ॥

नमस्तस्मै मुनीशाय श्रीयुताय तपस्विने।
सर्वज्ञानाधिवासाय तस्मै वाल्मीकये नमः ॥

* * * *

दिवि भूमौ तथाकाशे बहिरन्तश्च मे विभुः।
यो विभात्यवभासात्मा तस्मै सर्वात्मने नमः ॥

अहं बद्धो विमुक्तः स्यामिति यस्यास्ति निश्चयः।
नात्यन्ततदज्ञो नोऽतदज्ञो ह्यस्मिन् शास्त्रेऽधिकारवान् ॥

End :

स्नातं तेन समस्ततीर्थसलिलैस्सर्वापि दत्तावनिः
यज्ञश्चापि समस्तमिष्टमनघं देवाश्च संपूजिताः ।
संसाराच्च समुद्धृताः स्वपितरस्त्रैलोक्यपूज्योऽप्यसौ
यस्य ब्रह्मविचारणे क्षणमिह स्थैर्यं मनः प्राप्नुयात् ॥

Colophon :

इति श्रीमद्वाल्मीकीये वासिष्ठरामायणसप्तशत्यां निर्वाणप्रकरणं समाप्तम् ॥

इति श्रीमद्वाल्मीकीये वासिष्ठरामायणद्वात्रिंशत्सहस्रिकायां संहितायां श्रीमत्कृष्णगिरिपुरीनिवासनृसिंहाख्यद्विजवरेण्यतनयेन श्रीमत्शृ(च्छृ)ङ्गेरि-श्रीमन्नृसिंहभारतीस्वामिभिः कलियुगजनक इति दत्तनामधेयस्य वेङ्कटरमण-यार्यस्य अनुजेन कृष्णरायाभिधानेन उद्धृतश्रीमत्कास्मीरपण्डितरचित-व्याख्यासहितसारसमुच्चयसप्तशतिः संपूर्णा ॥

ఇది శ్రీసీతారామకృపారసఝురీపాత్రహరితసగోత్రపవిత్రకులచనాడువంశ - పయఃపయోధికైరవమిత్రసజ్జనవర్ణనీయచరిత్రనృసింహాఖ్యావిఖ్యాతభూసురవర్య - పుత్రుండును శ్రీమద్వాసిష్ఠరామాయణంబును సప్తశతిసంగ్రహించినకృష్ణయా - ఖ్యునకు అగ్రజుండును అగు వేంకటరమణయ్యచే రచింపంబడినశ్రీమద్వాల్మీకి-యంబగువాసిష్ఠరామాయణసప్తశత్యాంధ్రటీకముగిసెను.

ధాతునామసంవత్సర మాఘ బ 10 బుధవారంబున వ్రాసిముగిసెను.

No. 1987. नलोपाख्यानम्.

NALŌPĀKHYĀNAM.

Pages, 103. Lines, 8 on a page.

Begins on fol. 1*a* of the MS. described under No. 1981.

Complete.

This is the story of Nala as related in the Āraṇyaparvan of the Mahābhārata.

This work constitutes Adhyāyas 49 to 78, in the Āraṇyaparvan of the Mahābhārata.

Beginning:

नमो धर्माय महते नमः कृष्णाय वेधसे ।
ब्राह्मणेभ्यो नमस्कृत्य धर्मान्वक्ष्यामि शाश्वतान् ॥

अस्त्रहेतोर्गते पार्थे शक्रलोकं महात्मनि ।
युधिष्ठिरप्रभृतयः किमकुर्वत पाण्डवाः ॥

* * * *

न्यवसन् कृष्णया सार्धं काम्यके पुरुषर्षभ ।
ततः कदाचिदेकान्ते विविक्ते मृदुशाड्वले ॥

* * * *

नियोगात्ते महाभाग गतोऽसौ पुरुषर्षभ ।
अर्जुनः पाण्डुपुत्राणां मध्यमो नः परन्तप ॥
यस्मिन्विनष्टे पाञ्चालाः सहपुत्रैस्तथा वयम् ।
सात्यकिर्वासुदेवश्च(ते)विनिनीयु(न्यु)रसंशयम् ॥

End:

वैशम्पायन :—

श्रुतो हृष्टमना राजा बृहदश्व उवाच ह ।
भगवन्नक्षहृदयं ज्ञातुमिच्छामि तत्त्वतः ॥

ततोऽक्षहृदयं प्रादात् पाण्डवाय महात्मने ।
लब्ध्वाक्षहृदयं राजा विशोकस्समु(म)पद्यत ॥

कथामेतां तथाप्युक्त्वा नलस्य चरिताश्रिताम् ।
आमन्त्र्य पाण्डवान् सर्वान् बृहदश्वो जगाम ह ॥

बृहदश्वे गते पार्थमश्रौषीत्सव्यसाचिनम् ॥

वर्तमानं तपस्यन्ते वायुभक्षं मनीषिणम् ॥
ब्राह्मणेभ्यस्तपस्विभ्यः संपन्नेभ्यस्ततस्ततः ।

Colophon:

इति श्रीमहाभारते शतसहस्रिकायां नलोपाख्याने अष्टसप्ततितमोऽध्यायः ॥

नलोपाख्यानं समाप्तम् ॥

No. 1988. नलोपाख्यानम्.

NALŌPĀKHYĀNAM.

Substance, palm-leaf. Size, $14\frac{1}{2} \times 1\frac{1}{8}$ inches. Pages, 110. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

Adhyāyas 1 to 17.

Same as the above.

No. 1989. नलोपाख्यानम्.

NALŌPĀKHYĀNAM.

Pages, 108. Lines, 20 on a page.

Begins on fol. 544*a* of the MS. described under No. 1800.

Same as the last.

This MS. does not contain the first Adhyāya to be found in the MS. described under No. 1987.

No. 1990. नलोपाख्यानम्.

NALŌPĀKHYĀNAM.

Substance, palm-leaf. Size, $17\frac{3}{4} \times 1\frac{1}{4}$ inches. Pages, 175. Lines, 4 on a page. Character, Grantha. Condition, injured. Appearance, old.

Adhyāyas 53 to 78 in the Āraṇyaparvan; 53rd Adhyāya wants beginning

No. 1991. नाचिकेतोपाख्यानम्.

NĀCIKĒTŌPĀKHYĀNAM.

Substance, palm-leaf. Size, 13½ × 1¼ inches. Pages, 84. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, new.

Adhyāyas 1 to 16, complete.

Dated the 5th of Vaiśākha-Bahula in the year Raktākṣi. The scribe's name is Rāmabhaṭṭu.

This gives the story of Nācikēta.

Beginning:

जनमेजयः—

प्ृच्छामि त्वां महाभाग सर्वशास्त्रविशारद ।
व्यासशिष्य महाभाग सर्ववेदविदां वर ॥
कथयस्व कथां दिव्यां सर्वपापप्रणाशिनीम् ।
ऋषयश्च महाभाग सर्वे वै तपसि स्थिताः ॥
तस्य तद्वचनं श्रुत्वा राजराजस्य धीमतः ।
तपसा भावितात्मा च प्रोवाचेदं महामुने ॥

End:

प्रभासपुष्करश्चैव अमरेश्वरमेव च ।
अमरत्वन्तु यास्यन्ति मानवा धर्मकाङ्क्षिणः ॥
वैकुण्ठश्चैव यास्यन्ति माधवश्च तथैव च ।
अमरत्वन्तु यास्यन्ति ततो विष्णुपदं व्रजेत् ।
इत्येतत्सर्वमाख्यातुं(तं) नारदस्य यमेन तु ॥

Colophon:

इति नाचिकेतोपाख्याने षोडशोऽध्यायः ॥

No. 1992. भगवद्गीता.

BHAGAVADGĪTĀ.

Substance, paper. Size, 5¾ × 3¾ inches. Pages, 70. Lines, 7 on a page. Character, Dēvanāgarī. Condition, fair. Appearance, old.

Complete.

The first leaf is lost. This copy gives the Ṛṣicchandōdēvatā and the Aṅganyāśa and Karanyāsa.

Beginning:

इति करतलकरपृष्ठाभ्यां नमः, नैनं छिन्दन्ति शस्त्राणि इति हृदयाय नमः, न चैनं क्लेदयन्त्याप इति शिरसे स्वाहा ।

* * * *

धृतराष्ट्र उवाच—

धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः ।
मामकाः पाण्डवाश्चैव किमकुर्वत सञ्जय ॥

सञ्जय उवाच—

दृष्ट्वा तु पाण्डवानीकं व्यूढं दुर्योधनस्तदा ।
आचार्यमुपसंगम्य राजा वचनमब्रवीत् ॥

पश्यैतां पाण्डुपुत्राणामाचार्य महतीश्चमून् ।
व्यूढां द्रुपदपुत्रेण तव शिष्येण धीमता ॥

अत्र शूरा महेष्वासा भीमार्जुनसमा युधि ।
युयुधानो विराटश्च द्रुपदश्च महारथः ॥

End:

राजन् संस्मृत्य संस्मृत्य संवादमिममद्भुतम् ।
केशवार्जुनयो(ः) पुण्यं हृष्यामि च मुहुर्मुहुः ॥

तच्च संस्मृत्य संस्मृत्य रूपमत्यद्भुतं हरेः ।
विस्मयो मे महाराज[न्] हृष्यामि च पुनः पुनः ॥

यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः ।
तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥

Colophon:

इति श्रीभगद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुन-संवादे संन्यासयोगो नामाष्टादशोऽध्यायः ॥

No. 1993. भगवद्गीता.

BHAGAVADGĪTĀ.

Substance, palm-leaf. Size, 14¼ × 1½ inches. Pages, 162. Lines, 4 on a page. Character, Kanarese. Condition, fair. Appearance, old.

Complete.

No. 1994. भगवद्गीता.

BHAGAVADGĪTĀ.

Substance, palm-leaf (Śrītāla). Size, 14⅝ × 1¾ inches. Pages, 49. Lines, 9 on a page. Character, Telugu. Condition, good Appearance, old.

Complete; with Ṛṣi, Chandas and Dēvatā given at the beginning.

No. 1995. भगवद्गीता.

BHAGAVADGĪTĀ.

Substance, palm-leaf. Size, 6½ × 1⅜ inches. Pages, 152. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, old.

Complete; with Aṅganyāsa and Karanyāsa given at the beginning.

No. 1996. भगवद्गीता.

BHAGAVADGĪTĀ.

Substance, palm-leaf. Size, 10 × 1¼ inches. Pages, 122. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old

Complete; with Ṛsi, Chandas and Dēvatā.

No. 1997. भगवद्गीता.

BHAGAVADGĪTĀ.

Substance, palm-leaf (Śrītāla). Size, 9¾ × 2¼ inches. Pages, 96. Lines, 10 on a page. Character, Nandināgarī. Condition, good. Appearance, old.

Complete; with Ṛsicchandōdēvatā and Māhātmya given at the beginning.

No. 1998. भगवद्गीता.

BHAGAVADGĪTĀ.

Substance, palm-leaf. Size, 13⅛ × 1¼ inches. Pages, 88. Lines, 6 on a page. Character, Kanarese. Condition, fair. Appearance, old.

Adhyāyas 1 to 16.

No. 1999. भगवद्गीता.

BHAGAVADGĪTĀ.

Substance, palm-leaf. Size, 11½ × 1 inches. Pages, 147. Lines, 3 on a page. Character, Grantha and Telugu. Condition, fair. Appearance, old.

Complete.

No. 2000. भगवद्गीता.

BHAGAVADGĪTĀ.

Substance, palm-leaf. Size, $10\frac{5}{8} \times 1\frac{1}{4}$ inches. Pages, 83. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, old.

Incomplete ; with Ṛṣicchandōdēvatā ; the 1st and 2nd Adhyāyas are wanting. The first five leaves are lost.

No. 2001. भगवद्गीता.

BHAGAVADGĪTĀ.

Substance, palm-leaf. Size, $13\frac{1}{8} \times 1\frac{1}{4}$ inches. Pages, 91. Lines, 5 on a page. Character, Nandināgarī. Condition, slightly injured. Appearance, old.

Complete ; with Ṛṣicchandōdēvatā given at the beginning.

No. 2002. भगवद्गीता.

BHAGAVADGĪTĀ.

Substance, palm-leaf. Size, $12\frac{1}{4} \times 1\frac{1}{8}$ inches. Pages, 89. Lines, 3 on a page. Character, Kanarese. Condition, fair. Appearance, new.

Adhyāyas 1 to 15.

No. 2003. भगवद्गीता.

BHAGAVADGĪTĀ.

Substance, palm-leaf. Size, $11\frac{3}{4} \times 1\frac{1}{4}$ inches. Pages, 48. Lines, 5 on a page. Character, Nandināgarī. Condition, injured. Appearance, old.

Substance, palm-leaf. Size, 18⅞ × 1⅝ inches. Pages, 186. Lines, 8 on a page. Character, Telugu Condition, good. Appearance, old.

Begins on fol. 13*a*. The other works herein are Aṣṭaślōkīvyākhyā 1*a*, Śrīguṇaratnakōśaḥ 107*a*, Śrīraṅgarājastavaḥ 112*a*, Sudarśanaśatakam 121*a*, Ālavandārstōtram 127*a*.

Complete.

No. 2080. भगवद्गीताभाष्यम्.

BHAGAVADGĪTĀBHĀṢYAM.

Substance, paper. Size, 9¾ × 4½ inches. Pages, 92. Lines, 15 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Complete.

A commentary on the Bhagavadgītā by Ānandatīrtha.

Copying completed on Sunday, the 12th of Āśvayuja-Śukla in the year Pārthiva.

Beginning:

देवं नारायणं नत्वा सर्वदोषविवर्जितम् ।
परिपूर्ण गुरूंश्चान्गी (रून् स्वान्गी)तार्थं वक्ष्यामि लेशतः ॥

नष्टधर्मज्ञानलोककृपालुभिः ब्रह्मरुद्रेन्द्रादिभिरर्थितो ज्ञानप्रदर्शनाय भगवान्व्यासोऽवततार । ततश्चेष्टानिष्टप्राप्तिपरिहारसाधनादर्शनाद्वेदार्था-

ज्ञानाच्च संसारे क्लिश्यमानानां वेदानधिकारिणां स्त्रीशूद्रादीनां च धर्मज्ञान-द्वारा मोक्षो भवेदिति कृपालुः सर्ववेदाद्यर्थोपबृंहितां तदनुक्तकेवलेश्वरज्ञान दादृष्टार्थयुक्तां च सर्वप्राणिनामवगाह्यानवगाह्यरूपां केवलभगवत्स्वरूपपरां परोक्षार्थां श्रीमहाभारतसंहितामचीक्लृपत् ।

End :

यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयत इति चोक्तम् ।
पूर्णादोषमहाविष्णो गीतामाश्रित्य लेशतः ।
निरूपणं कृतं तेन प्रीयतां मे सदा विभुः ॥

Colophon :

इति श्रीमदानन्दतीर्थभगवत्पादविरचिते श्रीमद्भगवद्गीताभाष्ये अष्टादशोध्यायः ॥

इदं पुस्तकम् अग्निहोत्रिगोपालकृष्णेन लिखितम् ॥

No. **2081.** भगवद्गीताव्याख्या—गीतार्थप्रकाशः.

BHAGAVADGĪTĀVYĀKHYĀ GĪTĀRTHAPRAKĀŚAḤ.

Pages, 297. Lines 6, on a page.

Begins on fol. 35*a* of the MS. described under No. 1961.

This is a commentary on the Bhagavadgītā by Nīlakaṇṭha, who has also commented on the whole of the Mahābhārata.

Dated: Tuesday the 5th of Kārtika-Śuddha in Durmati.

Beginning :

प्रणम्य भगवत्पादान् श्रीधरादींश्च सद्गुरून् ।
सम्प्रदायानुसारेण गीताव्याख्यां समारभे ॥ १ ॥
भारते सर्ववेदार्थो भारतार्थश्च कृत्स्नशः ।
गीतायामास्ति तेनेयं सर्वशास्त्रमयी मता ॥ २ ॥

कर्मोपास्तिज्ञानभेदैश्शास्त्रं काण्डत्रयात्मकम् ।
अन्ये तूपासनाकाण्डात् तृतीयो नातिरिच्यते ॥ ३ ॥
तदेव ब्रह्म विद्धि त्वं नेदं यत्तदुपासते ।
इति श्रुत्यैव वेद्यस्य ह्युपास्यादन्यतेरिता ॥ ४ ॥
इयमष्टादशाध्यायी क्रमात् षट्कत्रिकेण हि ।
कर्मोपास्तिज्ञानकाण्डत्रितयात्मा निगद्यते ॥ ५ ॥

तत्र युद्धोद्यमं श्रुत्वौत्सुक्यादग्रिमं वृत्तान्तं बुभुत्सुर्धृतराष्ट्र उवाच धर्मक्षेत्र इति । तत्र वेदे तेषां कुरुक्षेत्रं देवयजनमासेति कर्मकाण्डप्रसिद्धं कुरुक्षेत्रमन्यत् । अविमुक्तं वै कुरुक्षेत्रं देवानां देवयजनं सर्वेषां भूतानां ब्रह्मसदनमित्यविमुक्ताख्यं ब्रह्मप्राप्तिस्थानभूतं कुरुक्षेत्रमन्यत् । ब्रह्मसदनत्वं वा। अस्त्यत्र हि जन्तोः प्राणेषूत्क्रममाणेषु रुद्रस्तारकं ब्रह्म व्याचष्टे येनासावमृतीभूत्वा मोक्षी भवतीति वाक्यशेषेण व्युपपादितम् । एतद्व्यावृत्त्यर्थं "धर्मक्षेत्रे" इति विशेषणम् ।

End :

यत्रेति । यत्र पक्षे । ध्रुवेति सर्वत्र सम्बध्यते । श्रीर्दि(रि)ह वस्त(स्तुध)नादिशोभा । विजयः प्रसिद्धः । भूतिरैश्वर्यम्—सर्वनियन्तृत्वम् । नीतिर्नयश्च । एतत्सर्वम् । तत्र तस्मिन् पक्षे । ध्रुवमिति मम मति(:) अतः पाण्डवैस्सह स[म्ब]न्धिरेव कर्त(व्यः) ॥

इति श्रीमहाभारते भीष्मपर्वणि भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे गीतार्थप्रकाशेऽष्टादशोऽध्यायः ।

No. 2082. मैरावणचरित्रम्.

MAIRĀVAṆACARITRAM.

Substance, palm-leaf. Size, $18\frac{1}{2} \times 1\frac{1}{4}$ inches. Pages, 96. Lines, 8 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Adhyāyas 1 to 20, complete.

This contains the story of the capture of Rāma by Mairāvaṇa and of his subsequent defeat; taken from the Jaiminibhārata.

Beginning:

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥
श्रीरामपादुकाम्भोजपरिस्फुरितमानसम् ।
मारुतस्यौरसं वन्दे महाबलमहं सदा ॥
नौमि नागाननं देवं नानाधर्मफलप्रदम् ।
नानाविघ्नहरं भूतं गणनाथमहं सदा ॥
देवसेनापरिणयं देवादीनां धुरन्धरम् ।
दैत्यतारकहन्तारं षडाननमहं भजे ॥
श्रीमद्राजपुरी श्रेष्ठा आस्ति काचिन्महीतले ।
अयोध्या नाम नगरी विश्रुता लोकपावनी ॥
या रमावासयोग्या स्यात् सरयूतटसंश्रिता ।

* * * *

अयोध्या नगरी सेयं इन्द्रस्येवामरावती ।
शुशुभे काञ्चनी माला पृथिव्यामुत्तमेव सा ॥
तस्यां पुर्यां महाराजो रामो दशरथात्मजः ॥

* * * *

इति श्रीजैमिनिभारते मैरावणचरित्रे प्रथमोऽध्यायः ॥

End:

कन्यार्थी लभते कन्यां विद्यार्थी विद्यया भवेत् ।
य इदं श्रु(शृ)णुयान्नित्यं यश्चापि परिकीर्तयेत् ॥

नाशुभं प्राप्नुयात् किञ्चित् सोऽमुत्रेह च मानवः ।
इहलोके चिरं भुङ्क्त्वा विष्णुलोकं स गच्छति ॥

Colophon:

इति जैमिनिभारते मैरावणचरित्रे पाताललङ्कायां मैरावणवधे अमावास्यायां विंशोऽध्यायः ॥

मैरावणचरितं समाप्तम्. ॥

No. 2083. मैरावणचरित्रम्.

MAIRĀVAṆACARITRAM.

Pages, 48. Lines, 81 on a page.

Begins on fol. 29*a* of the MS. described under No. 1980.

Adhyāyas 1 to 20, complete.

Same as the above.

No. 2084. मैरावणचरित्रम्.

MAIRĀVAṆACARITRAM.

Pages, 58. Lines, 22 on a page.

Begins on fol. 117*a* of the MS. described under No. 855.

Complete in 20 Adhyāyas.

Same as the above.

No. 2085. मैरावणचरित्रम्.

MAIRĀVAṆACARITRAM.

Substance, palm-leaf. Size, $15\frac{1}{4} \times 1\frac{1}{4}$ inches. Pages, 27. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, new.

Adhyāyas 3 to 16, complete; 17th incomplete.

No. 2086. मैरावणचरित्रम्.

MAIRĀVAṆACARITRAM.

Substance, palm-leaf (Srītāla). Size, $7\frac{3}{8} \times 1\frac{7}{8}$ inches. Pages, 13. Lines, 10 on a page. Character, Malayāla. Condition, good. Appearance, old.

Begins on fol. 209*a*. The other works herein are Kaliyugarājavṛttāntaḥ 1*a*, Bṛhatīśvaramāhātmyam 43*b*, Tirunallisthalamāhātmyam 104*a*.

Breaks off in the 3rd Sarga.

The same story as the above, but taken from the Vāsiṣṭharāmāyaṇa.

Beginning :

ससौमित्रिं रामं सजनकसुताकं प्रति मुहुः
भजन्तं प्रत्यर्थिप्रमथनपटीयःपटुरवम् ।
गिरिप्रख्यं संख्ये प्रविदळितमैरावणगणं
हनूमन्तं वन्दे जलधितरणे जाङ्घिकमहम् ॥
प्राप्तराज्यस्य रामस्य राक्षसानां वधे कृते ।
दर्शनाय समाजग्मुरयोध्यायां मुनीश्वराः ॥

* * * *

इति विश्रावितं येन ह्येकेनैव रिपोः पुरि ।
इत्याकर्ण्य सभामध्ये रामो जाम्बवतो वचः ॥
हर्षेण महताविष्टः प्राह संप्राप्तसंशयः ।

Colophon :

इति मैरावणवधे द्वितीयस्सर्गः ॥

End :

अस्य बाहुबलं सोढुं क्षमं नाण्डसहस्रकम् ।
रावणो येन विजितो येन मैरावणो हतः ॥

No. 2087. शेषधर्मः.

ŚEṢADHARMAḤ.

Substance, palm-leaf. Size, $12\frac{3}{4} \times 1\frac{3}{8}$ inches. Pages, 376. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are Bhāratavaṁśāvaliḥ 189*a*, Aśvatthakalpa 197*a*, Adhyāyas 1 to 56.

A portion of the Harivaṁśa, recounting the Dharmas and the consequences arising from their violation.

Beginning:

अथ ते मुनयस्सर्वे शौनकाद्या महौजसः ।
सूतं धर्मविदां श्रेष्ठं पप्रच्छुरिदमादरात् ॥
सूत सूत महाभाग सर्वशास्त्रविशारद ।
व्यासप्रसादात्सर्वं त्वं सर्वधर्ममशेषतः ॥
भारतीयानि शास्त्राणि विचित्रफलवन्ति च ।
विचित्रकथयोपेताः भारतीयाः कथाः श्रुताः ॥
श्रीकृष्णचरिते दिव्ये शेषधर्मे यदूद्वहे ।
धर्मं धर्मविदां श्रेष्ठ तन्नश्शंसितुमर्हसि ॥

सूतः—

एतदर्थं महाप्राज्ञो जनमेजयभूपतिः ।
पृष्टवान्मुनिशार्दूलं वैशम्पायनमर्थवित् ॥

जनमेजयः—

भारते सर्वशास्त्राणि श्रुतानि विविधानि स(न)ः ।
धर्मा(र्म्या)णि च विचित्राणि चरितानि महात्मनाम् ॥

* * * *

अनुक्तं भवता किञ्चित् शेषं तेष्वखिलं महत् ।
विमृश्य च भवान्नूनं सूक्ष्मधर्मं बहुप्रदम् ॥

ब्रूहि मे कृपया वीर लोकस्यास्य विशुद्धये ॥

*   *   *   *

Colophon:

इत्याश्चर्यपर्वणि हरिवंशे शेषधर्मे धर्मानुक्रमणिका नाम प्रथमोऽध्यायः ॥

End:

वैश्यस्तु पशुमांश्चापि शूद्रो वै धर्ममाप्नुयात् ।
पुत्रकामो लभेत्पुत्रं धनकामो लभेद्धनम् ॥
यं यं कामयते कामं तं तमाप्नोति निश्चितम् ।
य इदं पुण्यमाख्यानं श्रृणोति सततं नरः ॥
सर्वपापविनिर्मुक्तो विष्णुलोके महीयते ।

Colophon:

इत्याश्चर्यपर्वणि हरिवंशे शेषधर्मे उपरिभागे षट्पञ्चाशोऽध्यायः ॥

No. 2088. शेषधर्मः.
ŚĒṢADHARMAḤ.

Substance, palm-leaf. Size, $15\frac{1}{4} \times 1\frac{3}{8}$ inches. Pages, 81. Lines, 9 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Adhyāyas 40 to 57.

A portion of Harivaṁśa.

Copying completed by Ananta on the 5th of Siṁha-Śuddha in the year Manmatha.

No. 2089. शेषधर्मः.
ŚĒṢADHARMAḤ.

Substance, palm-leaf. Size, $17\frac{1}{3} \times 1\frac{1}{4}$ inches. Pages, 360. Lines, 4 on a page. Character, Telugu. Condition, good. Appearance, old.

Adhyāyas 1 to 57.

Same work as the last.

End:

वरमिदमितिहासं शृण्वतां लौकिकानां
सकलदुरितशान्तिः सद्य एवास्तु विप्राः ।
भवति हि सुरलोकः सुकृतिनां मुरारौ
जगति सुलभमेतत् दुर्लभं पापिनाश्च ॥

Colophon:

इत्याश्चर्यपर्वणि हरिवंशे शेषधर्मे नारदीयधर्मोपाख्यानं नाम सप्तपञ्चाशोऽध्यायः ॥

कर्णभूषाङ्गुळीयैश्च तथा सोष्णीषकञ्चुकैः ।

* * * *

ब्राह्मणान् भोजयेद्भक्त्या यथाविभवसारतः ॥

No. 2090. शेषधर्मः.
ŚEṢADHARMAḤ.

Pages, 113. Lines, 6 on a page.

Begins on fol. 146*a* of the MS. described under No. 1861.

Breaks off in the 24th Adhyāya.

Same as the above.

No. 2091. शेषधर्मः.
ŚEṢADHARMAḤ.

Substance, palm-leaf. Size, $17\frac{3}{8} \times 1\frac{1}{2}$ inches. Pages, 256. Lines, 6 on a page. Character, Grantha. Condition, fair. Appearance, old.

Adhyāyas 1 to 56.

Same as the above.

No. 2092. शेषधर्मः.
ŚEṢADHARMAḤ

Substance, palm-leaf. Size, $15\frac{1}{2} \times 1\frac{1}{4}$ inches. Pages, 295. Lines, 5 on a page. Character, Telugu. Condition, much injured. Appearance, old.

Adhyāyas 3 to 57, complete. Fols. 10 and 11 are lost.

No. 2093. सनत्सुजातीयविवरणम्.

SANATSUJĀTĪYAVIVARAṆAM.

Substance, paper. Size, $8\frac{1}{4} \times 6\frac{5}{8}$ inches. Pages, 114. Lines, 16 on a page. Character, Dēvanāgarī. Condition, good. Appearance, not new.

Complete.

A commentary by Śaṅkarācārya on Sanatsujātīya, which constitutes Adhyāyas 41 to 43 in the Udyōgaparvan of the Mahābhārata.

Beginning :

नमः पुंसे पुराणाय पूर्णानन्दाय विष्णवे ।
निरस्तनिखिलध्वान्ततेजसे विश्वहेतवे ॥ १ ॥
नम आचार्येभ्यो ब्रह्मविद्यासम्प्रदायकर्तृभ्यः ।

सनत्सुजातविवरणं सङ्क्षेपतो ब्रह्म जिज्ञासूनां सुखावबोधायारभ्यते । स्वतश्चित्सदानन्दाद्वितीयब्रह्मात्मस्वरूपोऽप्यात्मा स्वाश्रयया स्वविषयया अविद्यया स्वानुभवगम्यया साभासया स्वाभाविकचित्सदानन्दाद्वितीयब्रह्मात्मभावात् प्रच्युतोऽनात्मनि देहादावात्मभावमापन्नोऽप्राप्ताशेषपुरुषार्थः, प्राप्ताशेषानर्थोऽविद्यापरिकल्पितैरेव साधनैरिष्टप्राप्तिमनिष्टपरिहृतिं चाकाङ्क्षन्, लौकिकवैदिकैस्साधनैरनुष्ठितैरपि परमपुरुषार्थं मोक्षाख्यमलभमानो मकरादिभिरिव रागादिभिरितस्ततस्समाकृष्यमाणस्सुरनरतिर्यगादिभेदभिन्नासु नानायोनिषु परिवर्तमानो मोमुह्यमानस्संसरन् कश्चित् पुण्यवशाद्वेदोदितेनेश्वरार्थकर्मानुष्ठानेनापगतरागादिमलोऽनित्यत्वादिदर्शनोत्पन्नेहामुत्रार्थभोगविरागो वेदान्तेभ्यः प्रतीयमानब्रह्मभावबुभुत्सुर्वेदोदितशमदमादिसाधनसम्पन्नो ब्रह्मविदमाचार्यमुपेत्याचार्यगुणानुसारेण श्रवणादिनाहं ब्रह्मासीति ब्रह्मात्मत्वमवगम्य निवृत्ताज्ञानतत्कार्यो ब्रह्मस्वरूपोऽवतिष्ठत इति वेदान्तमर्यादा । एतत्सर्वं क्रमेण दर्शयिष्यति भगवान् सनत्सुजातः ॥

वैशम्पायनः

ततो राजा धृतराष्ट्रो मनीषी
सम्पूज्य वाक्यं विदुरेरितं तत् ।
सनत्सुजातं रहिते महात्मा
पप्रच्छ बुद्धिं परमां बुभूषन् ॥

धृतराष्ट्रश्शोकमोहाभिसन्तप्तः "तरति शोकमात्मवित्" इति वदतो वादमुपश्रुत्य ब्रह्मविद्यामृते शोकापनयनमशक्यं मत्वा

"अनुक्तं यदि ते किञ्चिद्वाचा विदुर विद्यते ।
तन्मे शुश्रूषवे ब्रूहि विचित्राणीह भाषसे ॥"

इति विदुरायोक्तवान् । सोऽपि परमकारुणिकत्वात् सर्वज्ञोऽपि सन् ब्रह्मविद्यां विशिष्टाधिकारिविषयां मन्वानः "शूद्रयोन्यामहं जातो नाहमेतां(तोऽन्यद्) वक्तुमुत्सहे" इति शूद्रयोनित्वादौपनिषदब्रह्मात्मत्वज्ञानोपदेशे नाहमधिकृत इति मत्वा "कथमेनं ब्रह्मविद्यया परमपदे परमात्मनि पूर्णानन्दे स्वाराज्ये स्थापयिष्यामीति मन्वानश्छान्दोग्योपनिषत्प्रसिद्धमितिहासं स्मृत्वा "नान्योऽस्मादस्मै तमसः परं परमात्मानं दर्शयितुं शक्नुयात्" इति मत्वा तमेव भगवन्तं सनत्कुमारं योगबलेनाहूय प्रत्युत्थानादिना भगवन्तं पूजयित्वा

"भगवन् संशयः कश्चिद्धृतराष्ट्रस्य मानसे ।
यो न शक्यो मया वक्तुं तमस्मै वक्तुमर्हसि ॥
श्रुत्वा यं तु मनुष्येन्द्रस्सुखदुःखातिगो भवेत् ।
लाभालाभौ प्रियद्वेष्यौ तथैव तु जरान्तकौ ॥
विषहेत मदोन्मादौ क्षुत्पिपासे भयाभये ।
अरतिं चैव तन्द्रीं च कामक्रोधौ क्षयोदयौ ॥" इति ।

"भगवन् येनासौ सकलसांसारिकधर्मवर्जितः सुखदुःखातिगो मुक्तो भवेत् तमस्मै धृतराष्ट्राय वक्तुमर्हसि" इति उक्तवान् ॥

End:

तथा च श्रुतिः तेषामनुभवं दर्शयति । "तद्धैतत् पश्यन्नृषिर्वामदेवः प्रतिपेदे" इति बृहदारण्यके । "एतत् साम गायन्नास्ते" इति तैत्तिरीयके । सामगानेन स्वानुभवो दर्शितः आत्मनः कृतार्थत्वद्योतनार्थम् । तथा छान्दोऽग्येऽपि तलवकारे च "अहमन्नमन्नम्" इत्यादिना विदुषां भोक्तृभोग्यरूपं जगत् स्वात्मव्यतिरेकेण नास्तीति स्वानुभवो दर्शितः ॥

तत्रैते श्लोका भवन्ति :—

नित्यशुद्धबुद्धमुक्तभावमीशमात्मना
भावयन् षडिन्द्रियाणि सन्नियम्य निश्चलः ।
अस्ति वस्तु चिद्घनं जगत्प्रसूतिकारणं ।
न नश्वरं [च] त(दु)द्भवं तमस्तमोनुदं च यत ॥
तत्पदैकवाचकं सदामृतं निरञ्जनम् ।
चित्तवृत्तिद्राक्सुखं तदस्म्यहं तदस्म्यहम् ॥

Colophon:

इति श्रीमद्भगवत्कृष्णद्वैपायनप्रणीतसनत्सुजातविवरणे भगवत्पादकृते चतुर्थोऽध्यायः ॥

No. 2094. सनत्सुजातीयविवरणम्.

SANATSUJĀTĪYAVIVARAṆAM.

Substance, palm-leaf (Śrītāla). Size, 9½ × 2¼ inches. Pages, 128. Lines, 10 on a page. Character, Grantha. Condition, good. Appearance, old.

Complete.

Same work as the above.

No 2095. सनत्सुजातीयव्याख्या.

SANATSUJĀTĪYA VYĀKHYĀ.

Substance, paper. Size, 12 × 7⅞ inches. Pages, 66. Lines, 20 on a page. Character, Telugu. Condition, good. Appearance, new.

Complete. The text here contains 5 Adhyāyas, from 41 to 45 of the Udyōgaparvan.

The text and the commentary. The commentary on Sanatsujātaparvan is by Nīlakāṇṭha, son of Gōvindasūri.

Beginning :

(मू)

सनत्सुजात उवाच :—

अपृच्छः कर्मणा केचित् मृत्युर्नास्तीति चापरे ।
श्रृणु मे ब्रुवतो राजन् यथैतन्मा विशङ्किथाः ॥ ३ ॥
उभे सत्ये क्षत्रियैतस्य विद्धि
मोहान्मृत्युरसम्मतोऽयं कवीनाम् ।
प्रमादं वै मृत्युमहं ब्रवीमि
तथाप्रमादममृतत्वं ब्रवीमि ॥ ४ ॥

(व्या)

यत्कर्मणा ब्रह्मचर्येण मृत्युर्नास्तीति तेन सत्यस्य बन्धस्य साधनेन नाश इति अपृच्छः पृष्टवानसि । यच्चापरं मृत्युरस च रूपत एव नास्तीत्यपृच्छः । एतत् एतयोः पक्षयोः परस्परविरुद्धत्वं मा विशङ्किथाः मा मंस्थाः । अमृत्युः कर्मणा केचिदिति पाठे कर्मसाध्यममृतत्वमुत ज्ञानसाध्यमिति पक्षद्वयोपन्यासः । तयोश्च क्रमसमुच्चयपक्षाश्रयेण विरोधाभावं मन्वानो मा विशङ्किथा इति ब्रवीतीत्यर्थः ॥ ३ ॥

अविरोधमेवाह—उभे इति ।

एतस्य एकस्यैव पुंसोऽवस्थाभेदेन उभे अपि सत्ये एव हे क्षत्रिय विद्धि । अविद्यावस्थायां बन्धः सत्यः कर्मनाश्यश्च । विद्यावतां तु रज्जूरगवत्कालत्रयेऽपि नास्ति । मोहाद्भासमानस्य तु ज्ञानमात्रेण निवृ-

त्तिर्भवतीति भावः । आद्यप्रवृत्ते इति पाठे उभे अपि मते अनादिनी नित्ये इत्यर्थः । सिद्धान्तमाह—मोहादिति । विनिर्मोहानां तु नास्त्येव मृत्युरित्यर्थः । मोहं विवृणोति—प्रमादमिति । आत्मतत्त्वानवेक्षणं प्रमादः; मूलाज्ञानमिति यावत् । तदेव मृत्युः । मृत्युर्वै तम इति श्रुतेः । अप्रमादमवाहितताम् सम्यगवेक्षणम् ज्ञानमिति यावत् ज्ञानं सम्यगवेक्षणमिति स्मृतेः । अमृतत्वममृतत्वहेतुः ॥ ४ ॥

End:

(मू.)

अणोरणीयान्सुमनाः सर्वभूतेषु जाग्रति ।
पितरं सर्वभूतेषु पुष्करे निहितं विदुः ॥ ३१ ॥

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यामुद्योगपर्वणि सनत्सुजातीयमध्यात्मशास्त्रं समाप्तम् ॥ २ ॥ ४६ ॥

वैशम्पायन उवाच :—

एवं सनत्सुजातेन विदुरेण च धीमता ।
सार्धं कथयतो राज्ञः सा व्यतीयाय शर्वरी ॥

(व्या.)

प्रकरणार्थमुपसंहरति—अणोरिति ।

* * * *

Colophon:

इति श्रीमत्पदवाक्यप्रमाणमर्यादाधुरन्धरचतुर्धरवंशावतंसश्रीगोविन्दसूरिसूनोः श्रीनीलकण्ठस्य कृतौ भारतभावदीपे उद्योगपर्वणि सनत्सुजातीयार्थप्रकाशे पञ्चमोऽध्यायः ॥

समाप्तश्च सनत्सुजातीयार्थप्रकाशः ॥ २ ॥ ४६ ॥

No. 2096. सनत्सुजातीयव्याख्या.

SANATSUJĀTĪYAVYĀKHYĀ.

Substance, paper. Size, $15\frac{3}{4} \times 8\frac{3}{8}$ inches. Pages, 99. Lines, 12 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 3*a*. The other work herein is Mahābhāratavyākhyā (Virāṭaparvan), fol. 1*a*., which is a mere fragment in 4 pages.

Incomplete.

Same work as the above.

No. 2097. सनत्सुजातीयव्याख्या.

SANATSUJĀTĪYAVYĀKHYĀ.

Substance, palm-leaf. Size, $17\frac{1}{8} \times 1\frac{5}{8}$ inches. Pages, 40. Lines, 9 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol 1*a*. The other work herein is Kārtikēyastavaḥ, 21*a*.

Complete. Same as the above.

No. 2098. सहस्रमुखरावणचरित्रम्.

SAHASRAMUKHARĀVAṆACARITRAM.

Substance, paper. Size, $11 \times 8\frac{3}{4}$ inches. Pages, 200. Lines, 19 on a page. Character, Grantha. Condition, good. Appearance, new.

Adhyāyas 1 to 50.

A portion of the Jaiminibhārata in Āśramavāsaparvan, containing the story of Rāvaṇa, who is here made to have 1,000 heads instead of the usual ten.

Beginning:

जनमेजय :—

जनापवादमसहन् रामस्तत्याज जानकीम् ।
सम्पूर्णगर्भां सर्वज्ञस्साप्याश्रममगान्मुनेः ॥

तस्य सा सुषुवे पुत्रौ यमजौ वीर्यशालिनौ ॥
वाल्मीकिशिष्यौ सर्वज्ञौ सर्वास्त्रकुशलौ क्षितौ ॥
नाम्ना कुशलवौ रक्तौ ववृधाते तपस्विनौ ।
हयमेधस्य तुरगं बद्धा रामस्य तौ तदा ॥

*   *   *   *

शत्रुघ्नं भरतश्चैव लक्ष्मणं सबलं तथा ।
रक्षोवानरमध्यस्थं रामं च समरे शरैः ॥
पातयित्वा हनूमन्तं बद्धा तौ तस्थतुस्सुखम् ।
वाल्मीकिस्तपसा ज्ञात्वा मूर्छितं सबलानुजम् ॥
मन्त्रपूतैस्स सलिलैरसिच्य स्वस्थं चकार ह ।
ततो रामस्सह भ्रात्रा प्रणम्य सहसा मुनिम् ॥
तव शिष्यौ कुमारौ तौ कस्य माता तयोर्वद ।
इति पृष्टस्स वाल्मीकिः वाक्यं राममुवाच ह ॥

*   *   *   *

Colophon:

इति जैमिनीयमहाभारते सीताविजये प्रथमोऽध्यायः ॥

End:

अत्यद्भुतमिदं ब्रह्मन् सीतायाश्चरितं महत् ।
शृण्वतो नास्ति मे तृप्तिः मुनीन्द्र करुणानिधे ॥
. . . . ष्टा महीपतिः ।
पुरं त्यक्त्वा महाप्राज्ञो भार्यया सहितोऽनघः ॥
किं कृत्वा स्वर्गमगमत् तन्मे श्रोतुमिह प्रभो ।
तस्य तद्वचनं श्रुत्वा जैमिनिर्मुनिसत्तमः ॥
जगाद महदाख्यानं सर्वपुण्यकथाश्रयम् ।

जैमिनिः—

सीताविजयमारभ्य धृतराष्ट्रस्य भूपतेः ।
परलोकाप्त(प्त)पयन्तं यद्वृत्तं नृपसत्तम ॥
ख्यातमाश्रमवासाख्यपर्व तत्कथयामि ते ।

Colophon:

इति श्रीजैमिनिभारते आश्रमवासपर्वणि सीतविजये पञ्चाशोऽध्यायः ॥

No. 2099. सेतुमाहात्म्यम्.
SĒTUMĀHĀTMYAM.

Pages, 42. Lines, 7 on a page.

Begins on fol. 44*a* of the MS. described under No. 307.

Adhyāyas 1 to 4 extracted from the Āraṇyaparvan of the Jaiminibhārata; treats of the holiness of Sētu or Rāmēśvaram.

Beginning:

जैमिनिः—

गुर्वर्थे त्यक्तराज्यो व्यचरदनुवनं पद्मपद्मा (द्मयां) प्रियायाः
पाणिस्पर्शासहाभ्यां पथि निहितपदो यो हरीन्द्रानुजाभ्याम् ।
वैरूप्याच्छूर्पणख्याः प्रियविरहरुषा रोषितभ्रूविलासात्
अब्धावारब्धसेतुः खलदवदह[न]नः कोसलेन्द्रोऽवताद्वः ॥
चक्रतीर्थे समासीनो रामो राजीवलोचनः ।
जनयन्नयनानन्दमनयत्तां निशां नृपाः ॥

End:

जैमिनिः—

इत्येतत् सेतुमाहात्म्यं ये पठन्ति द्विजोत्तमाः ।
तेषां मुक्तिर्न सन्देहः पठतां शृण्वतामपि ॥

तस्मात्सर्वप्रयत्नेन श्रोतव्यमिदमादरात् ।

Colophon:

इति श्रीजैमिनीये महाभारते आरण्यके पर्वणि सेतुमाहात्म्ये चतुर्थोऽध्यायः ॥

No 2100. हरिवंशवचनानि.

HARIVAṂŚAVACANĀNI.

Substance, paper. Size, $7\frac{1}{2} \times 4\frac{1}{4}$ inches. Pages, 26. Lines, 14 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 75*a*. The other work herein is Saptāha Bhāgavatamāhātmyam 1*a*.

A number of passages extracted from the Harivaṃśa, which describe eulogistically the birth of Kṛṣṇa, his playful adventures and his marriage with Rukmiṇi.

No. 2101. हरिश्चन्द्रोपाख्यानम्.

HARIŚCANDRŌPĀKHYĀNAM.

Pages, 62. Lines, 6 on a page.

Begins on fol. 53*a* of the MS. described under No. 198; An account of the adventures of Hariścandra in ten Adhyāyas; taken from the Harivaṃśa.

Beginning:

श्रूयते हि महात्मासौ सत्यवादी दृढव्रतः ।
हरिश्चन्द्रो महाराजः पुराणे परिपठ्यते ॥
कथं स राजा धर्मात्मा विश्वामित्रेण धीमता ।
राज्यान्निरस्तस्सौख्याश्च (च्च) पत्न्या प्रियसुतेन च ॥
कथं जल्पस्त्वभूत्पूर्वं विश्वामित्रवसिष्ठयोः ।
कां प्रतिज्ञां चकारासौ वसिष्ठो भगवानृषिः ॥
एतदाख्यानमखिलं सर्वलोकमनोहरम् ।
सम्यगाचक्ष्व विप्रेन्द्र दिव्यं श्रुतिमनोहरम् ॥

वैशम्पायनः—

तत्सर्वमभिधास्यामि पुराणाख्यमनुत्तमम् ।
स्वस्त्यं यशस्यमायुष्यं सर्वपापप्रणाशनम् ॥
यच्छ्रुत्वा तु नरो भक्त्या मुच्यते ब्रह्महत्यया ।
हरिश्चन्द्रो महाराजः प्रजापतिरिवापरः ॥

* * * *

Colophon:

इति श्रीहरिवंशे हरिश्चन्द्रोपाख्याने प्रथमोऽध्यायः ॥

End:

ततो हरिश्चन्द्रकथां सुपूर्णां
श्रुत्वा मनोज्ञां मनुजाधिपेन्द्रः ।
विहाय शोकं विजहार भूयः
स्मरन् हरिश्चन्द्रमनन्तकीर्तिम् ॥
कथामेवं तथा श्रुत्वा हरिश्चन्द्रनृपाश्रयाम् ।
आमन्त्र्य पाण्डवान् सर्वान् बृहदश्वो जगाम ह ॥

Colophon:

इति हरिवंशे हरिश्चन्द्रोपाख्याने दशमोऽध्यायः ॥

No. 2102. हरिश्चन्द्रोपाख्यानम्.

HARIŚCANDRŌPĀKHYĀNAM.

Substance, palm-leaf. Size, $17\frac{3}{4} \times 1\frac{3}{8}$ inches. Pages, 51. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other work herein is Kāvyavyākhyānam 27*a*.

Complete.

Same work as the above.

No. 2103. हरिश्चन्द्रोपाख्यानम्.

HARIŚCANDRŌPĀKHYĀNAM.

Pages, 33. Lines, 10 on a page. Character, Kanarese. Condition, injured. Appearance, old.

Begins on fol. 25*a* of the MS. described under No. 1952.

Complete.

Same story as the above ; but a different work.

Beginning :

जनमेजय उवाच—

वैशम्पायन लोकेऽस्मिन् सत्यवादी दयापरः ।
शौर्यवान्वीर्यसम्पन्नः धृतिमान् बुद्धिमान्वशी ॥
पुण्यश्लोकः पुण्यकीर्तिः पुण्यजा . . . . . ।

* * * *

एकदारव्रतपरः परदारसहोदरः ।
सर्वस्वदाता सत्पात्रे यज्ञे सर्वस्वदक्षिणः ॥

* * * *

एवमादिगुणोपेतः शासिता धर्मतस्सदा ।
युद्धे चाप्रतिमो वीर्ये क्षमया पृथिवीसमः ॥

* * * *

एतत्कथय विप्रेन्द्र पुण्यश्लोकस्य धीमतः ।
यच्छ्रुत्वा ब्रह्महा चापि मुच्यते ब्रह्महत्यया ॥

* * * *

विश्वामित्रः—

पञ्चाशत्कोटिवर्षाणि तपश्चीर्णं मया पुरा ।
तावद्भारतवर्षेऽस्मिन् ते राजानः प्रकीर्तिताः ॥
तेषु राजसु सर्वेषु सूर्येन्द्वन्वयजेषु च ।
एकदारव्रतं . . . . ॥
. . . . भवान् ।
एतादृशस्सत्यवादी परदारपितोपमः ॥

हरिश्चन्द्रोपमो राजा त्वया दृष्टः कदाचन ।
ब्रह्मर्षित्वं मया दत्तं यथा ते कुशिकात्मज ॥

Colophon:

इति श्रीहारिश्चन्द्रोपाख्याने प्रथमोऽध्यायः ॥

End:

पठंश्चन्द्र हरिश्चन्द्र हरिश्चन्द्रेति कीर्तयेत् ।
हरिश्चन्द्रं स्मरेन्नित्यं प्रातरुत्थाय मानवः ॥
सुदिनं सुप्रभातञ्च मङ्गळं तस्य जायते ।
श्रुत्वा रजस्वला चापि शीघ्रं सा गर्भिणी भवेत् ॥
गर्भिणी जनयेत्पुत्रं सर्वज्ञं वेदपारगम् ।
एतत्ते धर्ममाख्यातं यन्मां त्वं परिपृच्छसि ॥
सत्यवादिहरिश्चन्द्रवृत्तान्तं प्रति भूमिप ।
हरिश्चन्द्रकथा पुण्या गङ्गेवाघौघनाशिनी ॥
स्नातानां शृण्वताञ्चापि समाप्ता पुण्यवर्धनी ।

Colophon:

इति हरिश्चन्द्रोपाख्याने दशमोऽध्यायः ॥
पाराशर्येण कथितं दशाध्यायविनिर्मितम् ।
शृण्वतां पठताञ्चापि पुण्यश्रेयस्करं शुभम् ॥

No. 2104. हरिश्चन्द्रोपाख्यानम्.

HARIŚCANDRŌPĀKHYĀNAM.

Substance, palm-leaf. Size, $13\frac{1}{2} \times 1\frac{1}{8}$ inches. Pages, 72. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance old.

Complete.

This is here said to be from the Mahābhārata, but it reads like what is from the Harivaṁśa.

II. PURĀṆAS—1. MAHĀPURĀṆAS.

No. 2105. आग्नेयपुराणम्.

ĀGNĒYAPURĀṆAM.

Substance, paper. Size, $12\frac{5}{8} \times 8\frac{1}{4}$ inches. Pages, 776. Lines, 11 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Complete

This work has been printed in the Ānandāśrama Sanskrit Series, and in it a good list of contents is given.

Beginning :

लक्ष्मीं सरस्वतीं गौरीं गणेशं स्कन्दमीश्वरम् ।
ब्रह्माणं वह्निमिन्द्रादीन् वासुदेवं नमाम्यहम् ॥
नैमिषे हरिमीजाना ऋषयः शौनकादयः ।
तीर्थयात्राप्रसङ्गेन स्वागतं सूतमब्रुवत्(न्) ॥

ऋषय ऊचुः—

सूत त्वं घू(पू)जितोऽस्माभिः सारान्सा(त्सा)रं वदस्व नः ।
घे(ये)न विज्ञातमात्रेण सर्वज्ञत्वं प्रजायते ॥
द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परश्च(श्च)यत् ।
द्वे विद्ये वेदितव्ये हि इति चाथर्व्वि(र्व)णी श्रुतिः ॥

सूत उवाच—

अहं श्रु(शु)कश्व(श्च)पैलाद्या गत्वा बदरिकाश्रमम् ।
व्यासं नत्वा पृष्टवन्तः सोऽस्मिन् सारमथाब्रवीत् ॥

व्यास उवाच—

शुकाद्यैश्शृणु सूत त्वं वसिष्ठो मां मद(यथा)ब्रवीत् ।
ब्रह्मसारं हि प्र(पृ)च्छन्तं मुनिभिश्च परावरैः(त्परम्) ॥

वसिष्ठ उवाच—

द्वे विद्ये(द्विविधं)ब्रह्म वक्ष्या[व]मि शृणु व्यासाखिलानुग ।
यथाग्निर्मां पुरा प्राह मुनिभिर्दैवतैस्सह ॥

पुराणं परमाग्नेयं ब्रह्मविद्याक्षरं परम् ।
ऋग्वेदाद्यपरं ब्रह्म सर्वदेवसुखावहम् ॥

अग्निनोक्तं पुराणं यदाग्नेयं वै(वे)दसस्मि(म्मि)तम् ।
भुक्तिमुक्तिप्रदं पुण्यं पठतां शृणु(ण्व)तां नृणाम् ॥

कालाग्निरूपिणं विष्णुं ज्योतिर्ब्रह्म परं परम् ।
मुमिमिपृ(मुनिभिः पृ)ष्टवान् देवं पूति(जि)तं ज्ञानकर्मभिः ॥

*　　*　　*　　*

अग्निरुवाच—

विष्णुः कालाग्निरुद्रोऽहं विधा(द्या)सारं वदामि ते ।
ब्रह्माग्नेह्यं(यं) पुराणं यत् सर्वं सर्वस्य कारणम् ॥

सर्गस्य प्रतिसर्गस्य वंशमन्वन्तरस्य च ।
वंशानुचरितादेश्च मत्स्यकूर्मादिरूपधृक् ॥

द्वे विद्ये भगवान्विष्णुः परा चैवापरा द्विनु(द्विज) ।
ऋग्यजुस्सामाथर्वाख्या वेद(ा)ङ्गानि च वै द्विज ॥

शिक्षा कल्पा(ल्पो)व्याकरणं[ा]निर(रु)क्तं ज्योतिषाश्चि(षां ग)तिः ।
छन्दोऽभिधानं मीमांसा धर्मशास्त्रं पुराणकम् ॥

न्यायो वैद्यकगान्धर्वं धनुर्वेदोऽर्थशास्त्रकम् ।

*　　*　　*　　*

विष्णुनोक्तं यथा मह्यं देवेभ्यो ब्रह्मणा पुरा ।
तथा ते कथयिष्यामि हेतु(तुं)मात्स्यादिम(रू)पिणम् ॥

इत्यादिमहापुराणे आग्नेये प्रथमोऽध्यायः ॥

End:

न गर्भहारिणी भीतिर्न च बालग्रहाग्रहे(हः) ।
यत्राग्नेयपुराणं स्यान्न पि(पै)शाचादिकं भयम् ॥
श्रृण्वन्विप्रो वेदवि[द]त्स्मान्(त्स्यात्)क्षत्रियः पृथिवीपतिः ।
ऋद्धिं प्रयाति वैश्यश्च शूद्रश्चारोग्यमृच्छति[ः] ॥
यः पठेत् श्रृणुयान्नित्यं समदृग्विष्णुमानसः ।
ब्रह्माग्नेयं पुराणं [य]त्र(सत्)तत्र नश्यन्त्युपद्रवाः ॥
दिव्य(ा)न्तरिक्षभौमाद्याः दुस्स्वमा(प्ना)द्य[ा]भिचारकः ।
न चान्यत् दुरितं यच्च तत्सर्वं हन्ति केशवः ॥
पठतः श्रृणु(ण्व)तः पुंसः पुस्तकं यजते महत् ।
आग्नेयं श्रीपुराणं हि हेमन्ते यः श्रृणोति वै ॥
प्रपूज्य गन्धमाल्याद्यैरग्निष्टोमफलं लभेत् ।

Colophon:

इत्याग्नेयं महापुराणं समाप्तम् ॥

The MS. is dated—Thursday, the 8th Kārtika, 1855 A.D.

No. 2106. आग्नेयपुराणम्.

ĀGNĒYAPURĀṆAM.

Substance, paper. Size, 11¼ × 16⅞ inches. Pages, 581. Lines, 19 on a page. Character, Telugu. Condition, much injured. Appearance, old.

Incomplete; to the end of Dīpadānādivrata.

No. 2107. कूर्मपुराणम्.

KŪRMAPURĀṆAM.

Substance, palm-leaf. Size, 19⅝ × 1½ inches. Pages, 300. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, new.

There are 12 leaves at the end counting from 128 to 139, which contain Adhyāyas 37 to 44 of the Uparibhāga. These leaves seem to have formed part of an original MS. much of which must have been replaced here by other freshly written leaves.

This is one of the 18 Mahāpurāṇas and consists of two parts; the first part contains 54 Adhyāyas, and the second part 44 Adhyāyas. For a list of contents see Aufrecht's Catalogue of the Bodleian Library.

Beginning :

नमस्कृत्वाप्रमेयाय विष्णवे कूर्मरूपिणे ।
पुराणं संप्रवक्ष्यामि यदुक्तं विश्वयोनिना ॥
सत्रान्ते सूतमनघं नैमिशीया महर्षयः ।
पुराणसंहितां पुण्यां पप्रच्छू रोमहर्षणम् ॥
त्वया सूत महाबुद्धे भगवान्ब्रह्मवित्तमः ।
इतिहासपुराणार्थं व्यासस्सम्यगुपासितः ॥
तस्य ते सर्वरोमाणि वचसा हृषितानि यत् ।
द्वैपायनस्य तु भवांस्ततो वै रोमहर्षणः ॥
भवन्तमेव भगवान् व्याजहार स्वयं प्रभुः ।
मुनीनां स(सं)हितां वक्तुं व्यासः पौराणिकीं पुरा ॥
त्वं हि स्वायंभुवे यज्ञे सुत्यां हि वितते सति ।
संभूतस्संहितां वक्तुं समर्थः पुरुषोत्तमः ॥
तस्माद्भवन्तं पृच्छामः पुराणं कौर्ममुत्तमम् ।
वक्तुमर्हसि चास्माकं पुराणार्थे विशारदः ॥
मुनीनां वचनं श्रुत्वा सूतः पौराणिकोत्तमः ॥
प्रणम्य शिरसा प्राह गुरुं सत्यवतीसुतम् ॥

End:

तस्मै व्यासाय गुरवे सर्वज्ञाय महर्षये ।
पाराशर्याय शान्ताय नमो नारायणाय ते

तस्मात्संजायते कृत्स्नं यत्र चैव प्रलीयते ।
नमस्तस्मै सुरेशाय विष्णवे कूर्मरूपिणे ॥

Colophon :

इत्यादिमहापुराणे श्रीकूर्मपुराणे षट्सहस्र्यां संहितायाम् उपरिभागे अनुक्रमकथनं नाम चतुश्चत्वारिंशोऽध्यायः ॥ श्रीकूर्मपुराणं संपूर्णम्.

No. **2108.** गारुडपुराणम्.

GĀRUḌAPURĀṆAM.

Pages, 206. Lines, 24 on a page.

Begins on fol. 1*a* of the MS. described under No. 1800.

Adhyāyas 1 to 69, complete; 70th, incomplete.

This is a Mahāpurāṇa mainly intended to teach that Viṣṇu is the supreme God. Extracts from the beginning of this work, as given in Rajendra Lala Mitra's Catalogue, are different from what is found in this MS.

Beginning :

कथं व्यासेन कथितं पुराणं गारुडन्तव ।
एतत्सर्वं समाख्याहि सर्वं विष्णुकथाश्रयम् ॥

सूतः—

अहं हि मुनिभिस्सार्धं गतो बदरिकाश्रमम् ।
तत्र दृष्टो मया व्यासः ध्यायमानः परेश्वरम् ॥
तं प्रणम्योपविष्टोऽहं पृष्टवान् हि मुनीश्वरम् ।

सूतः—

व्यास ब्रूहि हरे रूपं जगत्सर्गादिकं ततः ।
मन्ये ध्यायसि ध्येयं त्वं यस्माज्जानासि तं प्रभुम् ॥
एवं पृष्टो यथा प्राह तथा विप्रा निबोधत ।

श्रीव्यासः—

शृणु सूत प्रवक्ष्यामि पुराणं गारुडन्तव ।
सह नारददक्षाद्यैः ब्रह्मा मामुक्तवान्यथा ।

सूतः—

ब्रह्मा नारदमुख्यैस्तु सर्वं त्वां कथमुक्तवान् ।
ब्रह्मेदं गारुडं पुण्यं पुराणं सारवाचकम् ॥

श्रीव्यासः—

अहं हि नारदो दक्षो भृग्वाद्याः प्रणिपत्य तम् ।
सारं ब्रूहीति पप्रच्छ ब्रह्माणं ब्रह्मलोकगम् ॥

ब्रह्मोवाच—

पुराणं गारुडं सारं पुरा रुद्रश्च मां यथा ।
सुरैस्सहाब्रवीद्विष्णुः तदहं व्यास वच्मि ते ॥

End :

सौदामिनीविस्फुरिताभिरामं राजा यथोक्तं कुलिशं दधानः ।
पराक्रमोपात्तपरप्रतापः समस्तसामन्तभुवं भुनक्ति ॥

Colophon :

इत्यादिमहापुराणे श्रीगारुडे एकोनसप्ततितमोऽध्यायः ॥

श्रीसूतः—

द्वीपेन्द्रजीमूतवराहशङ्खमत्स्याहिशुक्त्युद्भववेणुजानि ।
मुक्ताफलानि प्रथितानि लोके तेषान्तु शुक्त्युद्भवमेव भूरि ॥

* * * *

या मैक्तिकानामिह जातयोऽष्टौ प्रकीर्तिता रत्नविनिश्चयज्ञैः ।
कम्बोद्भवं तेषु धनं प्रकामं उत्पद्यते यच्च गजेन्द्रकुम्भात् ॥

No. 2109. गारुडपुराणम्.

GĀRUḌAPURĀṆAM

Substance, paper. Size, $12\frac{1}{4} \times 7\frac{7}{8}$ inches. Pages, 127. Lines, 21 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 25*a*. The other works herein are Viṣṇupurāṇa 1*a*, Pādmapurāṇa 96*b*, Pādmapurāṇasūciḥ 236*a*, Puruṣōttamamāhātmyam 308*b*, Daśadhēnudānam 367*a*.

Adhyāyas 1 to 32 in what is called the Sārōddhāra of the Gāruḍapurāṇa.

Beginning:

जयति पराशरसूनुस्सत्यवतीहृदयनन्दनो व्यासः ।
यस्यास्यकमलगलितं वाङ्मयममृतं जगत्पिबति ॥

धर्मदृढबद्धमूलो वेदस्कन्धः पुराणशाखाढ्यः ।
क्रतुकुसुमो मोक्षफलो मधुसूदनपादयोर्ज(पो ज)यति ॥

गरुड उवाच—

भवत्प्रसादाद्वैकुण्ठ त्रैलोक्यं सचराचरम् ।
मयावलोकितं सर्वं जगत्स्थावरजङ्गमम् ॥

भूलोकात्सत्यपर्यन्तं पुरं याम्यं विना प्रभो ।
भूर्लो(लो)कस्सर्वलोकानां प्रवरस्सर्वजन्तुषु ॥

मानुष्यं सर्वभूतानां भुक्तिमुक्ता(क्त्या)लयं शुभम् ।
अतस्सुकृतिनां लोको न भूतो न भविष्यति ॥

* * * *

मानुषत्वं लभेत्कस्मात् मृत्युमाप्नोति तत्कथम् ।
म्रियते कं सुरश्रेष्ठ[ः] देहमाश्रित्य कुत्रचित् ॥

इन्द्रियाणि कुतो यान्ति अस्पृश्यः (स)कथं भवेत् ।
स्वकर्माणि कृतानीह कथं भुङ्क्ते प्रसर्पति ॥

प्रसादं कुरुते(मे देव मोहमज्ञानसंभवम् ।
दामोदर दयापूर्ण) श्रोतुमर्हस्यशेषतः ॥
काश्यपोऽहं सुरश्रेष्ठ विनतागर्भसंभवः ।
इति प्रीतिपरो भूत्वा कथयस्व यथातथम् ॥

End :

इति ते कथितं तार्क्ष्य संयमित्या(न्या)विनिर्णयम् ।
सर्वेषाञ्च हितार्थाय यत्पृष्टोऽहमिह त्वया ॥
इमाञ्च प्रेतमञ्जरीं यमदुःखनिवारणीम् ।
श्रुत्वा धर्ममवाप्नोति यमलोकं न गच्छति ॥
श्रुत्वा मा(नू)नं हि तां प्राज्ञः वाचकं पूजयेत्सुधीः ।
वासोभिरन्नपानाद्यैस्तथा दामाद्यलङ्कृतैः ॥

Colophon :

इति श्रीगरुडपुराणे सारोद्धारे श्रीकृष्णगरुडसंवादे प्रेतमञ्जरीकल्पो नाम द्वात्रिंशोऽध्यायः ॥

Compared by Vīrēśvara Śastrin and Śēṣayya.

No. 2110. गारुडपुराणम्.
GĀRUḌAPURĀṆAM.

Substance, palm-leaf. Size, $18\frac{1}{2} \times 1\frac{1}{8}$ inches. Pages, 31. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, new.

Adhyāyas 1 to 10, complete ; 11th, incomplete.

Same as the above.

No. 2111. विष्णुधर्मोत्तरम्.
VIṢṆUDHARMŌTTARAM.

Substance, palm-leaf. Size, $13\frac{1}{2} \times 1\frac{1}{4}$ inches. Pages, 248. Lines, 6 on a page. Character, Nandināgarī. Condition, good. Appearance, new.

Adhyāyas 1 to 27.

Begins on 1*a*. The other work herein is Brahmāṇḍapurāṇam 125*a*.

A portion of the Gāruḍapurāṇa, intended to establish the supremacy of Viṣṇu above all other gods and to teach how Vaiṣṇava worship is to be conducted. This work seems to be different from what is described in the I. O. L. C. on pages 1308 and 1309.

Beginning :

सूत उवाच—

सम्यक् ज्ञानात्मकं तुष्टं भगवत्प्रियवाहनम् ।
विनतातनयं शान्तं मरीचिः पर्यपृच्छत ॥
भगवन् सर्वलोकानां पूज्योऽसि हरिसेवया ।
ददाति (सि) भक्तिनम्राणां वाञ्छितं तत्प्रभावतः ॥
यन्नाम विष्णोः केनापि स्मृतं वा स्मारितं तदा ।
एवमुच्चार्यमाणं वा सोऽपि याति परां गतिम् ॥
तस्यैव विनतापुत्र देवदेवस्य चक्रिणः ।
पादारविन्दं शिरसि धृत्वा शक्तोऽसि सर्वतः ॥
धर्मान् वेत्ति भवान् सर्वान् अधर्मांश्च विशेषतः ।
अतस्त्वां प्रष्टुकामोऽहं वैष्णवान् शाश्वति(त)प्रदान् ॥
कीदृशा वैष्णवा धर्माः कथं तुष्यति केशवः ।
पूजया स्तुतिदानाद्यैर्विष्णोर्वाक्यं च कीदृशम् ॥
केषामगोचरो विष्णुः केषां मनसि संस्थितः ।
तत्सर्वं विनतापुत्र विस्तराद्वद सुव्रत ॥

श्रीगरुडः—

साधु साधु महाप्राज्ञ मतिस्ते विमलोज्ज्वला ।
ब्रह्मर्षे त्वद्विधानां वै तद्धर्मे नैष्ठिकी रतिः ॥

* * * *

Colophon :

इति श्रीगरुडपुराणे विष्णुधर्मोत्तरे प्रथमोऽध्यायः ॥

End:

माधव श्रीपते कृष्ण विष्वक्सेन जनार्दन ।
अप्रमेय मुरध्वंसिन् पाहि मां शरणागतम् ॥
कंसासुरप्राणहर दैत्यदानवमोहन ।
सद्भक्तभावप्रत्यक्ष त्राहि मां शरणागतम् ॥
दयापर दयासिन्धो सर्वसम्पत्प्रदायक ।
भक्तवत्सल देवेश त्वाहि मां शरणागतम् ॥
इति सूतो हरिं सम्यक् प्रणम्य च पुनः पुनः ।
स्तुत्वा च विनतापुत्रं मरीचिर्ध्यानसंस्थित[ा]ः ॥
ध्यानेन दृष्ट्वा चिद्रूपं वासुदेवं जनार्दनम् ।
शुद्धं सनातनं शान्तं सम्प्राप्तो निर्वृतिं पराम् ॥

Colophon:

इति श्रीविष्णुधर्मोत्तरे चतुर्युगधर्मकथनं नाम सप्तविंशोऽध्यायः ॥

No. 2112. विष्णुधर्मोत्तरम.

VIṢṆUDHARMŌTTARAM.

Substance, palm-leaf. Size, 18 × 1¼ inches. Pages, 260. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old.

Adhyāyas 1 to 27.

Same as the above.

No. 2113. विष्णुधर्मोत्तरम्.

VIṢṆUDHARMŌTTARAM.

Substance, palm-leaf. Size, 16½ × 1⅜ inches. Pages, 220. Lines, 5 on a page. Character, Telugu. Condition, much injured. Appearance, old.

Adhyāyas 1 to 27.

Same as the above.

No. 2114. विष्णुधर्मोत्तरम्.
VIṢṆUDHARMŌTTARAM.

Substance, palm-leaf. Size, $16\frac{7}{8} \times 1\frac{1}{4}$ inches. Pages, 17. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 57*a*. The other works herein are Śvētagiri-māhātmyam 1*a*, Manīṣāpañcakam 66*a*.

Adhyāyas 25 and 27. Beginning wanting in the 25th Adhyāya.

पिङ्गळाख्ये वत्सरेऽस्मिन् मासे फाल्गुनसंज्ञिके ।
विष्णुधर्मोत्तरं नाम पुराणम् अप्पणाभिधः ॥
लिलेख कौतुकाद्विद्वान् जनानां भृगुवासरे ।

No. 2115. विष्णुधर्मोत्तरम्.
VIṢṆUDHARMŌTTARAM.

Substance, palm-leaf. Size, $14\frac{4}{5} \times 1\frac{3}{8}$ inches. Pages, 173. Lines, 6 on a page. Character, Grantha. Condition, much injured. Appearance, old.

Breaks off in the 27th Adhyāya.

Same work as the above.

No. 2116. विष्णुधर्मोत्तरम्.
VIṢṆUDHARMŌTTARAM.

Substance, palm-leaf. Size, $17\frac{1}{4} \times 1\frac{3}{8}$ inches. Pages, 17 . Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

In the beginning, 2 leaves are wanting. Breaks off in the 27th Adhyāya.

Same work as the above.

No. 2117. विष्णुधर्मोत्तरम्.
VIṢṆUDHARMŌTTARAM.

Substance, palm-leaf. Size, $17\frac{1}{2} \times 1\frac{1}{8}$ inches. Pages, 60. Lines, 5 on a page. Character. Grantha. Condition, injured. Appearance, new.

Begins on fol. 25*a*. The other works herein are Kundāraṇyakṣētramāhātmya 1*a*, Prāyaścittasudhānidhi 55*a*, Karmavipāka 129*a*.

Breaks off in the 9th Adhyāya.

Same as the above.

No. 2118. विष्णुधर्मोत्तरम्.

VIṢṆUDHARMŌTTARAM

Substance, paper. Size, 8½ × 6 inches. Pages, 24. Lines, 14 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 11*a*. The other works herein are Mahāvākyaprakaraṇa 1*a*, Ātmānātmavivēka 3*a*, Tattvabōdha 7*a*, Ātmāgnihōtravidhi 23*a*.

Adhyāya 11 only.

Same as the above.

No. 2119. देवीभागवतम्.

DĒVĪBHĀGAVATAM.

Substance, paper. Size, 12⅛ × 7¾ inches. Pages, 716. Lines, 23 on a page. Character, Telugu. Condition, good Appearance, old.

Skandhas 1 to 5, complete.

This Purāṇa consists of 12 Skandhas and treats of the greatness of Dēvī or the Goddess Śakti. The controversy as to which of the two works, Dēvībhāgavata or Śrībhāgavata, is to be included in the 18 Mahāpurāṇas, is yet unsettled.

Beginning :

सर्वे चैतन्यरूपान्तां विद्यामाद्याश्च धीमहि ।
परब्रह्मात्मिकां शश्वत् बुद्धिं यो नः प्राचोदयात् ॥

शौनक उवाच—

सूत सूत महाभागो धन्योऽसि पुरुषर्षभ ।
यदधीतं त्वया सम्यक्पौराणीस्संहितारशुभाः ॥

अष्टादश पुराणानि कृष्णेन मुनिनानघ ।
कथितानि सुदीप्तानि पठितानि त्वया किल ॥
पञ्चलक्षणयुक्तानि सरहस्यानि मानद ।
त्वया ज्ञातानि सर्वाणि व्यासात्सत्यवतीसुतात् ॥
अस्माकं पुण्ययोगेन प्राप्तस्त्वं क्षेत्रमुत्तमम् ।
दिव्यं विनशनं पुण्यं कलिदोषविवर्जितम् ॥

End:

सूत उवाच—

इति जनमेजयेनासौ पृष्टस्सत्यवतीसुतः ।
उवाच स(सं)हितां दिव्यां व्यासः सर्वार्थतत्त्ववित् ॥
चरितं चण्डिकायास्तु शुम्भदैत्यवधाश्रितम् ।
कथयामास भगवान् कृष्णः कारुणिको मुनिः ॥
इति वो(वः) कथितं सारं पुराणानां मुनीश्वराः ।
श्रित(श्रुतं)व्यास(ा)न्मया यत्तत् कृपया भवतां किल ॥

Colophon:

इति श्रीभागवते महापुराणे अष्टादशसहस्रसंहितायां पञ्चमस्कन्धे देवीमाहात्म्ये पञ्चत्रिंशोऽध्यायः ॥ समाप्तः ॥

No. **2120.** देवीभागवतम्.

DĒVĪBHĀGAVATAM.

Substance, palm-leaf. Size, $17\frac{1}{8} \times 1\frac{3}{8}$ inches. Pages, 404. Lines, 7 on a page. Character, Telugu. Condition, slightly injured. Appearance, new.

Skandhas 1 to 4.

Copying finished on Sunday, the 10th Bahula Āṣāḍha, in the year Āṅgīrasa, by Kappagaṇṭu(la) Veṅkaṭaśimu(vu)ḍu, who then presented the MS. to his wife's brother Lolla Rāmasvāmi.

No. 2121. देवीभागवतम्.

DĒVĪBHĀGAVATAM.

Substance, paper. Size, 12¼ × 8 inches. Pages, 356. Lines, 27 on a page. Character, Telugu. Condition, good. Appearance, new.

Skandhas 1 and 2.

No. 2122. देवीभागवतम्.

DĒVĪBHĀGAVATAM.

Substance, paper. Size, 12 × 7¾ inches. Pages, 323. Lines, 20 on a page. Character, Telugu. Condition, good. Appearance, new.

Skandhas 3 and 4.

No. 2123. देवीभागवतम्.

DĒVĪBHĀGAVATAM.

Substance, paper. Size, 12¼ × 7¾ inches. Pages, 230. Lines, 20 on a page. Character, Telugu. Condition, good. Appearance, new.

Skandha 5, complete.

No. 2124. देवीभागवतम्.

DĒVĪBHĀGAVATAM.

Substance, paper. Size, 12¼ × 7⅞ inches. Pages, 746. Lines, 25 on a page. Character, Telugu. Condition, good. Appearance, new.

Skandhas 6 to 8, complete. Skandha 7 contains 19 Adhyāyas and Skandha 8 contains 24 Adhyāyas.

No. 2125. देवीभागवतम्.

DĒVĪBHĀGAVATAM.

Substance, paper. Size, 12 × 7¾ inches. Pages, 342. Lines, 21 on a page. Character, Telugu. Condition, good. Appearance, new.

Skandha 9, complete in 50 Adhyāyas.

No. 2126. देवीभागवतम्.
DĒVĪBHĀGAVATAM.

Substance, paper. Size, 13⅝ × 5⅛ inches. Pages, 232. Lines, 10 on a page. Character, Dēvanāgari. Condition, fair. Appearance, new.

Skandha 9, complete in 50 Adhyāyas.

No. 2127. देवीभागवतम्.
DĒVĪBHĀGAVATAM.

Substance, paper. Size, 11¼ × 7 inches. Pages, 400. Lines, 17 on a page. Character, Telugu. Condition, much injured. Appearance, old.

Skandha 9, complete.

No 2128. देवीभागवतम्.
DĒVĪBHĀGAVATAM.

Substance, paper. Size, 12¾ × 8 inches. Pages, 557. Lines, 18 on a page. Character, Telugu. Condition, good. Appearance, new.

Contains Khaṇḍa 1, complete in 81 Adhyāyas

This appears to be a different version of the Dēvībhāgavata, and it purports to have been revealed to Vyāsa by Dēvī by mean of the petals of her foot-lotus. Vyāsa taught this Puraṇa to Jaimini and other disciples, of whom Sūta was one. Sūta related the Purāṇa to Śaunaka and other sages.

The subject matter of the chapters, as noted in the colophons, is as follows:—

(1) महा भागवतप्रकाशनम्, छायासत्याग्निप्रवेशः (11) सतीदेहत्यागः (15 to 19) भगवती गीता (21) पार्वत्याः शिवान्तिकगमनम् (24) पार्वतीविवाहे मरीच्यागमनं च (27) पार्वतीविवाहे महादेवागमनम् (28) पार्वतीविवाहमङ्गलम् (30) कार्त्तिकेयजन्म (31) तारकासुरसङ्ग्रामे कार्त्तिकेयसमागमः । (60) महाकालीदर्शनप्रसङ्गे इन्द्रस्य ब्रह्महत्याज-

नितपापकथनम् (61) महाकालीदर्शनप्रसङ्गे इन्द्रस्य वैकुण्ठपुरप्रवेशनम् (62) महाकाल्युपाख्याने इन्द्रादीनां देवीलोकगमनम् (63) महाका-लीदर्शनप्रसङ्गसमाप्तिः (67) गङ्गागमनोपाख्याने श्रीमहादेवसहस्रनाम (71 to 75) गङ्गामाहात्म्यकथनम् (76 to 78) कामाख्यामाहात्म्यम् (79) तुलसीमाहात्म्यम् । (80) रुद्राक्षमाहात्म्यम्.

There are gaps in chapters 42 and 43

Beginning :

नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।
देवीं सरस्वतीं चैव ततो जयमुदीरयेत् ॥
यामाराध्य विरिञ्चिरस्य जगतः स्रष्टा हरिः पालकः
संहर्ता गिरिशः स्वयं समभवद्ध्येया च या योगिभिः ।
यामाद्यां प्रकृतिं वदन्ति मुनयः तत्त्वार्थविज्ञाः परां
तां देवीं प्रणमामि विश्वजननीं स्वर्गापवर्गप्रदाम् ॥

* * * *

सूत उवाच—

यदुक्तं श्रीमहेशेन नारदाय महात्मने ।
पुराणं परमं गुह्यं महाभागवताह्वयम् ॥
तदाह भगवान् व्यासः श्रद्धया भक्तिशालिने ।
स्वयं जैमिनये पूर्वं पुनस्तद्वो ब्रवीम्यहम् ॥
गोपनीयं प्रयत्नेन न प्रकाश्यं कदा चन ।
एतस्य श्रवणे पाठे यत्पुण्यं जायते द्विजाः ॥

* * * *

महापुराणं परमं यत्परो नास्ति भूतले ।
भगवत्याः परं तत्त्वं माहात्म्यं यत्र विस्तृतम् ॥
तत्कथं वर्णयिष्येऽहमिति चिन्तापरायणः ।
देव्यास्तत्त्वमविज्ञाय क्षुब्धचित्तो बभूव सः ॥

End:

य इदं परमाख्यानं श्रावयेद्द्विजसन्निधौ ।
सद्भक्त्या जैमिने तस्य पापं नश्यति तत्क्षणात् ॥
अप्यनेकशतं कोटिजन्मान्तरसुसञ्चितम् ।
एतदाकर्ण्य सन्त्यज्य पापं मोक्षमवाप्नुयात् ॥

Colophon:

इति श्रीमहाभागवते महापुराणे प्रथमखण्डसमाप्तिर्नाम एकाशीतितमोऽध्यायः ॥

समाप्तोऽयं प्रथमखण्डः ॥

No. 2129. पाद्मपुराणम्.
PĀDMAPURĀṆAM.

Substance, paper. Size, 12 × 9½ and 11½ × 9½ inches. Pages, 978. Lines, 25 on a page. Character, Grantha. Condition, good. Appearance, new.

Bound in 3 volumes.

Volume I contains Adhyāyas 1 to 39 in the Pauṣkarakhaṇḍa, the 40th being incomplete.

Volume II contains Adhyāyas 40 to 81 in the Pauṣkarakhaṇḍa, and Adhyāyas 1 to 13 in the Bhūmikhaṇḍa, the 14th being incomplete.

Volume III contains Adhyāyas 14 to 118 in the Bhūmikhaṇḍa.

This is a Mahāpurāṇa printed in the Ānandāśrama Sanskrit Series. In this publication there are 6 Khaṇḍas named as आदि, भूमि, ब्रह्म, पाताल, सृष्टि and उत्तर. The Pauṣkarakhaṇḍa is found to be the same as the Sṛṣṭikhaṇḍa. The last Adhyāya of the Bhūmikhaṇḍa, however, states that there are only 5 Khaṇḍas, viz., सृष्टि, भूमि, स्वर्ग, पाताल and उत्तर.

Beginning:

स्वच्छं चन्द्रावदातं करिकरमकरक्षोभसञ्जातफेनं
ब्र(ह्मो)द्भूतिप्रसक्तैर्व्रतनियमपरैस्सेवितं विप्रमुख्यैः ।

ओङ्कारालङ्कृतेन त्रिभुवनगुरुणि(णा) (ब्रह्मणा)दृष्टिपूतं
सभो(म्भो)गं(गा)भोग[ा]रम्यं जल(मञ्जु)महरं पौष्करं नः पुनातु ॥
सूतमेकान्तमासीनं व्यासशिष्यो महामतिः ।
लोमहर्षणनामा वै व्य(उ)ग्रश्रवसमाह तम् ॥

* * * *

इदं पवित्रं यशसां निधानमिदं पितॄणामतिवल्लभं स्यात् ।
इदं च देवस्य सुखाय नित्यमिदं महापातकभिन्दि(द्धि)पुंसाम् ।
इति श्रीपद्मपुराणे पुराणावतारे प्रथमोऽध्यायः ॥

End :

द्वादशैव सहस्राणि नाशं यास्यन्ति सत्तम ।
कलौ युगे नि(तु)संप्राप्ते प्रथमं हि भविष्यति ॥
भूमिखण्डं नरश्श्रुत्वा सर्वपापैः प्रमुच्यते ।
मुच्यते सर्वरोगेभ्यः सर्वरोगैः (दुःखैः) प्रमुच्यते ॥
स्वयमेवं परित्यज्य जपं दानं तथा श्रुतम् ।
श्रोतव्यं हि प्रयत्नेन पद्माख्यं पापनाशनम् ॥

Colophon:

इति श्रीपद्मपुराणे भूमिखण्डे वैण्योपाख्याने अष्टादशोत्तरशततमोऽध्यायः ॥ भूमिखण्डं च समाप्तम् ॥

प्रथमं सृष्टिखण्डं हि द्वितीयं भूमिखण्डजम् ।
गोप्रदानसहस्रस्य फलमाप्नोति मानवः ॥

No. 2130. पाद्मपुराणम्.

PĀDMAPURĀṆAM.

Substance, palm-leaf. Size, 17½ × 1⅜ inches. Pages, 278. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, new.

Adhyāyas 3 to 68 in the Pātāḷakhaṇḍa.

Same work as the above.

Beginning :

भरतोऽपि स्वकं मित्रं सुमुखं नगरं प्रति ।
प्रेषयामास सचिवं नगरोत्सवसिद्धये ॥

भरत उवाच—

कुर्वन्तु लोकास्त्वरितं रघुनाथागमोत्सवम् ।
मन्दिरे मन्दिरे रथ्यं (म्यं) कृतकौतुकचित्रकम् ॥
विपांशुका राजमार्गाः चन्दनोदकसेविताः ।
प्रसूनभरसंक्लृप्ताः हृष्टपुष्टजनावृताः ॥
विचित्रवर्णध्वजभाश्चित्रिका(ता)खिलस्वाङ्गणं(णा)ः ।
मेघागमे धनुरिव पश्यन्ते(न्त्ये) ते ब(व) लीमुखाः ॥

*   *   *

Colophon :

इति श्रीपद्मपुराणे पातालखण्डे शेषवात्स्यायनसंवादे रघुनाथस्य पुर-प्रवेशो नाम तृतीयोऽध्यायः ॥

श्रीवात्स्यायन उवाच—

भुजगाधीश्वर गुरो[र]धराभ(र)धरक्षम[ः] ।
श्टण्वेकं संशयं मह्यं कृपया कथयस्व तम् ॥
रघुनास्य गमनं वनं प्रति यदा ह्यभूत् ॥
तदाप्रभृति देहेन स्थिता शून्येन चेतसा ॥

End :

त्वया पृष्टा रामकथा मयि ते कथिता पुरा ।
किमन्यत्कथ्यते ब्रह्मन् पुरतस्तव धर्मितः ॥
शृण्वन्ति ये कथामेतां ब्रह्महत्याघनाशिनीम् ।
ते यान्ति परमं स्थानं सर्वदेवैस्सुदुर्लभम् ॥
गोघ्नश्च युवतिघ्नश्च सुरापो गुरुतल्पगः ।
क्षणात्पूतो भवत्येवमचिरेण द्विजर्षभः ॥

Colophon :

इति श्रीपद्मपुराणे पातालखण्डे शेषवात्स्यायनसंवादे अश्वमेधसमाप्तिर्नाम अष्टषष्टितमोऽध्यायः ॥

प्लवङ्गसंवत्सरभाद्रपदकृष्णतृतीयायां लिखितमिदं पुस्तकम् ॥

No. 2131. पाद्मपुराणम्.

PĀDMAPURĀṆAM.

Substance, palm-leaf. Size, 14¼ × 1⅝ inches. Pages, 29. Lines, 9 on a page. Character, Grantha. Condition, good. Appearance, old.

Uttarakhaṇḍa ; begins in the course of the 29th Adhyāya, and breaks off in the 34th Adhyāya. These Adhyāyas correspond to Adhyāyas 251 to 256 in the Ānandāśrama edition.

Beginning :

विशुद्धविज्ञानघनस्वरूपं (विज्ञान) विश्राणनबद्धतक्षिण(दीक्ष)म् ।
दयानिधिं देहभृतां शरण्यं देवं हयग्रीवमहं प्रपद्ये ॥

श्रीदिलीपः—

भगवन् भवता प्रोक्तं (क्तः) सर्वधर्मोऽप्यशेषतः ।
वर्णाश्रमयुता धर्मा नित्यनैमित्तिकाः क्रियाः ॥
राजधर्माश्च यज्ञाश्च तीर्थदानव्रतादिकम् ।
श्रुता मुने मया श्रेष्ठा अक्षय्यस्वर्गभोगदाः ॥
अधुना श्रोतुमिच्छामि मोक्षमार्गं सनातनम् ।
दिष्ट्याहं येन गच्छामि तद्ब्रह्मन् वक्तुमर्हसि ॥
को धर्मस्सर्वधर्माणां भवरोगैकभेषजम् ।
सर्वेषामेव देवानां को हि मोक्षप्रदः परः ॥
तत्सर्वं ब्रूहि तत्त्वेन मयि वात्सल्यगौरवात् ।

वासिष्ठः—

साधु पृष्टं त्वया राजन् सर्वलोकहितैषिणा ॥
वक्ष्यामि परमं गुह्यमेतत्संसारतारणम् ।
पुरा महर्षयस्सर्वे यज्ञदानपराश्शुभाः ॥
पप्रच्छुः ब्रह्मणः पुत्रं नारदं मुनिसत्तमम् ।
भगवन् केन मन्त्रेण नयामः परमं पदम् ॥
तं नो ब्रूहि महाभाग प्रसादं कर्तुमर्हसि ।

End:

नित्यञ्च परमं व्योम सर्वोत्कृष्टं सनातनम् ।
पर्यायवाचकान्यस्य परन्धाम्नोऽच्युतस्य हि ॥
तस्य त्रिपाद्विभूतेस्तु रूपं वक्ष्यामि विस्तरात् ।

Colophon:

इति श्रीपद्मपुराणे उत्तरखण्डे उमामहेश्वरसंवादे त्रिपाद्विभूतिकथनं नाम त्रयस्त्रिंशोऽध्यायः ॥

ईश्वरः—

त्रिपाद्विभूते लोकास्तु निस्संख्याः परिकीर्तिताः ।
शुद्धसत्त्वमयास्सर्वे ब्रह्मानन्दसुखाह्वयाः ॥

* * * *

पीनवृत्तायतभुजैः चतुर्भिरुपशोभितः ।
अङ्गुलीयैश्च कटकैः केयूरैः परिमण्डितः ॥
बालार्ककोटिसङ्काशैः कौस्तुभाद्यैर्विभूषणैः ।

No. 2132. पाद्मपुराणम्.

PĀDMAPURĀṆAM.

Substance, palm-leaf. Size, $13\frac{5}{8} \times 1\frac{1}{2}$ inches. Pages, 12. Lines, 10 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Begins on fol. 6*a*. The other works herein are Liṅgapurāṇa 1*a*, Varāhapurāṇa 12*a*.

Adhyāyas 29 to 31 in the Uttarakhaṇḍa.

Same work as the above.

No. 2133. पाद्मपुराणम्.

PĀDMAPURĀṆAM.

Substance, palm-leaf. Size, 15⅝ × 1¼ inches. Pages, 252 Lines, 5 on a page. Character, Telugu. Condition, fair. Appearance, old.

Adhyāyas 29 to 59 in the Uttarakhaṇḍa.

Same work as the above.

No 2134. पाद्मपुराणम्.

PĀDMAPURĀṆAM.

Pages, 287. Lines, 23 on a page.

Begins on fol. 96*b* of the MS. described under No. 2109.

Adhyāyas 29 to 60 in the Uttarakhaṇḍa.

Same work as the above.

No. 2135. पाद्मपुराणम्.

PĀDMAPURĀṆAM.

Substance, palm-leaf. Size, 14 × 1¼ inches. Pages, 398. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, new.

Adhyāyas 29 to 61 in the Uttarakhaṇḍa.

Dated :

सौम्यमार्गशिरे मासि कृष्णपक्षे चतुर्दशि (शे)।
इदं पुराणं लिखितं प्रसन्नेन मयाधुना॥
परमैकान्तिपुत्रेण मया सद्गुरुवीक्षणात्॥

No. 2136. पाद्मपुराणम्.

PĀDMAPURĀṆAM.

Substance, palm-leaf. Size, 19⅜ × 1⅜ inches. Pages, 340. Lines, 5 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Adhyāyas 29 to 61 in the Uttarakhaṇḍa.

No. 2137. पाद्मपुराणम्.

PĀDMAPURĀṆAM

Skandhas 5 and 6, complete.

Same work as the above.

No. 2212. भागवतव्याख्या—भावार्थदीपिका.

BHĀGAVATAVYĀKHYĀ: BHĀVĀRTHADĪPIKĀ.

Pages, 142. Lines, 10 on a page.

Begins on fol. 125*a* of the MS. described under No. 2176.

Skandhas 7 and 8, complete.

Same work as the above.

No. 2213. भागवतव्याख्या--भावार्थदीपिका.

BHĀGAVATAVYĀKHYĀ: BHĀVĀRTHADĪPIKĀ.

Substance, palm-leaf. Size, 18 × 1⅝ inches. Pages, 290. Lines, 8 on a page. Character, Telugu. Condition, injured. Appearance, old.

Skandhas 8 to 11, the 8th being wanting in Adhyāyas 1 to 5 and a portion of the 6th. Some leaves are lost in the MS.

Same work as the above. This MS. contains more matter in the commentary than the hitherto printed editions of the work.

No. 2214. भागवतम्-सव्याख्यानम्.

BHĀGAVATAM WITH COMMENTARY.

Substance, palm-leaf. Size, 18⅞ × 1⅝ inches. Pages, 342. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Skandha 10, breaks off in the 52nd Adhyāya.

Same work as the above.

No. 2215. भागवतम्-सव्याख्यानम्.

BHĀGAVATAM WITH COMMENTARY.

Substance, palm-leaf (Śrītāla). Size, 19⅜ × 1⅞ inches. Pages, 436. Lines, 11 on a page. Character, Telugu. Condition, good. Appearance, old.

Skandhas 10 and 12, complete.

The colophon at the end of the 12th Skandha wrongly states it to be the 10th Skandha.

The MS. is dated : Friday, the 5th of Kārtika-Śuddha in the year Nala. Said to have been copied by Puccha Vēnkaṭakṛṣṇa for Varadarāja Mudali.

No. 2216. भागवतव्याख्या--भावार्थदीपिका.

BHĀGAVATAVYĀKHYĀ : BHĀVĀRTHADĪPIKĀ.

Substance, palm-leaf. Size, $16\frac{7}{8} \times 1\frac{5}{8}$ inches. Pages, 565. Lines, 14 on a page. Character, Grantha. Condition, much injured. Appearance, old.

Skandha 10, complete.

Same work as the above.

No. 2217. भागवतम्--सव्याख्यानम्.

BHĀGAVATAM WITH COMMENTARY

Substance, paper. Size, $12 \times 7\frac{3}{4}$ inches. Pages, 863. Lines, 22 on a page. Character, Telugu. Condition, good. Appearance, new.

Written on one side of paper only.

Skandha 10, complete.

Same work as the above.

No. 2218. भागवतम्--सव्याख्यानम्.

BHĀGAVATAM WITH COMMENTARY.

Substance, palm-leaf. Size, $17\frac{3}{4} \times 1\frac{5}{8}$ inches. Pages, 561. Lines, 7 on a page. Character, Telugu. Conditicn, injured. Appearance, very old.

Skandha 10, complete.

Same work as the above.

No. 2219. भागवतम्--सव्याख्यानम्.

BHĀGAVATAM WITH COMMENTARY.

Substance, palm-leaf. Size, 15⅝ × 1½ inches. Pages, 494. Lines, 8 on a page. Character, Grantha and Telugu. Condition, good. Appearance, old.

Skandha 10, complete.

Same work as the above.

ईश्वराब्दे चैत्रमासि शुक्लपक्षहरेस्तिथौ ।
सव्याख्यानमिदन्त्वार्षं दशमं पूर्तिमाययौ ॥
आत्रेयवेङ्कटार्यस्य पदपङ्कजषट्पदा ।
रङ्गाचार्येण लिखितं शुभं भागवतं वरम् ॥
धातुमीनसितविष्णुवासरे वेङ्कटार्यनिबिडानुकम्पया ।
वैष्णवं शुभपुराणमद्भुतं रङ्गनाथगुरुणा विलिख्यते ॥

No. 2220. भागवतव्याख्या--भावार्थदीपिका.

BHĀGAVATAVYĀKHYĀ: BHĀVĀRTHADĪPIKĀ.

Substance, palm-leaf. Size, 17⅞ × 1⅝ inches. Pages, 215. Lines, 9 on a page. Character, Grantha. Condition, good. Appearance, old.

Skandha 10, breaks off in the 91st Adhyāya.

Same work as the above.

No. 2221. भागवतम्--सव्याख्यानम्.

BHĀGAVATAM WITH COMMENTARY.

Substance, palm-leaf. Size, 18¾ × 1½ inches. Pages, 342. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

10th Skandha, breaks off in the 52nd Adhyāya.

Same work as the above.

No. 2222. भागवतम्--सव्याख्यानम्.

BHĀGAVATAM WITH COMMENTARY.

Substance, palm-leaf. Size, $18\frac{1}{8} \times 1\frac{1}{2}$ inches. Pages, 230. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

Skandha 10, breaks off in the 23rd Adhyāya.

Same work as the above

No. 2223. भागवतव्याख्या--भावार्थदीपिका.

BHĀGAVATAVYĀKHYĀ: BHĀVĀRTHADĪPIKĀ.

Substance, palm-leaf. Size, $18\frac{3}{8} \times 1\frac{1}{8}$ inches. Pages, 444. Lines, 8 on a page. Character, Telugu. Condition, much injured. Appearance, old.

Adhyāyas 74 to 95, 1 to 86, and 91, in the 10th Skandha.

Same work as the above.

No. 2224. भागवतम्--सव्याख्यानम्.

BHĀGAVATAM WITH COMMENTARY.

Substance, palm-leaf. Size, $17\frac{1}{4} \times 1\frac{1}{8}$ inches. Pages, 306. Lines, 8 on a page. Character, Telugu. Condition, good. Appearance, new.

Skandhas 11 and 12, complete.

The MS. is dated :

भवशरदि शुभंयुचैत्रमासि पितृपक्षे सवितरि मध्यगेऽर(र्क)वारे ।
सुचरितमिदमार्षममन्दसौख्यदं संपूर्तिस्समभवदुत्तमं सुवर्गम् ॥

No. 2225. भागवतम्- सव्याख्यानम्.

BHĀGAVATAM WITH COMMENTARY.

Pages, 88. Lines, 11 on a page.

Begins on fol. 1*a* of the MS. described under No. 1708.

Skandha 11, Adhyāyas 1 to 29, complete.

Same work as the above.

No. 2226. भागवतव्याख्या--भावार्थदीपिका.

BHĀGAVATAVYĀKHYĀ: BHĀVĀRTHADĪPIKĀ.

Substance, palm-leaf. Size, 17½ × 1½ inches. Pages, 329. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Adhyāyas 51 to the end of the 10th Skandha and Skandhas 11 and 12.

Same work as the above.

The MS. is dated:

साधारणाब्दकार्त्तिक्यां लिखितं पूर्णमेव तु ॥

* * * *

साधारणे पुष्यकृष्णनवम्यामिन्दुवासरे ।
एकादशस्कन्धटीकां दुल्लपट्टाभिरामवित् ॥
गोविन्दनायकेन्द्रस्य लिलिखे चानुपूर्विकाम् ॥

* * * *

भावार्थदीपिकामेतां भगवद्भक्तिवल्लभाम् ।
व्यलिखद्दुल्लपट्टाभिरामो रामाङ्घ्रिभक्तिमान् ॥
साधारणाब्दमाघाख्यमासे शुद्धाष्टमे दिने ।
द्वादशस्कन्धव्याख्येयं समाप्ता भावदीपिका ॥

Said to have been copied by Dulla Paṭṭābhirama for Govinda Nāyaka.

No. 2227. भागवतव्याख्या--शुकपक्षीया.

BHĀGAVATAVYĀKHYĀ: ŚUKAPAKṢĪYĀ.

Substance, palm-leaf. Size, 17½ × 1½ inches. Pages, 66. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Skandha 10, Adhyāyas 1 to 87.

This commentary was composed by Sudarśanasūri *alias* Vēdavyāsa, son of Vāgvijayasūri of Hārīta-gōtra.

Beginning:

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥

अमरञ्जयैर्देवानपि जेतुं [न] समर्थैः वत्सपदं कृत्वा गोष्पदतुल्यं कृत्वा यत्प्लवा इति बहुव्रीहिः । यच्छब्दो भगवद्विषयः पुरुषकालरूपैः क्षेत्रज्ञ-कालाख्यरूपैः विशिष्टस्वक्षेत्रज्ञानां कालावयवानां च बाहुल्याद्बहुवच-नम् । अन्तः पुरुषरूपेणामृतं प्रयच्छन् शरीरस्थितिहेतुः बहिः कालरू-पेण मृत्युं प्रयच्छन् शरीरविनाशहेतुरित्यर्थः ।

End:

द्विषन्तस्त्विग्धाश्च । यद्भगः यस्य भगः । उभयद्दशि(शी)नां मनुष्य-भावमीश्वरत्वं . . . . . तिनामनुसवमनुसन्ध्यं दुस्तरकृतान्तजनापवर्ग दुस्तरः कृतान्तो यैः तेषाञ्जनानां दुःखापवर्गहेतुं धाम स्थानम् ॥

Colophon:

इति हरितकुलतिलकवाग्विजयसूनुना श्रीरङ्गराजदिव्याज्ञालब्धवेदव्या-सापरनामधेयेन श्रीसुदर्शनसूरिणा विरचिते श्रीमद्भागवतपुराणव्याख्याने शुकपक्षे दशमस्कन्धे सप्ताशीतितमोऽध्यायः ॥

दशमस्कन्धस्समाप्तः ॥

No. **2228.** भागवतव्याख्या–शुकपक्षीया.

BHĀGAVATAVYĀKHYĀ: ŚUKAPAKṢĪYĀ.

Substance, palm-leaf. Size, $15\frac{1}{4} \times 1\frac{5}{8}$ inches. Pages, 476. Lines, 10 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Skandhas 4 to 12, complete; the 6th Skandha, however, is incomplete.

Same work as the above.

Beginning:

मनुकन्याद्वयं विस्तरेण वक्तुमाह मनोस्त्विति । . . . . . त् द्वौ पुत्रौ चतुश्शब्दात् अन्यतोऽपि पुत्रलाभः सूचितः ।

तं दर्शयितुमाह पुत्रिकाधर्मत्वमाश्रित्येति ।

अभ्रातृक(कां)प्रदास्यामि तुभ्यं कन्यामलङ्कृताम् ।

अस्यां यो जायते पुत्रस्स मे पुत्रो भवेदिति ॥

भाषानिबन्धनेन कन्यादानं पुत्रिकाधर्मः । स च (अ)भ्रातृकायां कन्यायां पुत्रार्थिन एव प्रसिद्धः । तथापि पुत्रबाहुल्यकामनया कृतवानित्याह—

* * * *

Colophon :

इति श्रीमद्भागवतव्याख्याने प्रथम (चतुर्थ)स्कन्धे प्रथमोऽध्यायः ॥

Dated :

४. शार्वरिनामसंवत्सरे तुलामासि एकोनत्रिंश[ति]दिने गोपालेन लिखित्वा श्रीमद्भागवतव्याख्याने शुकपक्षे चतुर्थस्कन्धस्समाप्तः ॥

५. शार्वरिनामसंवत्सरे वृश्चिकमासि चतुर्विंश [ति]दिने गोपालेन लिखित्वा पञ्चमस्कन्धस्समाप्तः ॥

७. शार्वरिनामसंवत्सरे मकरमासि द्वादशदिने गोपालेन लिखित्वा श्रीमद्भागवते शुकपक्षे सप्तमस्कन्धव्याख्यानस्समाप्तः ॥

* * * *

८. शार्वरिनामसंवत्सरे कुम्भमासि अष्टमदिने गोपालेन लिखित्वा अष्टमस्कन्धव्याख्यानस्समाप्तः ॥

९. व्याख्यानस्य नवमस्कन्धो महान् ॥

१०. शार्वरिनामसंवत्सरे कुम्भमासि एकोनत्रिंश[ति]दिने गोपालेन लिखित्वा श्रीमद्भागवतव्याख्यानस्समाप्तः ॥

End :

फलविशेषमाह विप्र इति । मयि मेखलामिति पादमार्षं भूमिमां प्रबन्धा . . . . वैलक्षण्यमाह कालिमिति । इतरत्र राजसादि-

पुराणेषु संयमात्मशक्तिः स्वयं हेतुभूतात्मशक्तिः । नव शक्तय इत्युक्ता उपलब्धिमात्रधाम्ने जाड्यप्र . . . . . रहितज्ञानात्मकतेजस्स्वरूपाय, स्वसुखमात्मानुसन्धानसुखम् ।? तेनानाकुलवेतास्तेनभ्युदस्तान्यभावनिरस्तभगवव्यतिरिक्तमङ्गः।(?)अपिसमुच्चये, ... ।सुलभसमाधिकतया साक्षात्कृतात्मस्वरूपोऽपि भगव . . . . . . भिराकृष्टचित्तः इत्यर्थः । तद्दीपं तत्त्वप्रकाशम् ॥

Colophon:

इति हरितकुलतिलकवाग्विजयसूरि(नु)णा श्री(रङ्ग) राजदिव्याज्ञालब्धवेदव्यासापरनामधेयेन श्रीसुदर्शनसूरिणा विरचिते श्रीमद्भागवतमहापुराणव्याख्याने शुकपक्षीये द्वादशस्कन्धे द्वादशोऽध्यायः ॥

Dated:

प्लवनामसंवत्सरे चैत्रमासि द्वादशदिने गोपालेन लिखित्वा श्रीमद्भागवते शुकपक्षीयव्याख्यानस्समाप्तः ॥

अब्दः क्रोधनतामवाप सविता कन्याभिषङ्गं गतः
पक्षोऽभून्मलिनास्तिथिः प्रतिपदं पृष्टीचकार स्वयम् ।
वारेशोऽपि च मित्रशत्रुरभवत्सन्नायकोऽभूद्यमः
श्रीमत्यद्य तु वीरराघवबुधे हा विष्णुलोकं गते ॥

No. 2229. भागवतव्याख्या—मुनिभावप्रकाशिका.

BHĀGAVATAVYĀKHYĀ: MUNIBHĀVAPRAKĀŚIKĀ.

Substance, palm-leaf. Size, 16⅝ × 1⅝ inches. Pages, 532. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Leaves, 95 to 100, having become injured, are placed at the beginning, the portion contained in them having been rewritten on fresh leaves.

Adhyāyas 1 to 72 in the 10th Skandha.

This commentary is by Kṛṣṇaguru of Bhāradvājagōtra, son of Nṛsiṁhaguru and nephew of Rāmadēśika, who was a Brahmacārin

throughout life. The author bows to Vādibhīkara Vēṅkaṭārya in reverence and states that he consulted a commentary called Śukapakṣa.

Beginning:

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥
निगमशिखरगेयं नित्यकल्याणकायं
श्रितपुरुषाविधेयं श्रीधरित्रीसहायम् ।
भविकगुणनिकायं भावुकानामुपायं
परिविगलितहेयं वालकृष्णं भजेयम् ॥
पुराणरत्ननिर्माणस्फुटीकृतजगद्धितम् ।
निष्कृष्टभगवत्तत्त्वं पराश(र)मुपास्महे ॥
कृष्णद्वैपायनं वन्दे साक्षान्नारायणं मुनिम् ।
यस्य स्मरणमात्रेण धी(:) स्यात्सवार्थपाण्डिता ॥
मूर्तामिव हरेर्भक्तिं श्रीशुकं मनवं (वा)महे ।
यद्गीताकृष्णचरितान्मुक्तोऽभूदुत्तरासुतः ॥
वन्दे नन्दव्रजवधूर्बृन्दाविपिनदेवताः ।
यत्पयोधरशैलेषु कृष्णः कृष्णघनायते ॥
ब्रह्मविद्याप्रदानेन मम सर्वाघनाशनम् ।
संश्रये वेङ्कटाचार्यं वादिभि(भी)कृत्कुलाधिपम् ॥
वन्दे वात्सल्यजलधिं सर्वविद्याप्रदं मम ।
नैष्ठिकब्रह्मचर्याढ्यं पितृव्यं रामदेशिकम् ॥
श्रीवादिभीकरकुलोत्तमवेङ्कटार्य-
कारुण्यपूर्णकमनीयकटाक्षशक्त्या ।
स्कन्धं विशिष्य दशमं शुकपक्षमुख्य-
व्याख्यार्थसङ्कलनया विवृणोमि लौल्यात् ।
निम्नं महामुनिग्रन्थं व्याचिकीर्षोश्चलात्मनः ॥

सोढव्यं कृपया सद्भिर्बालस्य मम साहसम् ।
उपेक्षितानां विवृतेरुक्तार्थविशदीकृतेः ॥

क्वचिद्विशेषकथनात्सफलो मत्परिश्रमः ।
अत्रावतरणे तस्य पूर्णस्य परमात्मनः ॥

तारणं भारसंतप्तमहीशोकमिहावदत् ।

कथित इत्यादि । यदोश्च वंशविस्तारः कथित इत्यन्वयः । तत्र यदुवंशे अंशेन कथ(ल)या इदं लौकिकप्रतीत्यभिप्रायेणोक्तम्; निरवयवस्य दिव्यात्मस्वरूपस्यांशकल्पनायोगात् । नापि परशुरामावतारा . . . . . वदावेशावताराभिप्रायेण ;

एष नारायणः श्रीमान् क्षीरार्णवनिकेतनः ।
नागपर्यङ्कमुत्सृज्य ह्यागतो मधुरां पुरीम् ॥

इत्यादिना पूर्णस्यैवावतारोक्तेः । यद्वा दीपोत्पन्नप्रदीपत्वन्यायेनाप्राकृत-शुभविग्रहांशेनेति। भूतानि भावयति सृष्ट्यर्थं सङ्कल्पविषयीकरोतीतिभूतभावनः॥

* * * *

Colophon :

इति भारद्वाजकुलकमलभानुना नृसिंहगुरुसूनुना श्रीरामदेशिक-दयालब्धपाण्डित्येन कृष्णगुरुणा विरचितायां दशमव्याख्यायां मुनिभाव-प्रकाशिकासमाख्यायां प्रथमोऽध्यायः ॥

तस्यावतारकार्येषु त्रिष्वेकस्य प्रधानतः ।
अशरीरगिरा बीजमुक्तं मुनिरसूचयत् ॥

अथ भोजेन्द्रबन्धनागारे भगवदवताराय प्रस्तौति ॥

End :

तत्र एवं नारदेन उक्तेषु वर्तमानेषु आत्मीयपक्षेषु यादवेषु जरा-सन्धस्य जिगीषया अगृह्णत्सु अमन्यमानेषु वाचः पेशैः पेशलवाग्भिरि-त्यर्थः । चक्षुष्ट्वे हेतुः । मन्त्रार्थानां मन्त्रसाध्यानां तत्त्ववित् परिपाक-वेदिता ॥

Colophon :

इति दशमव्याख्यायां द्विसप्ततितमोऽध्यायः ॥

No. 2230. भागवतव्याख्या—शुकतात्पर्यरत्नावलिः.

BHĀGAVATAVYĀKHYĀ: ŚUKATĀTPARYA-RATNĀVALIḤ.

Substance, palm-leaf. Size, 17¾ × 1⅛ inches. Pages, 490. Lines, 9 on a page. Character, Grantha. Condition, good. Appearance, new.

Adhyāyas 1 to 54 (55th being incomplete) in the 10th Skandha.

A commentary on the Bhāgavata by Vīrarāghava of Vatsa-gōtra, son of Ahōbiladēśika, son of Śrīśailaguru.

Beginning:

प्रणप्तारं वसिष्ठस्य नप्तारं शक्तियोगिनः ।
पौत्रं पराशरमुनेः व्यासपुत्रं शुकं भजे ॥

भगवद्वैभवविज्ञ्यो व्यासपराशरवसिष्ठयोगिभ्यः ।
भागवतवैभवविदं वन्दे शुकनामयोगिवर्यमहम् ॥

श्रीशाद्याचार्यततिं श्रुत्वा तद्वीक्षणात्तविज्ञानः ।
सर्वोपकारसिद्ध्यै स्ववाक्यसाफल्यसम्पदाप्त्यै च ॥

श्रीमदहोबिलदेशिकतनयः श्रीशैलगुरुधुरीणसुतः ।
वात्स्यो दशमस्कन्धं व्याकुरुते वीरराघवो दासः ॥

गम्भीरा शुकभारती क नु महामन्दा मनीषा क मे
बाहुभ्यां प्रयतोऽस्मि हन्त तरितुं मोहान्महासागरम् ।
अप्येदं(वं) तदुदीतकृष्णकरुणालेशांशयोगोऽस्ति चेत्
व्याख्यातृत्वशिखामणित्वसरणिं प्राप्तो भवेयं ध्रुवम् ॥

व्याख्यानानि बहून्यस्य सन्तीति विबुधा मम ।
कृता(तौ)कुर्वन्ति नोपेक्षां रसज्ञास्ते यतस्स्वयम् ॥

अवक्तव्योक्तिवक्तव्यत्यागदोषविवर्जिता ।
अन्वयक्रमतो व्याख्या क्रियते सर्वसम्मता ॥

बालगोपालचरिते बालबोधकृतः कृतेः ।
लालिताया बुधैर्हानिर्बालिशानादरेण का ॥
सम्पूर्णभगवत्स्नेहदशासम्मेळनोज्वला ।
आकल्पं कल्पतां वृद्धैः दशमस्कन्धदीपिका ॥
श्रीरामानुजसिद्धान्तविशिष्टाद्वैतबोधिका ।
शुकतात्पर्यरत्नावल्याख्या व्याख्यास्तु सन्मुदे ॥
श्रीशावतारदशकं शुकतो निशम्य
कृष्णावतारचरिताधिकजाततृष्णः ।
श्रोतुं तदिन्दुरविवंश्यनृपालचर्या-
ख्यानानुवादमिह सन्तनुते परीक्षित् ॥

कथित इति । हे मुनिसत्तम भवता सोमसूर्ययोः वंशविस्तारः कथितः । उभयवंश्यानां सोमसूर्यवंशभवानां राज्ञाश्च परमाद्भुतं चरितं कथितमिति लिङ्गव्यत्ययेन योजना । धर्मशीलस्य यदोश्च यदोस्तु परमाद्भुतश्चरितं नितरां कथितमित्यनुकर्षः । तत्र यदुवंशे अंशेनावतीर्णस्य दीपादुत्पन्नप्रदीपवदप्राकृतदिव्यविग्रहैकदेशतया अंशशब्दवाच्येन विग्रहेण सहाविर्भूतस्येत्यर्थः ॥

* * * *

Colophon:

इति शुकतात्पर्यरत्नावल्याख्यायां दशमस्कन्धदीपिकायां प्रथमोऽध्यायः ॥

End:

द्वारकायामिति । हे राजन् द्वारकायां रुक्मिण्या रमया रुक्मिणीरूपया लक्ष्म्या उपेतं कृष्णं श्रियः पतिं कृष्णरूपं श्रीनिवासं दृष्ट्वा पुरौकसां द्वारकावासिनां महान् मोदोऽभूत् । परमपदे श्रीसमेतं वासुदेवं दृष्ट्वा विष्वक्सेनादिस.

Colophon:

इति शुकतात्पर्यरत्नावल्याख्यायां दशमस्कन्धदीपिकायां चतुःपञ्चाशोऽध्यायः ॥

प्रद्युम्नोत्पत्तिकथामङ्कुरयति कामस्त्विति ।

* * * *

विचित्रसृष्टिसामर्थ्यं च ददौ स इति ॥

No. 2231. भागवतव्याख्या—शुकतात्पर्यरत्नावलिः.

BHĀGAVATAVYĀKHYĀ : ŚUKATĀTPARYA-RATNĀVALIḤ.

Substance, palm-leaf. Size, 19¾ × 1½ inches. Pages, 149. Lines, 9 on a page. Character, Telugu. Condition, good. Appearance, old.

Adhyāyas 60 to 91 in the 10th Skandha.

Vīrarāghava is herein said to have had the title of Amṛtakavi given to him by Rāmānujārya of Vādhūla-gōtra.

Beginning :

राजेति । पृच्छतीति शेषः । सर्वासां महिषीणान्तु सर्वास्वपि महिषीषु विष्णुर्मय्येव प्रेमवानिति निश्चितचेतसाम् एवं निर्णीतमनस्कासु सतीषु गोविन्दासक्तचेतसां गोविन्दाधीनमनस्कासु सतीषु कृष्णस्सर्वासु समो वा तुल्यप्रीतिको वा अथ वा न चेदेकस्यां पुनरनुरक्तो वा पुनश्शब्दो वाक्यालङ्कारे । तत्कृष्णानुरागभेदं शंस हे प्रभो सर्वज्ञ तच्छ्रोतुं मम भक्तिः प्रीतिरस्ति । श्रीशुक आहेति शेषः । महिषीणामिति ॥

Colophon :

इति शुकतात्पर्यरत्नावळ्याख्यायां दशमस्कन्धदीपिकायां षष्टितमोऽध्यायः ॥

End :

कृष्णस्य पदयोः पादारविन्दयोरनुवृत्तिमिच्छन् पुरुषः श्रूयात् शृणुयादित्यर्थः । श्रवणफलमाह मर्त्य इति । मर्त्यो मरणधर्मा पुरुषः श्रीमत्कथाश्रवणकीर्तनचिन्तया श्रीमतः कृष्णस्य कथाश्रवणं, कीर्तनं तन्नामकीर्तनं, चिन्ता तद्विग्रहध्यानम्; तया तद्रूपया अनुसवमनुदिनमनुपूजनं

वा एधितया वर्धितया तया अनुवृत्तिमिच्छन्निति पूर्वश्लोकोक्तयानुवृत्त्या। दुस्तरकृतान्तजवापवर्गम्—दुस्तरस्य तर्तुमशक्यस्य कृतान्तजवस्य यमवेगस्य यमवेगवत्स्थितस्य संसारवेगस्य वा अपवर्गं मोक्षमेति प्राप्नोति। यदर्थाः यन्मोक्षप्रयोजनकाः। क्षितिभुजो राजानो ग्रामात् स्वस्थानात् वनं तपोवनम्। ययुः यान्तीत्यर्थः। भूतत्वस्याविवक्षितत्वादिति ॥

Colophon:

इति श्रीशुकतात्पर्यरत्नावळ्याख्यायां दशमस्कन्धदीपिकायाम् एकनवतितमोऽध्यायः ॥

समाप्तश्च दशमस्कन्धः ॥

सारासारविचारचारुधिषणा निर्मत्सरास्सत्कृपाः
सन्तः पश्यत दत्तदृष्टि दशमस्कन्धस्य टीकामिमाम्।
स्याच्चेदत्र गुणो भवाम्यहमनुग्राह्यः कृतार्थश्च वो
युष्मत्प्रीत्युदयेन कृष्णकरुणापात्रत्वमप्याप्नुयाम् ॥
वाधूलधुर्यविबुधावलिवर्ण्यचर्य-
रामानुजार्यकलितामृतकव्यभिरव्यः।
श्रीवीरराघवगुरुर्विवृतिं चकार
स्कन्धस्य साधु दशमस्य समस्ततुष्ट्यै ॥

No. **2232.** भागवतव्याख्या.

BHĀGAVATAVYĀKHYĀ.

Substance, paper. Size, $7\frac{1}{2} \times 4\frac{1}{8}$ inches. Pages, 54. Lines, 15 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 12*a*. The other works herein are Gadyatraya 1*a*, Viṣṇupāramyavacanāni 39*a*.

This is a commentary on certain verses in the 6th, 7th, 8th and 11th Skandhas of the Bhāgavata; said to be by Vīrarāghava.

No. 2233. भागवतम्—सव्याख्यानम्.

BHĀGAVATAM WITH COMMENTARY.

Substance, paper. Size, 12¾ × 6 inches. Pages, 292. Lines, 12 on a page. Character, Dēvanāgarī. Condition, good. Appearance, old.

Skandha 4, complete.

The commentary is by Vijayadhvajabhaṭṭāraka and is called Padaratnāvali.

Beginning:

(व्या)

पशुपतिरपि प्रेक्षादक्षो यतोऽगमदुन्नतिं
सकलजनतावन्द्यं स्थानं ध्रुवो यदनुग्रहात् ।
पृथुरथ महीदोहात्कीर्तिं शुभां समपीपदत्
तमिममजितं वन्दारूणाममन्दमुदं नुमः ॥
अभिनवरविप्रद्योतालीविभासिवपुःश्रियं
हरिहयहरब्रह्मश्लाघ्यप्रभूतसदाशिषम् ।
कमलनयनस्वातन्त्र्येक्षादयादरसत्क्रियां
शरणमनिशं विश्वस्यास्योदयां श्रियमीमहे ॥
तृतीयस्कन्धजलधेरुन्मग्नोऽहं कथञ्चन ।
चतुर्थस्कन्धसरसीमवगाढुं पुनर्यते ॥
मानेतिहाससङ्घातैरच्युताङ्घ्रिसरोरुहे ।
आत्मप्रद्योतनी भक्तिः पुनश्च प्रतिपाद्यते ॥

अत्रादौ हरौ निरतिशयप्रेमलक्षणभक्तिविधानाय पशुपतेर्दक्षाध्वरध्वंसलक्षणं चरितं वक्तुं स्वायम्भुवमनुचरितमनुवदति मनोस्त्विति.

(मू)

मैत्रेय उवाच—

मनोस्तु शतरूपायां तिस्रः कन्याः प्रजज्ञिरे ।
आकूतिर्देवहूतिश्च प्रसूतिरिति विश्रुताः ॥

"पुनः पुनः कथां प्राहुरभ्यासादुत्तमं फलम् ।
विज्ञापयितुकामास्तु विद्वांसस्तत्र तत्र तु ॥"

(व्या)

इति वचनात् पुनरुक्तकथानुवादो न दोषायेति ज्ञातव्यम् । विशेषवाचिना तुशब्देनापि फलाधिक्यं विशिनष्टि । द्वौ पुत्रौ चेति । पुत्रानुकर्षणार्थश्चकारः । भ्रातृमतीमप्याकूतिं पुत्रिकाधर्ममाश्रित्य रुचये प्रादादित्यन्वयः ॥

* * * *

Colophon:

इति श्रीमद्भागवते महापुराणे चतुर्थस्कन्धे दाक्षायणे प्रथमोऽध्यायः ॥

End:

नतेरष्टाङ्गत्वं द्योतयितुं मुनिं स्तौति सोऽयमिति :—

(मू)

सोऽयं तेन महायोगिन् भवता करुणात्मना ।
दर्शितस्तमसां पारो यत्राकिञ्चनगो हरिः ॥

यत्र तमसः पारे स्थितः । स्तुत्वा नत्वा पुनः किमकर्षीदित्याह तीति :—

इत्यानम्य तमामन्त्र्य विदुरो गजसाह्वयम् ।
स्वानां दिदृक्षुः प्रययौ ज्ञातीनां निर्वृताशयः ॥

स्वानां ज्ञातीनामिति कर्मणि षष्ठी । निवृत्ताशय इत्यनेन ज्ञातव्यां स्पर्शमूर्तिं दर्शयति । शुक एतस्य श्रोतुरैहिकामुष्मिकफलमाह एतद्यः इति—

एतद्यः शृणुयाद्राजन् राज्ञां हर्यर्पितात्मनाम् ।
आयुर्धनं यशः स्वस्ति गतिमैश्वर्यमाप्नुयात् ॥

Colophon :

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां चतुर्थस्कन्धे एक-त्रिंशोऽध्यायः ॥

संपूर्णश्चायं ग्रन्थः ॥

(व्या)

चतुर्थस्कन्धोऽयं हरिचरितरत्नावलिनिधिः
कथञ्चिद्व्याख्यातो हरिगुरुमहानुग्रहबलात् ।
महान्तः प्रीयन्तामनु(णु)गुणसुलुब्धाश्शुचिधियः
सहन्तां चावद्यं मम विवृतिमार्गे स्खलन्त(तन)ः ॥

सुमनस्सुमनोमौलौ लसन्ती मुरभिद्गले ।
पदरत्नावलिर्नाम वनमालेव राजताम् ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां चतुर्थस्कन्ध-टीकायाम् एकत्रिंशोऽध्यायः ॥

श्रीमद्भागवतचतुर्थस्कन्धस्सव्याख्यानस्समाप्तः ॥

No. 2234. भागवतव्याख्या—पदरत्नावली.

BHĀGAVATAVYĀKHYĀ: PADARATNĀVALĪ.

Substance, palm-leaf. Size, $13\frac{5}{8} \times 1\frac{1}{2}$ inches. Pages, 186. Lines, 10 on a page. Character, Nandināgarī. Condition, injured. Appearance, old

The commentary is by Vijayadhvaja, who is here said to be a pupil of Mahēndratīrtha.

Fourth Skandha, complete.

Same work as the above.

No. 2235. भागवतम्—सव्याख्यानम्.

BHĀGAVATAM WITH COMMENTARY.

Substance, paper. Size, $12\frac{3}{4} \times 6$ inches. Pages, 278. Lines, 15 on a page. Character, Dēvanāgarī. Condition, good. Appearance, old.

Adhyāyas 1 to 48 in the 10th Skandha.

Same work as the above.

Beginning :

(मू.)

राजोवाच—

कथितो वंशविस्तारो भवता सोमसूर्ययोः ।
राज्ञां चोभयवंश्यानां चरितं परमाद्भुतम् ॥
यदोश्च धर्मशीलस्य नितरां मुनिसत्तम ।
तत्रांशेनावतीर्णस्य विष्णोर्वीर्याणि शंस नः ॥

(व्या)

नवमस्कन्धान्ते संक्षिप्योक्तं श्रीविष्णुचरितं विस्तरतः श्रोतुं राजा मुन्न(उक्त)मनूद्य वक्तुं प्रार्थयते कथितो वंशविस्तार इत्यादिना । विद्यया-जन्मना चैकलक्षणः सन्तानो वंशः तत्र भ[1]वो वंश्यः व्यासः प्रपञ्चो वि-स्तार इत्यभिधानम् । राज्ञां चरितं च कथितम् । कथने निमित्तमाह परमेति । अत्र विशेषमाह यदोरिति । यदोर्ययातिपुत्रस्य वंशो नितरां कथितः । धर्मो भगवान् तत्समाधियुक्तस्य शीलसमाधाविति धातुः । अस्तु नाम ततः किमपेक्षितमिति तत्राह तत्रेति । यत्र यदोर्वंशे वी-र्याणि पराक्रमान् । तात्पर्यात्पुनरुक्तमेवाह अवतीर्येति ॥

*   *   *   *

Colophon :

इति श्रीमद्भागवते दशमस्कन्धे टीकायां पदरत्नावल्यां प्रथमोऽध्यायः॥

End :

(मू.)

यो दुर्विमर्शपथया निजमाययेदं
सृष्ट्वा गुणान्विभजते तदनुप्रविष्टः ।
तस्मै नमो दुरवबोधविहारतन्त्र-
संसारचक्रगतये परमेश्वराय ॥

श्रीशुकः—

इत्यभिप्रेत्य नृपतेरभिप्रायं स यादवः ।
सुहृद्भिरसमनुज्ञातः पुनर्यदुपुरीमगात् ॥

शशंस कृष्णरामाभ्यां धृतराष्ट्रविचेष्टितम् ।
पाण्डवान्प्रति कौरव्य यदर्थं प्रेषितः स्वयम् ॥

Colophon:

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां दशमस्कन्धे अष्टचत्वारिंशोऽध्यायः ॥ पूर्वार्धस्समाप्तः ॥

(व्या)

दुर्विमर्शपथया दुर्विज्ञेयमार्गया दुरवबोधः दुर्ज्ञेयः विहारः सृष्ट्यादिव्यापारलक्षणा क्रिया तस्य तन्त्वा अधीना संसारचक्रगतिः संसारावृत्तिप्रकारः यस्य स तथा तस्मै । इत्यभिप्रेत्य ज्ञात्वा ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां दशमस्कन्धटीकायां पदरत्नावल्यां विजयध्वजीये अष्टचत्वारिंशोऽध्यायः ॥

श्रीमद्भागवते दशमस्कन्धे पूर्वार्धस्समाप्तः ॥

No. **2236.** भागवतम्—सव्याख्यानम्.

BHĀGAVATAM WITH COMMENTARY.

Substance, paper. Size, 12⅜ × 6 inches. Pages, 288. Lines, 13 on a page. Character, Dēvanāgarī. Condition, good. Appearance, old.

Adhyāyas 49 to 103 in the 10th Skandha.

Same work as the above.

Beginning:

श्रीमद्भागवते दशमस्कन्धे उत्तरार्धप्रारम्भः ।

सच्छास्त्रस्यासच्छास्त्रेणेव कतिपयेष्वध्यायेषु श्रीकृष्णस्य जरासन्धेन सह सङ्ग्रामं वर्णयति । तत्त्वनिर्णये सदसतां भक्तिद्वेषाभ्याम् उद्भवाभ्यां विहितनिर्वाणावाप्तिर्भवति । तत्र कथां प्रसञ्जयितुमाह अस्तीति.

श्रीशुक उवाच—

(मू.)

अस्तिप्रास्तीति कंसस्य महिष्यौ भरतर्षभ ।
हते भर्तरि दुःखार्ते ईयतुः स्वपितुर्गृहान् ॥

अस्तिप्रास्तिशब्दाभ्यामविद्याया द्वे रूपे संशयविपरीतज्ञाननामनी उच्येते । तत्र संशये ज्ञानसत्तामात्रमस्ति । विपरीते तदपि नास्तीति अस्ति प्रास्ति अस भुवि भूसत्तायामिति धातोः । यद्वा निश्चायकप्रमाणाभावेन निश्चयज्ञानाभावात् संशयविपरीतज्ञानवाचकावेतौ, अस निरसन इति धातोः । कंसस्य महिष्यौ कसि हिंसायामिति धातोः । हिंसात्मानोऽधर्मस्य महिमसंबन्धकत्वेन सम्बन्धिन्यौ । पितृ बन्धन इति धातोः कृष्णनाम्ना धर्मेण भर्तरि स्वनिर्वाहके कसनाम्नि अधर्मे हते विनाशिते स्वपितुः स्वपोषकस्य जरासन्धस्य । जॄ वयोहानाविति धातोः वयोहानिहेतुभूता शैवी शास्त्रसंहिता जरेत्युच्यते । तस्यां सन्धा मरणायत्तावपि न मुञ्चामीति प्रतिज्ञा यस्य सः तथा । तस्य गृहान् प्रमेयविशेषानीयतुः । प्राप्य स्थिते शब्दशक्तिविचक्षणैः पुरुषैरध्यात्मविषयतया अत्रार्थो ज्ञातव्य इति ग्रन्थबाहुल्यभीरुणा मया न दर्श्यते इति.

* * * *

Colophon:

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे टीकायाम एकोनपञ्चाशोऽध्यायः ॥

End:

स्कन्धार्थमुपसंहरति य इदमिति—

(मू.)

य इदमनुशृणोति श्रावयेद्वा मुरारेः
चरितममृतकीर्तेर्वर्णितं व्यासपुत्रैः ।
जगदघभिदलं तद्भक्तकर्णावतंसं
भगवति कृतचित्तो याति तत्क्षेमधाम ॥

व्यासपुत्रैः शुकादिभिः जगतोऽघं पापं भिनत्तीति . . . . तद्भक्तानां कर्णावतंसं कर्णालङ्कार(।)[माणा]यमान(ण)म् । श्रवणादिफलमाह भगवतीति । क्षेमधाम मोक्षलक्षणं स्थानं श्रवणादि कुर्वता इत्थं भाव्य . . . . उक्तं भगवतीति

"सर्वोत्तमोऽपि भगवान् गुणाभावं जनार्दनः।
दर्शयेद्वासुदेवोऽपि ह्यात्मनो जीवतामपि ॥
अजाशक्रादिभावस्तु कुतस्तस्याखिलेशितुः।
कुत(तोऽ)स्य जीवतस्तस्य प्रधानं पुरुषेशितुः ॥
कुतो दोषास्सर्वगुणपूर्णस्यानन्दवारिधेः ॥"

(इ)त्येतत्प्रमाणम् अज्ञानेन कृष्णे क्रियमाणसर्वशङ्कानिराकरणार्थं भगवत्पादैः स्कन्धान्ते दर्शितमिति ज्ञातव्यम्।

योऽयाचि त्रिदशैः कुभारहृतयेऽवातारि येन क्षितौ
जज्ञे येन सुरासुहृत्सुहृदयो येन त्रिलोक्यापि सा।
येनाधायि युधिष्ठिरो निजपदे धर्मोऽपि येनाङ्कुरि
श्रीकृष्णं तमकृष्णकृष्णदयितं वन्दामहे सन्ततम् ॥
पदरत्नावलिर्नाम दशमकन्धसंगता।
कृष्णप्रीत्या समाप्तेयं विद्वन्मानसहर्षिणी ॥

Colophon:

इति श्रीमन्महेन्द्रतीर्थश्रीपादशिष्यस्य विजयध्वजतीर्थभट्टारकस्य कृतौ श्रीमद्भागवतटीकायां पदरत्नावळ्यां दशमस्कन्धे त्रिशततमोऽध्यायः ॥

श्रीमद्भागवते दशमस्कन्धे उत्तरार्धस्समाप्तः ॥

No. 2237. भागवतम्--सव्याख्यानम्.

BHĀGAVATAM WITH COMMENTARY.

Substance, paper. Size, $12\frac{3}{8} \times 7\frac{3}{4}$ inches. Pages, 1,286. Lines, 25 on a page. Character, Telugu. Condition, slightly injured. Appearance, new.

The first volume contains Adhyāyas 1 to 49 of the 10th Skandha; and the second Adhyāyas 50 to 90.

The commentary is by Nṛsiṁhasūri of Bhāradvāja-gōtra, son of Vāsudēvaguru, pupil of Śrīnivāsadēśika, entitled Śukahṛdaya-rañjanī.

The second volume is dated : 1830, 25th May.

Beginning :

कथित इत्यादिना ।

राजा—

कथितो वंशविस्तारः भवता सोमसूर्ययोः ।
राज्ञां चाभयवंश्यानां चरितं परमाद्भुतम् ॥
यदोश्च धर्मशीलस्य सुतरां मुनिसत्तम ।
तत्रांशेनावतीर्णस्य विष्णोर्वीर्याणि शंस नः ॥

यदोश्च वंशविस्तारः कथित इत्यन्वयः । तत्र यदुवंशे अंशेन कलयावतीर्ण इतीदं लौकिकप्रतीत्यभिप्रायेणोक्तम् । निरवयवस्य दिव्यात्मस्वरूपस्य अंशकल्पनायोगात् । नापि परशुरामादिवदावेशाभिप्रायेण । किन्तु ।

* * * *

Colophon :

इति श्रीमद्भरद्वाजकुलकमलभानुना श्रीनिवासगुरुसूनुना श्रीश्रीनिवासदेशिककृपालब्धपाण्डित्येन श्रीनृसिंहगुरुणा रचितायां दशमव्याख्यायां शुकहृदयरञ्जनीसमाख्यायाम् एकोनपञ्चाशत्तमोऽध्यायः ॥

दशमपूर्वभागस्समाप्तः ॥

1830, May 1st.

* * * *

इति श्रीमद्भागवते महापुराणे दशमस्कन्ध[स]व्याख्यायां शुकहृदय रञ्जन्यां पञ्चाशोऽध्यायः ॥

End :

(व्या.)

श्रीमत्याः कथायाः श्रवणकीर्तनयुक्तया चिन्तया एधितया वर्धितया अनुवृत्त्या तन्निष्ठत्वेन तस्य धाम अमृतम् एति प्राप्नोति । निरतिशयं निरवधिकं निरन्तरसुखं प्राप्नुवन्तीत्यर्थः ॥

Colophon:

इति श्रीमद्भागवते महापुराणे पारमहंस्यां वैयासिक्यामष्टादश सहस्रसंहितायां दशमस्कन्धसुव्याख्यायां शुकहृदयरञ्जनीसमाख्यायां नवतितमोऽध्यायः ॥

समाप्तोऽयं दशमस्कन्धः ॥
बिन्द्वाद्यक्षरदोषा ये लेखकस्य प्रमादतः ।
प्राप्तास्ते शिङ्गरार्येण शोधितास्स्युर्यथामति ॥

No. **2238.** भागवतव्याख्या—भागवततात्पर्यचन्द्रिका.

BHĀGAVATAVYĀKHYĀ: BHĀGAVATATĀTPARYA-CANDRIKĀ.

Substance, palm-leaf (Śrītāla). Size, 19 × $2\frac{1}{8}$ inches. Pages, 336. Lines, 12 on a page. Character, Grantha. Condition, good. Appearance, old.

Skandha 10; complete.

The commentary is by Vēṅkaṭakṛṣṇa, son of Kṛṣṇārya of Kauśika-gōtra, and pupil of Vēṅkaṭavaradārya.

Beginning:

परीक्षित्। कथित इति। हे ब्रह्मन् भवता सोमसूर्ययोः वंशविस्तरः कथितः। उभयवंश्यानां सोमसूर्यवंशसंभवानां राज्ञां परमाद्भुतं चरितञ्च कथितम्। तथा नितरां धर्मशीलस्य यदोश्चरितञ्च हे मुनिसत्तम कथितं, तत्र यदुवंशे अंशेनावतीर्णस्य भगवतः विष्णोः वीर्याणि नोऽस्माकं शंस कथय। अवतीर्येति। विश्वात्मा जगदन्तर्यामी जगच्छरीरकतया जगद्रूपो वा भूतभावनः। निखिलजगदुत्पादकः तद्रक्षको वा भगवान् श्रीकृष्णः यानि कर्माणि कृतवान् तानि विस्तरान्नो वद। निवृत्तेति।

End:

अपवर्गं निवृत्तिसाधनं तद्धाम तस्य भगवतः धाम परमव्योमशब्दाभिधेयं परमं धाम एति प्राप्नोति। क्षितिभुजः महाराज्याधिकारिणः। स्वायंभुवप्रियव्रतध्रुवपृथ्वादिराजा अपि यदर्थाः यत्परमं धाम

प्रार्थयन्तस्सन्तः ग्रामाद्वनं ययुः । पुरवरग्रामादीन् विहाय वनमेव तपसे ययुः ।

Colophon :

इति श्रीमद्वेङ्कटकृष्णविरचितायां श्रीभागवततात्पर्यचन्द्रिकायां दशमस्कन्धे एकनवतितमोऽध्यायः ॥

श्रीमत्कौशिकवंशवारिधिचन्द्रस्य श्रीकृष्णार्यस्य सूनुना श्रीमद्वेङ्कटवरदार्यस्य कृपालब्धविद्येन श्रीमद्वेङ्कटकृष्णार्यनामकबुधेन विरचितायां श्रीभागवततात्पर्यचन्द्रिकायां दशमस्कन्धव्याख्या संपूर्णा ॥

No. 2239. भागवतव्याख्या--भागवततात्पर्यचन्द्रिका.

BHĀGAVATAVYĀKHYĀ : BHĀGAVATATĀTPARYA-CANDRIKĀ.

Pages, 264. Lines, 10 on a page.

Begins on fol. 1a of the MS. described under No. 2186

Skandha 10, breaks off in the 42nd Adhyāya.

No. 2240. भागवतव्याख्या—भागवततात्पर्यचन्द्रिका.

BHĀGAVATAVYĀKHYĀ : BHĀGAVATATĀTPARYA-CANDRIKĀ.

Substance, palm-leaf. Size, $16\frac{1}{8} \times 1\frac{5}{8}$ inches. Pages, 114. Lines, 9 on a page. Character, Grantha. Condition, injured. Appearance, old.

The first leaf is wanting.

Skandha 10 ; breaks off in the 26th Adhyāya.

Same work as the above.

No. 2241. भागवतव्याख्या--भागवततात्पर्यचन्द्रिका.

BHĀGAVATAVYĀKHYĀ : BHĀGAVATATĀTPARYA-CANDRIKĀ.

Substance, palm-leaf. Size, $15\frac{1}{4} \times 1\frac{1}{2}$ inches. Pages, 292. Lines, 7 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Adhyāyas 60 to 89 in the 10th Skandha, 90th, incomplete.
Same as the above.

Beginning:

तस्याः रुक्मिण्याः श्लथद्वलयतः दुःखातिशयप्रयुक्तदेहकार्श्येन विगलद्वलयात् हस्ताद्व्यजनं पपात । विक्लबधियः खिन्नबुद्धेः तस्या देहः मुह्यन् सन् मूर्च्छां प्राप्तस्सन् वातनिहतरम्भेव कदलीव केशान् प्रविकीर्य सहसैव पपात । तदिति । हास्यप्रौढिमजानन्त्याः प्रियायाः रुक्मिण्याः प्रेमबन्धनं प्रेमातिशयबन्धतां दृष्ट्वा भगवान् कृष्णः करुणस्सन् दयाविष्टस्सन् किमर्थं मयैवमुक्तमित्यन्वतप्यत । पर्यङ्कादिति । चतुर्भुजो भगवान् कृष्णः अथ पर्यङ्कादाश्ववरुह्य केशान् सम्मुह्य तद्वक्रं रुक्मिण्याः मुखारविन्दं पद्मपाणिना पद्मतुल्येन स्वपाणिना प्रामृजत् ॥

* * * *

Colophon:

इति श्रीवेङ्कटकृष्णविरचितायां श्रीभागवततात्पर्यचन्द्रिकायां दशमस्कन्धे षष्टितमोऽध्यायः ॥

श्रीशुकः । एकैक इति । कृष्णस्य ताः अबलाः जायाः एकैकशः सर्वात्मसंपदा सर्वविधसंपदा पितुरनुपमान् दश दश पुत्रान् अजीजनन् जनयामासुः ॥

End:

कथामृतं यः पुरुषः श्रवणपुटैः अभीक्ष्णं पिबति । सः संसारभ्रमणपरिश्रमं संसारभ्रमणप्रयुक्तं परिश्रमं जहाति त्यजति मुक्तो भवतीत्यर्थः ।

Colophon:

इति वेङ्कटकृष्णविरचितायां श्रीभागवततात्पर्यचन्द्रिकायां श्रीभागवते दशमस्कन्धे एकोननवतितमोऽध्यायः ॥

श्रीशुकः एकदेति । हे भारत एकदा कालविशेषे द्वारवत्यां द्वारकायां विप्रपत्न्याः कुमारकः जातमात्रः तत्कालजातस्सत्य(द्यो)भुवं स्पृष्ट्वा ममार किल । विप्र इति । सः विप्रः मृतकं बालं गृहीत्वा राजद्वारि

उपाधाय विलपन्नातुरो दीनमानसस्सन् इदं वक्ष्यमाणं प्रोवाच ब्रह्मेति ॥

*　　　*　　　*　　　*

द्विजात्मजा इति। भुवि धर्मगुप्तये अवतीर्णयोर्युवयोः दिदृक्षुणा मया द्विजात्मजाः उपानीताः मम कलावतीर्णौ अंशेनावतीर्णौ युवाम् अवनेः भरासुरान् भूमेर्भारायितानसुरान् हत्वा इह लोके भूयः त्वरया मे अन्तिमम् अन्तिकं प्रत्येतम् आगच्छतम् इति तावाह पूर्णेति। पूर्णकामावपि युवां लोकसङ्ग्रहौ ऋषभौ भूत्वा स्थित्यै जगत्परिपालना.

No. 2242. भागवतव्याख्या.

BHĀGAVATAVYĀKHYĀ.

Substance, paper. Size, $11\frac{3}{4} \times 7\frac{1}{2}$ inches. Pages, 934. Lines, 26 on a page. Character, Telugu. Condition, good. Appearance, new.

Skandhas 2 to 8 (11 Adhyāyas).

The commentary is by Buccana Paṇḍita.

Beginning:

वरीयानिति। हे नृप लोकहितं कृतघ्नः कलिपुरुषनिरोधनेन जगद्धितकारिणेस्त(णस्तु) परिक्षिदाख्यस्य तव यः प्रश्नः। भगवत्कथाया इति शेषः । स एषः पुंसां श्रोतव्याधि(दि)षु वर्णाश्रमोचितधर्माणां श्रवणमननादिषु परः श्रेष्ठगोचरः। एतत्प्रतिवचनात्मकश्रीभागवतस्य मोक्षादिसर्वाभीष्टप्रदत्वादिति भावः । आत्मवित्संमतः भगवत्पारतन्त्र्यविदामिष्टः। अतो वरीयान् श्रेष्ठतरः । ईयसुन्प्रत्ययेन ज्ञापितं प्रश्नोत्कृष्टं तत्प्रतिवचनात्मके पुराणश्रेष्ठे भागवते पर्यवस्यतीति ज्ञेयम् ।

श्रोतव्यादीनीति ।

End:

बलिरिति । उशनसा शुक्रेण स्पृष्टः बलिश्च प्रत्यापन्नेन्द्रियस्मृतिः पुनः पापैरिन्द्रियैस्स्मृत्या च युक्तस्सन् लोकतत्त्वविचक्षणः भगवत्सङ्कल्पायत्तं जगदिति लोकतत्त्वाभिज्ञः पराजितोऽपि नाखिद्यत् खेदं न प्राप्तवान् ॥

Colophon:

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायामष्टमस्कन्धान्वये एकादशोऽध्यायः ।

No. 2243. भागवतव्याख्या—सुबोधिनी.

BHĀGAVATAVYĀKHYĀ: SUBŌDHINĪ.

Substance, paper. Size, $7\frac{5}{8} \times 4\frac{1}{8}$ inches. Pages, 848 Lines, 12 on a page. Character, Grantha. Condition, good. Appearance, new.

Bound in two volumes; Skandha 1; Adhyāyas 1 to 9 in the first volume, and 10 to 19 in the second volume.

A commentary on the Bhāgavata by Vallabhadīkṣita, son of Lakṣmaṇasūri. This author is the founder of a sect of the Vaiṣṇava religion. For extracts see No. 46*a* on page 138 of the Report on a Search for Sanskrit and Tamil MSS. by M. Seshagiri Sastri: No. 1

No. 2244. भागवतव्याख्या—सुबोधिनी.

BHĀGAVATAVYĀKHYĀ: SUBŌDHINĪ.

Substance, paper. Size, $10\frac{1}{8} \times 4\frac{5}{8}$ inches. Pages, 979. Lines, 10 on a page. Character, Dēvanāgarī and Grantha (Vol. II.). Condition, good. Appearance, new.

Bound in two volumes.

Skandha 3; Adhyāyas 1 to 18 in the first volume; and 19 to 33 in the second volume.

No. 2245. भागवतव्याख्या—सुबोधिनी.
BHĀGAVATAVYĀKHYĀ : SUBŌDHINĪ.

Substance, paper. Size, 10 × 4⅝ inches. Pages, 804. Lines, 10 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Volume I contains Adhyāyas 10 to 20, and Vol. II contains 21 to 34, in the Uttarārdha of the 10th Skandha, the 35th being incomplete.

For extracts see 46*c* on page 141 of the Report on a Search for Sanskrit and Tamil MSS. by M. Seshagiri Sastri : No. 1.

No. 2246. भागवतव्याख्या—सुबोधिनी.
BHĀGAVATAVYĀKHYĀ : SUBŌDHINĪ.

Substance, paper. Size, 9⅝ × 4⅜ inches. Pages, 289. Lines, 14 on a page. Character, Grantha. Condition, good. Appearance, new.

Skandha 10, Adhyāyas 12 to 21.

For extracts see 46*b* on page 140 of the Report on a Search for Sanskrit and Tamil MSS. by M. Seshagiri Sastri : No. 1.

No. 2247. भागवतसाहित्यमञ्जूषा.
BHĀGAVATASĀHITYAMAÑJŪṢĀ.

Substance, paper. Size, 8¼ × 6⅝ inches. Pages, 96. Lines, 22 on a page. Character, Grantha. Condition, good. Appearance, new.

Complete.

By Bhaṭṭavēṅkaṭa. For notice and extracts see pages 20 and 147 of the Report on a Search for Sanskrit and Tamil MSS. by M. Seshagiri Sastri : No. 1.

No. 2248. भागवतम्—सव्याख्यानम्.
BHĀGAVATAM WITH COMMENTARY.

Substance, palm-leaf. Size, 19 × 1⅜ inches. Pages, 43. Lines, 9 on a page. Character, Telugu. Condition, good. Appearance, old.

Adhyāyas 56 to 95 in the 10th Skandha.

This commentary is by Appāji Paṇḍita of Bhāradvāja-gōtra belonging to Guṇḍumalla family. He was a pupil of one Cannu-bhaṭṭa.

Copied by Nāganna, son of Kṛṣṇama, son of Nāgarāja of Tātayyapalli.

Beginning :

श्रीशुकः—

तं विलोक्य विनिष्क्रान्तमुज्जिहानमिवोडुपम् ।
दर्शनीयतमं श्यामं पीतकौशेयवाससम् ॥
श्रीवत्सवक्षसं भ्राजत्कौस्तुभामुक्तकन्धरम् ।
पृथुदीर्घचतुर्बाहुं नवकञ्जारुणेक्षणम् ॥

* * * *

(व्या)—

श्रीशुकः । तमित्यादि । उज्जिहानम् उद्यन्तम् । उडुपं चन्द्रमिव, दर्शनीयतमम् अत्यादरेण द्रष्टुं योग्यं, विनिष्क्रान्तं पुरद्वारान्निर्गतं, श्यामं श्यामलवर्णं, पीतकौशेयवाससं पीताम्बरधरं, श्रीवत्सवक्षसं वक्षसि श्रीवत्सलाञ्छनेन युक्तं, भ्राजत्कौस्तुभामुक्तकन्धरं प्रकाशमानकौस्तुभालङ्कृतग्रीवं, पृथुदीर्घचतुर्बाहुं पीनायतबाहुचतुष्टययुक्तम् ॥

* * * *

Colophon :

इति श्रीमद्भागवते दशमस्कन्धान्वये षट्पञ्चाशोऽध्यायः ॥

End :

(मू.) मर्त्यस्तयानुसवमेधितयानुवृत्त्या
श्रीमत्कथाश्रवणकीर्तनचिन्तयैति ।
तद्धाम दुस्तरकृतान्तजवापवर्गं
ग्रामाद्वनं क्षितिभुजोऽपि ययुर्यदर्थाः ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां श्रीदशमस्कन्धे पञ्चनवतितमोऽध्यायः ॥ स्कन्धस्समाप्तः ॥

(व्या.)

धाम्नो दुर्लभत्वमाह—ग्रामादिति । क्षितिभुजः भोगलम्पट(।)राजानोऽपि । यदर्थाः धामप्राप्तिप्रयोजनास्सन्तः । ग्रामात् वनं ययुरिति ॥

Colophon:

इति श्रीमद्भरद्वाजगोत्रगुण्डुमल्लवंशोत्पन्नेन श्रीपराशरभट्टार्यकृपालब्धभगवत्कथामृतास्वादनयोग्यतायुक्तेन श्रीमच्चन्द्रभट्टार्यदत्तवैष्णवधर्मयुक्तेन श्रीकृष्णभक्तिपरायणेन अप्पाजिपण्डितेन विरचिते श्रीमद्भागवतदशमस्कन्धान्वये पञ्चनवतितमोऽध्यायः ॥

No. 2249. भागवतव्याख्या.

BHĀGAVATAVYĀKHYĀ.

Substance, palm-leaf. Size, $17\frac{1}{4} \times 1\frac{5}{8}$ inches. Pages, 222. Lines, 6 on a page. Character, Telugu. Condition, slightly injured. Appearance, new.

Adhyāyas 1 to 15—complete; 16th, incomplete in the 10th Skandha.

Anonymous.

Beginning:

दशमस्कन्धे पूर्वभागः ।

अतिक्रान्तस्कन्धान्ते "जातो गतः पितृगृहात्" इति श्लोकद्वयेन सङ्गृह्य प्रदर्शितं श्रीकृष्णावतारचरित्रं विस्तरेण शुश्रूषुरतिक्रान्तस्कन्धार्थानुवादपूर्वकं पृच्छति राजा कथित इत्यादिभिः त्रयोदशभिः । तत्र पूर्वस्कन्धार्थमनुवदति कथित इति सार्धेन । सोमसूर्ययोस्तदुभयवंशजानां राज्ञां वंशविस्तारस्तेषां परमाद्भुतं च चरित्रं कथितम् । हे मुनिसत्तम नितरां धर्म एव शीलं वृत्तं यस्य तस्य यदोर्वंशविस्तारः कथितः । अधुना तत्र यदोर्वंशे अंशेन बलरामेण सहावतीर्णस्य, यद्वा सङ्कल्परूपज्ञानेन वा दिव्यविग्रहांशेन वा । अन्यथा "एते चांशकला विष्णोः कृष्णस्तु भगवान् स्वयम्" इति पूर्वोत्तरव्याघातापत्तेः ॥

* * * *

Colophon :

इति श्रीमद्भागवतव्याख्यायां दशमस्कन्धे प्रथमोऽध्यायः ॥

* * * *

इति दशमस्कन्धे पञ्चदशोऽध्यायः ॥

End :

भुजङ्गस्तं कृष्णं मर्मसु सन्दश्य चचार वेष्टितवान् । कथंभूतम्? प्रेक्षणीयश्च सुकुमारश्च घनवन्निर्मलश्च . . . . वत्सशब्दोऽत्र अर्शआद्यजन्तः, श्रीवत्सयुक्तं, पीतं वस्त्रं यस्य तं, तं च स्मितेन सुन्दरमाननं यस्य, प्रतिपक्षाद्भयरहितं, कमलवदुदरमङ्गी च यस्य तं, नागस्य भोगेन देहेन वेष्टितम् । अत एवात्मेतरैरलक्षिता चेष्टा यस्य तं, कृष्णम्.

No. 2250. भागवतव्याख्या.

BHĀGAVATAVYĀKHYĀ.

Substance, palm-leaf. Size, $17\frac{1}{4} \times 1\frac{1}{2}$ inches. Pages, 172. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Adhyāyas 16 to 39 in the 10th Skandha, complete; 40th, incomplete.

Beginning :

कालाय कालनाथा(भा)य कालावयवसाक्षिणे ।
विश्वाय तदुपद्रष्ट्रे तत्कर्त्रे विश्वहेतवे ॥

सत्त्वादिप्रकृतिगुणक्षोभनिमित्तकालस्यापि पृथङ्निमित्ततान्युदासाय. तत्सामानाधिकरण्यनिर्देशः । कालायेति । कालात्मकायेत्यर्थः । तदात्मकत्वं न मृदात्मको घट इतिवत्स्वरूपाभेदनिबन्धनमपित्वात्मा देहोपजायत इतिवच्छरीरात्मभावनिबन्धनमित्यभिप्रायेणाहुः । कालनाभायेति ॥

* * * *

Colophon :

इति दशमस्कन्धे षोडशोऽध्यायः ॥

* * * *

इति श्रीमद्भागवतव्याख्यायां दशमस्कन्धे एकोनचत्वारिंशोऽध्यायः ॥

End:

अत एव बुधो मृगतृष्णां जलवदवभासमानां मरीचिकामभ्येति। तथाहमपि त्वां निरतिशयपुरुषार्थभूतं तत्साधनभूतञ्च त्वां त्यक्त्वा प . . . . मुखे वर्तत इत्यर्थः । नन्वेवं जानतः कुतस्तव विषयाभिमुख्यं तत्राह नोत्सह इति। कृपणा विषयवासनायुक्ता धीर्यस्य सः अत एव . . त्तः कामकर्मभ्यां हतं क्षुभितम् इम.

No. 2251. भागवतव्याख्या.

BHĀGAVATAVYĀKHYĀ.

Substance, palm-leaf. Size, 16⅛ × 1⅝ inches. Pages, 83. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Skandha 7, complete.

Anonymous.

Beginning:

स्वपक्षपक्षपातेन परपक्षविदारणम् ।
नृसिंहमद्भुतं वन्दे परमानन्दविग्रहम् ॥
यदुक्तं पूर्वस्कन्धान्ते
हतपुत्रादितिः शक्रपार्ष्णिग्राहेण विष्णुना
मन्युना शोकदीप्तेन ज्वलन्ती पर्यचिन्तयदिति ।

तच्छ्रुत्वा विस्मितः परीक्षित्पृच्छति राजा । न हि समस्य सुहृदश्च वैषम्यं नामास्ति । वद । प्रियस्य प्रीतिकर्तृषु वैषम्यं युक्तमित्यर्थः । किञ्च यस्य यैः प्रयोजनं सिध्यति स ह तत्पक्षपाति(ती)भवति ; येभ्यो बिभेति तान् द्वेषेण हन्ति ; न तु तदस्तीत्याह ॥

* * * *

Colophon:

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां वैयासिक्यां सप्तमस्कन्धे चतुर्दशोऽध्यायः ॥

End:

श्रीकृष्णसेवा च महताम् अवज्ञया भ्रश्यति तत्कृपया सिध्यतीति दर्शयन् स्वपूर्ववृत्तान्तमाह सार्धैः पञ्चभिः । नाम्ना उपबर्हणः । पेशलं साकुमार्यं रूपादिभिः प्रियं दर्शनं यस्य । तत् आह्वानं विद्वान् उन्मत्तस्सन् गायन्नेव गतः । त्वन्तु कृतार्थ एवेति म(हा)हर्षेण पुनः पूर्वश्लोकेनेव पठति । शिष्टं स्पष्टम् ।

सप्तमस्कन्धस्समाप्तः ॥ समाप्ता च सप्तमस्कन्धव्याख्या ॥

No 2252. भागवतव्याख्या.
BHĀGAVATAVYĀKHYĀ.

Substance, palm-leaf. Size, 19¾ × 1¼ inches. Pages, 134. Lines, 7 on a page. Character, Grantha. Condition, slightly injured. Appearance, new.

Contains the following three different commentaries—Bhāgavatacandrikā by Vēṅkaṭakṛṣṇa, Vijayadhvajīyam by Vijayadhvaja, and Bhāvārthadīpīkā by Śrīdhara—for the first three stanzas: and contains the Śrīdharīya alone from the 4th stanza to the end of the 12th Adhyāya in the 1st Skandha.

No. 2253. भागवतव्याख्या.
BHĀGAVATAVYĀKHYĀ.

Substance, palm-leaf. Size, 19⅝ × 1¼ inches. Pages, 290. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, old.

Skandhas 11 and 12, complete. Contains also the text of the 11th Skandha, it breaking off in the 8th Adhyāya.

Not identified.

No. 2254. मत्स्यपुराणम्.
MATSYAPURĀṆAM.

Substance, paper. Size, 11¼ × 5¼ inches. Pages, 1,204. Lines, 11 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Complete.

This is one of the 18 Mahāpurāṇas principally describing the creation of the world and the incarnation of Viṣṇu as a fish. A list of contents is given in Aufrecht's Bodlean Library Catalogue, No. 95.

Beginning:

नारायणं नमस्कृत्य नरञ्चैव नरोत्तमम् ।
देवीं सरस्वतीञ्चैव ततो जयमुदीरयेत् ॥

अजोऽपि यः क्रियायोगात् नारायण इति स्मृतः ।
त्रिगुणाय त्रिवेदाय नमस्तस्मै स्वयंभुवे ॥

सूतमेकाग्रमासीनं नैमिशारण्यवासिनः ।
मुनयो दीर्घसत्रान्ते पप्रच्छुर्दिव्यसंहिताम् ॥

प्रवृत्तासु पुराणासु धर्म्यासु ललिताय(सु) च ।
कथासु शौनकाद्यास्तु वाभिनन्द्य मुहुर्मुहुः ॥

कथितानि पुराणानि यान्यस्माकं त्वयानघ ।
तान्येवामृतकल्पानि श्रोतुमिच्छाम ते पुनः ॥

* * * *

इति श्रीमत्स्यपुराणे मनुमत्स्यसंवादे प्रथमोऽध्यायः ॥

सूत उवाच—

एवमुक्तो मनुस्तेन पप्रच्छासुरसूदनम् ।
वर्षैः कियद्भिर्भगवन् भविष्यत्यन्तरक्षयः ॥

सत्त्वानि च (क)थं नाथ रक्षिष्ये मधुसूदन ।
त्वया सह पुनर्योगं(गः) कथं वा भविता मम ॥

End:

कृत्वाश्वमेधावभृत(थं) श्रीधराय शृणोति वा ।
श्रावयेद्वापि धर्मज्ञ तत्फलं शृणुत द्विजाः ॥

ब्राह्मणो लभते विद्यां क्षत्रियो लभते महीम् ।
वैश्यो धनमवाप्नोति शूद्रस्तु सुखवि(म)न्दति ॥

आयुष्मान् पुत्रवान् धन्यो लक्ष्मीवान्पापवर्जितः ।
श्रुत्वा पुराणमखिलं शत्रुभिश्चापराजितः ॥

Colophon:

इति श्रीमत्स्यपुराणे चतुर्दशसाहस्र्यां संहितायां [कं] फलश्रुतिकथनं नाम समाप्तश्चायम् । मत्स्यपुराणं समाप्तम् ॥

No. 2255. मार्कण्डेयपुराणम्.

MĀRKAṆḌĒYAPURĀṆAM.

Substance, paper. Size, 12 × 7⅝ inches. Pages, 640. Lines, 22 on a page. Character, Telugu. Condition, good. Appearance, new.

Complete in 138 Adhyāyas.

A Mahāpurāṇa. The contents of this Purāṇa are given in the introduction to Wilson's Viṣṇupurāṇa, page 32. A list of the contents is also found in this MS. at the end.

Beginning:

यद्योगिभिर्भवभयार्तिविनाशयोग-
मासाद्य वन्दितमतीव विविक्तचित्तैः ।
तद्वः पुनातु हरिपादसरोजयुग्म-
माविर्भवत्क्रमविलङ्घितभूर्भुवस्वः ॥

नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥

तपःस्वाध्यायनिरतं मार्कण्डेयं महामुनिम् ।
व्यासशिष्यो महातेजा जैमिनिः पर्यपृच्छत ॥

भगवन् भारताख्यानं व्यासेनोक्तं महात्मना ।
पूर्णं नवैः स्तवैश्शुभ्रैः नानाशास्त्रसमुच्चयैः ॥

* * * *

Colophon:

इति श्रीमार्कण्डेयपुराणे प्रथमोऽध्यायः ॥

End:

एतेषां नामधेयानि नित्यं यः पठते नरः ।
त्रिसन्ध्यं जपतो नित्यमश्वमेधफलं भवेत् ॥
एतस्मिन् कथितास्सर्वे इतिहासा(:) प्रवच्मि ते ।

अनुक्रमणिका—

Beginning:

मार्कण्डेयजैमिनिसमागमः ।
प्रश्नानुख्या . . . . . तम् ।
दूर्वास(:)पुनश्चरणशापः ।

End:

नरिष्यन्तचरितम् ।
धमचरितम् । सम्पूर्णम् ॥

Colophon:

इति श्रीमार्कण्डेयपुराणे श्रवणमाहिमा नामाष्टत्रिंशदुत्तरशततमोऽध्यायः ॥

No. 2256. मार्कण्डेयपुराणम्.

MĀRKAṆḌĒYAPURĀṆAM.

Substance, palm-leaf. Size, $16\frac{7}{8} \times 1\frac{3}{8}$ inches. Pages, 526. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old. Complete.

Same work as the above.

Dated: Sunday, the 5th of Vaiśākha-śuddha in the year Plavaṅga.

No. 2257. लिङ्गपुराणम्.
LIṄGAPURĀṆAM.

Substance, palm-leaf. Size, 18 × 1½ inches. Pages, 598. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, new.

Adhyāyas 1 to 159.

A Mahāpurāṇa treating mainly of Liṅga. A list of contents is given in Aufrecht's Bodlean Library Catalogue, No. 101.

Beginning:

नमो रुद्राय हरये ब्रह्मणे परमात्मने ।
प्रधानपुरुषेशाय सर्गस्थित्यन्तकारिणे ॥
नारदोऽभ्यर्च्य शैवेशे शङ्करं सङ्गमेश्वरे ।
हिरण्यगर्भे स्वर्लीने ह्यविमुक्ते महालये ॥
रौद्रे गोप्रेक्षके शैवश्रेष्ठे पाशुपते तथा ।
विघ्नेश्वरे च केदारे तथा गोमायुकेश्वरे ॥
हिरण्यगर्भे चन्द्रेशे ईशान्ये च त्रिविष्टपे ।
शुक्रेश्वरे यथान्यायं नैमिशं प्रययौ मुनिः ॥
नैमिशेयास्तदा दृष्ट्वा नारदं हृष्टमानसाः ।
समभ्यर्च्यासनं तस्मै तद्योग्यं समकल्पयन् ॥

* * * *

अथ तेषां पुराणस्य शुश्रूषा समपद्यत ॥
दृष्ट्वा तमतिविश्वस्तं विद्वांसं रौमहर्षणिम् ।
अपृच्छंश्च ततस्सूतमृषिं सर्वे तपोधनाः ॥

पुराणस(सं)हितां पुण्यां लिङ्गमाहात्म्यसंयुताम् ।

नैमिशेया ऊचुः—

त्वया सूत महाबुद्धे कृष्णद्वैपायनो मुनिः ।
उपासितः पुराणार्थं लब्धा तस्माच्च संहिता ॥

तस्माद्भवन्तं पृच्छामस्सूत पौराणिकोत्तम ।
पुराणसंहितां दिव्यां लिङ्गमाहात्म्यसंयुताम् ॥

*　　*　　*　　*

एवमुक्तस्स हृष्टात्मा सूतः पौराणिकोत्तमः ।
अभिवाद्याग्रतो धीमान् नारदं ब्रह्मणस्सुतम् ॥

नैमिशेयांश्च पुण्यात्मा पुराणं व्याजहार सः ।

श्रीसूतः—

नमस्कृत्वा महादेवं ब्रह्माणं च जनार्दनम् ।
मुनीश्वरं तथा व्यासं वक्तुं लिङ्गं स्मराम्यहम् ॥

शब्दब्रह्मतनुं साक्षात् शब्दब्रह्मप्रकाशकम् ।
वर्णावयवमव्यक्तं लक्षणं बहुधा स्थितम् ॥

*　　*　　*　　*

सर्गप्रतिष्ठासंहारलीलार्थं लिङ्गरूपिणम् ।
प्रणम्य च यथान्यायं वक्ष्ये लिङ्गोद्भवं शुभम् ॥

Colophon:

इत्यादिमहापुराणे श्रीलैङ्गे पूर्वभागे प्रथमोऽध्यायः ॥

सूतः—

ईशानकल्पवृत्तान्तमधिकृत्य महात्मना ।
ब्रह्मणा कल्पितं पूर्वं पुराणं लैङ्गमुत्तमम् ॥

ग्रथ(न्थ)तरतु प्रमाणं तु शतकोटिप्रविस्तरम् ।
चतुर्लक्ष्ये(क्षे)ण संक्षिप्तं कृष्णद्वैपायनेन तु ॥
अत्रैकादशसाहस्रैः कथितं(तो) लिङ्गसम्भवः ।

* * * *

तपसां लक्षणं चैव द्विजानां वैभवं तथा ।
आधिक्यं सर्वमूर्तीनां लिङ्गं मूर्तेर्विशेषतः ॥
लिङ्गेऽस्मिन्नामपूर्वेण विस्तरेणानुकीर्त्यते ।
एतज्ज्ञात्वा पुराणस्य संक्षेपं कीर्तयेत्तु यः ॥
सर्वपापविनिर्मुक्तो ब्रह्मलोकं स गच्छति ।

Colophon :

इत्यादिमहापुराणे श्रीलैङ्गे पूर्वभागे अनुक्रमणिका नाम द्वितीयोऽध्यायः ॥

End :

एवमुक्तेषु विप्रेषु नारदो भगवानपि ।
कराभ्यां सुशुभाग्राभ्यां सूतं पस्पार्शिवान् त्वचि ॥
स्वस्त्यस्तु सूत भद्रं ते महादेवे वृषध्वजे ।
शु(श्र)द्धा तवास्तु चास्माकं नमस्तस्मै शिवाय च ॥

Colophon :

इत्यादिमहापुराणे श्रीलैङ्गे पाशुपतयोगकथनं नाम एकोनषष्ट्युत्तरशततमोऽध्यायः ॥

The MS. is said to have been transcribed by Kāmarāja Gaḍḍa Gurumūrti for Gōvinda Nāyaka from the copy of Kalidindi Hariścandra Mahārāja. The MS. is dated: 10th Śuddha of Mārgaśira in the year Parābhava

No. 2258. लिङ्गपुराणम्.

LIṄGAPURAṆAM.

Substance, palm-leaf. Size, 18 × 1⅜ inches. Pages, 611. Lines, 7 on a page. Character, Telugu. Condition, much injured. Appearance, very old.

Complete. Same work as the above.

No. 2259. लिङ्गपुराणम्.

LIṄGAPURĀṆAM.

Pages, 10. Lines, 11 on a page.

Begins on fol. 1*a* of the MS. described under No. 2132.

Adhyāyas 3 to 5, complete; 6th incomplete. Three leaves in the beginning are lost.

Same work as the above.

No. 2260. वराहपुराणम्.

VARĀHAPURĀṆAM.

Substance, paper. Size, 9⅝ × 6¼ inches. Pages, 661. Lines, 15 on a page. Character, Telugu. Condition, injured. Appearance, new.

Adhyāyas 1 to 233, complete.

A Mahāpurāṇa treating of the incarnation of Viṣṇu as a boar. A list of contents is given in Aufrecht's Bodlean Library Catalogue, No. 105.

Beginning :

नमस्तस्मै वराहाय लीलयोद्धरते महीम् ।
खुरमध्यगता यस्य भूमिः खणखणायते ॥

दंष्ट्राग्रेणोद्धृता गौरुदधिपरिवृता सर्वतो निम्नगाभिः
साकं मृत्पिण्डवत्प्राग्बृहदुरुवपुषानन्तरूपेण येन ।
सोऽयं कंसासुरारिर्मुरनरकदशास्यान्तकृत्सर्वसंस्थः
कृष्णो विष्णुस्सुरेशो नुदतु मम रिपूनादिदेवो वराहः ॥

सूत उवाच—

यस्मिन् काले क्षितिः पूर्वं वराहवपुषा तु सा ।
उद्धृता विष्णुना भक्त्या पप्रच्छ परमेश्वरम् ॥

धरण्युवाच—

कल्पे कल्पे भवानेव मां समुद्धरते विभो ।
न चाहं वेद ते मूर्तिमादिसर्गे च केशव ॥

वेदेषु चैव नष्टेषु मत्स्यो भूत्वा रसातलम् ।
प्रविश्य ताम(न)पाकृष्य ब्रह्मणे दत्तवानसि ॥

अन्यत्सुरासुरमर्घं(थं) त्वं समुद्रस्य मन्थने ।
धृतवानसि कौर्मेण मन्दरं मधुसूदन ॥

पुनश्च गां जगन्नाथ निमज्जन्तीं रसातलात् ॥
उज्जहारैकदंष्ट्रेण भगवान्वै महार्णवात् ॥

* * * *

Colophon :

इत्यादिवराहपुराणे भगवच्छास्त्रसम्बन्धो नाम प्रथमोऽध्यायः ॥

End :

यस्स एतत्पठेद्भक्त्या मद्भक्त्याद्द्वादशी(शे)दिने ।
तस्य नूनं भवेत्तत्र अपुत्रस्यापि धारिणी ॥
यस्येदं तिष्ठते गेहे लिखितं पूज्यते सदा ।
तस्य नारायणो देवः स्वयं तिष्ठति धारिणी(णि) ॥
यश्चैतच्छृणुयाद्भक्त्या नैरन्तर्येण मानवः ।
श्रुत्वा तु पूजयेच्छास्त्रं यथा विष्णुं सनातनम् ॥
गन्धपुष्पैस्तथा वस्त्रैः ब्राह्मणानां च तर्पणैः ।
यथा शक्त्या नृपो ग्रामैः पूजयेच्च वसुन्धरे ॥
श्रुत्वा तु पूजयेद्यस्तु पौराणं मि(म)हतश्शुचिः ।
सर्वपापविनिर्मुक्तो विष्णुसायुज्यतां व्रजेत् ॥

Colophon :

इत्यादिवराहपुराणे भगवच्छास्त्रे संसारचक्रसमाप्तिर्नाम त्रयस्त्रिंशदुत्तरद्विशततमोऽध्यायः ॥ वराहपुराणं समाप्तम् ॥

No. 2261. वराहपुराणम्.

VARĀHAPURĀṆAM.

Substance, palm-leaf. Size, 18 × 1½ inches. Pages, 106. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Adhyāyas 74 to 122, complete; 123rd, incomplete.

Same work as the above.

No. 2262. वराहपुराणम्.
VARĀHAPURĀṆAM.

Pages, 516. Lines, 7 on a page.

Begins on fol. 12*a* of the MS. described under No. 2132.

Adhyāyas 1 to 15 and 19 to 24, two copies; 25 to 72, complete; 73rd, incomplete.

This appears to be a different recension from a Purāṇa of the same name described above.

Beginning :

वराहवपुषो भूमिश्श्रुत्वा सृष्ट्यादिरूपिणीम् ।
गतिं तु कालिकीं विष्णोः गतिं पप्रच्छ दैशिकीम् ॥

श्रीभूमिः—

श्रुता भगवतो लीला तव सृष्ट्यादिरूपिणी ।
त्वन्मूर्तिशर्वाधेकत्वनानात्वघटितोदया ॥
एकत्वमैकरस्यं स्याद्वैषम्यमितरद्यथा ।
एकस्वारस्यमैक्यं वा परं तत् स्यादनेकगम् ॥

* * * *

तामिमामादितस्सर्वां पुण्डरीकपुराश्रयाम् ।
भद्राश्वागस्त्यसंवादात्मिकामवहिता शृणु ॥
नश्यन्त्यंहांसि भद्राणि वर्धन्ते चिन्मयी परा ।
सम्पत् प्रकाशते यस्य श्रवणोद्यमवार्तया ॥

Colophon :

इति श्रीवाराहे क्षेत्रकाण्डे प्रथमोऽध्यायः ॥

* * * *

इति श्रीवाराहे द्विसप्ततितमोऽध्यायः ॥

अगस्त्यः—

आयोध्य एव कल्पोऽयमिति प्राचेतसो जगौ ।
प्राक्तनेष्वेव कल्पेषु माधुरः कल्प इष्यते ॥

तत्र पञ्चजनं हत्वा हयग्रीवं च दानवम् ।
आजहार ततश्चक्रं शङ्खं च पुरुषोत्तमः ॥
इति सुग्रीववचसा प्राक्कल्पकबलीकृतेः ।
देवानां पूरयोध्या या तमःपारे प्रतिष्ठिता ॥

End:

हर्षान्मोहं जगामाथ प्रत्याश्वस्य शनैर्मुनिः ।
स्तुत्वा ब्रह्मस्तवेनेममिदमाह महीपते ॥
इयं मे वाङ्मयी कन्या दिव्या रा.

No. 2263. वामनपुराणम्.
VĀMANAPURĀṆAM.

Substance, paper. Size, 10 × 6⅝ inches. Pages, 304. Lines, 21 on a page. Character, Telugu. Condition, much injured. Appearance, old.

Adhyāyas 6 to 90, the 90th being incomplete.

In the beginning, 12 leaves are lost.

This MS. is so injured that extracts cannot be given therefrom.

No. 2264. वायुपुराणम्.
VĀYUPURĀṆAM.

Pages, 488. Lines 20 on a page.

Begins on fol. 1*a* of the MS. described under No. 2154.

Adhyāyas 1 to 60, complete; 61st, incomplete in the first Khaṇḍa.

This is a Mahāpurāṇa in two Khaṇḍās or four Pādas: Prakriyāpāda—Adhs. 1 to 6; Ānuṣaṅgapāda—Adhs. 7 to 61, and Khaṇḍa II, Adhs. 1 to 3; Upōdghātapāda—Khaṇḍa II, Adhs. 4 to 37; and Upasaṁhārapāda—Adhs. 38 to 41. For contents and description see Aufrecht's Bodlean Catalogue, Nos. 103, 104.

Beginning:

प्रपद्ये देवमीशानं शाश्वतं ध्रुवमव्ययम् ।
महादेवं महात्मानं सर्वस्य जगतः पतिम् ॥

ब्रह्माणं लोककर्तारं सर्वज्ञमपराजितम् ।
प्रभुं भूतभविष्यस्य सांप्रतस्य च सत्पतिम् ॥

ज्ञानमप्रतिमं यस्य वैराग्यञ्च जगत्पतिम् ।
ऐश्वर्यञ्चैव धर्मस्य सहसिद्धं चतुष्टयम् ॥

य इमां न्यस्यते भावात् त्रित्वं सदसदात्मकम् ।
आविशन्ति पुनस्तं वै क्रिया भावार्थमीश्वरम् ॥

लोककृल्लोकतत्त्वज्ञो योगमास्थाय तत्त्ववित् ।
असृजत्सर्वभूतानि स्थावराणि चराणि च ॥

तमजं विश्वकर्माणं चित्पतिं लोकसाक्षिणम् ।
पुराणाख्यानजिज्ञासुर्व्रजामि शरणं प्रभुम् ॥

ब्रह्मवायुमहेन्द्रेभ्यो नमस्कृत्वा समाहितः ।
ऋषीणाञ्च वरिष्ठाय वसिष्ठाय महात्मने ॥
अत्र प्रेवातियशसे जातुकर्णाय वेधसे ।
वासिष्ठश्चैव शुचये कृष्णद्वैपायनाय च ॥
पुराणं संप्रवक्ष्यामि ब्रह्मोक्तं वेदसम्मितम् ॥

* * * *

इति वायुप्रोक्ते महापुराणे अनुक्रमणिकाध्यायः ॥

* * * *

स्वर्गीयमेतत्परमं पवित्रं पुत्रीयमेतच्च परं रहस्यम् ।
जयं महत्पर्वसु चैतदग्र्यं दुस्स्वप्नशान्तिः परमाय तेषाम् ॥

प्रजेशदेवर्षिमनुप्रधानां पुण्यप्रसूतिप्रथितामजस्य ।
ममापि विख्यापनसंयमाय सिद्धिं जुषध्वं सुमहेशलब्ध(ा)म् ॥

इत्येतदन्तरं प्रोक्तं मनोस्स्वायम्भुवस्य तु ।
विस्तरेणानुपूर्व्ये च भूयः किं वर्तयाम्यहम् ॥

Colophon:

इति श्रीवायुप्रोक्ते प्रतयानिवंशानुकीर्तनं नाम षष्टितमोऽध्यायः ॥
समाप्तः प्रथमखण्डः ॥

End:

स्वायम्भुवेन मनुना दत्तोक्तैः कारणं प्रति ।
मन्वन्तरमथासाद्य भविष्यं चाक्षुषस्य ह ॥
षष्ठं तदनु वक्ष्यामि उपोद्घातेन वै द्विजाः ।
उत्तानपादाः चतुरस्सूनृता धूर्तभामिनी ॥
धर्मस्य कन्या धर्मज्ञ सूनृता नाम विश्रुता ।
उत्तानपादिर्ध(दी ध)र्मेण ध्रुवस्य जननी शुभा ॥

No. 2265. वायुपुराणम्.

VĀYUPURĀṆAM.

Substance, palm-leaf. Size, 16¼ × 1⅜ inches. Pages, 230. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Adhyāyas 36 to 65; 66th, incomplete.

No. 2266. विष्णुपुराणम्.

VIṢṆUPURĀṆAM.

Substance, paper. Size, 11⅞ × 7½ inches. Pages, 538. Lines, 28 on a page. Character, Telugu. Condition, good. Appearance, new. Complete.

This is one of the Mahāpurāṇas in 6 Aṁśas, treating mainly of the greatness of Viṣṇu. Edited and translated into English by Wilson. A Telugu statement given at the end says that this MS. was transcribed with special care and great accuracy for Mr. Brown.

Beginning :

यस्मादिदं जगदजायत यत्र तिष्ठ-
त्यन्ते समस्तमिदमस्तमुपैति यत्र ।
तस्मै नमस्सदसदादिविकल्पशून्य-
चैतन्यमात्रवपुषे पुरुषोत्तमाय ॥

कृत्वा तं नरसिंहरूपमतुलं लोकत्रयव्यापि य-
द्यालम्बिस्फुटचारुकेसरसटासम्भाररम्याकृति ।
वक्षे(क्षो)वज्रशिलासमूहकठिनं विस्तारि देवद्विषो
भिन्नं येन नखैर्मुदेऽस्तु भगवान् देवस्स नः केशवः ॥

अंशैः षड्भिस्समाकीर्णमङ्गैर्वेदमिवापरम् ।
पुराणं वैष्णवं चक्रे यस्तं वन्दे पराशरम् ॥

पराशरं मुनिवरं कृतपू(पौ)र्वाह्णिकक्रियम् ।
मैत्रेयः परिपप्रच्छ प्रणिपत्याभिवाद्य च ॥

End :

व्योमाचलाग्निजलभूरचनात्मकाय
शब्दादिभोग्यविषयावरणक्षया(मा)य ।
पुंसस्समस्तकरणैरुपकारकाय
व्यक्ताय सूक्ष्मबृहदात्मप(व)ते नमोऽस्तु ॥

इति विविधमजस्य यस्य रूपं
प्रकृतिपरः परमात्मस्वयं सनातनस्य ।
प्रदिशतु भगवानशेषपुंसां
हरिपथजन्मजरादिकां स सिद्धिम् ॥

इति श्रीविष्णुपुराणे षट्सहस्रसंहिताख्ये प्रवर्तकगुरुशिष्यपरम्पराप्रसङ्गे षष्ठेंऽशे अष्टमोऽध्यायः ॥

षष्ठांशस्समाप्तः ॥

శింగరాచారియార్ వ్రాలు.

1831 సంవత్సరం 14 తేది ఆగష్టుకు సరిఅయిన ఖరనామసంవత్సర శ్రావణశుద్ధ ల వర్కు యీ విష్ణుపురాణమునకు చతుర్విధ విమర్శ అయినది అనగా యిందుకు శ్రీధరకృత వ్యాఖ్యానం యిందుకే గోవిందురాజుశెప్పిన తెనుగు వచన కావ్యమున్ను వెన్నెలకంటుచెప్పిన తెలుగుపద్యకావ్యమున్ను యీ మూలానకు సరి అయ్ను గ్రంథాంతర విభేదములతోకూడా విమర్శించి చూచి కందాళ్ల, శింగరాచార్యులవారు బందరుపట్టణములో తీర్పుచేయడం అయినది. ఇన్నిసహాయములచేత మూలమందువచ్చిన అబద్ధములు అన్ని దిద్దుకోవడం అయింది. గ్రంథములు కలగచేసినది సర్వకార్యం ఆలోచించినది జరిగించినదిన్ని వ్రాలు.

No. 2267. विष्णुपुराणम्.
VIṢṆUPURĀṆAM.

Substance, palm-leaf (Śrītāla). Size, $13\frac{3}{8} \times 2\frac{1}{4}$ inches. Pages, 163. Lines, 15 on a page. Character, Telugu. Condition, good. Appearance, old.

Complete.

Dated : 2nd Bahula of Vaiśākha in the year Vikṛti. The copyist's name is Erode Vēṅkaṭaramaṇayya.

Same work as the above.

No. 2268. विष्णुपुराणम्.
VIṢṆUPURĀṆAM.

Substance, palm-leaf (Śrītāla). Size, $15\frac{1}{4} \times 2\frac{1}{2}$ inches. Pages, 221. Lines, 16 on a page. Character, Telugu. Condition, good. Appearance, old.

Complete.

Dated : Saturday, the 2nd of Bhādrapada-Śuddha in the year Nala.

Said to have been copied from the MS. of Veṅkaṭācalaṅgāru.
Same work as the above.

No. 2269. विष्णुपुराणम्.

VIṢṆUPURĀṆAM.

Substance, paper. Size, 8⅝ × 6½ inches. Pages, 634. Lines, 16 on a page. Character, Telugu. Condition, much injured Appearance, old.

Complete.

Dated : Saturday, the 8th Bahula in the year Svabhānu.

The scribe's name is given as Veṅkanna, son of Taḍakamalla Śrīnivāsa Pantulu of Hārīta-gōtra

Same work as the above.

No. 2270. विष्णुपुराणम्.

VIṢṆUPURĀṆAM.

Substance, palm-leaf. Size, 18 × 1½ inches. Pages, 248. Lines, 10 on a page. Character, Telugu. Condition, good. Appearance, old.

Complete.

Same work as the above.

No. 2271. विष्णुपुराणम्.

VIṢṆUPURĀṆAM.

Substance, palm-leaf (Śrītāla). Size, 13½ × 2 inches. Pages, 320. Lines, 12 on a page. Character, Grantha. Condition, good. Appearance, old.

Complete.

Same work as the above.

No. 2272. विष्णुपुराणम्.

VIṢṆUPURĀṆAM.

Substance, palm-leaf. Size, 16¾ × 1⅝ inches. Pages, 382. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Aṁśas 1, 2 and 3; the 4th breaks off in the 15th Adhyāya; the 5th from Adhyāya 11 to the end; and the 6th.

Same work as the above.

No. 2273. विष्णुपुराणम्.

VIṢṆUPURĀṆAM.

Substance, palm-leaf. Size, 15½ × 1½ inches. Pages, 512. Lines, 7 on a page. Character, Kanarese. Condition, fair. Appearance, old.

Breaks off in the 5th Adhyāya of the 6th Aṁśa.

Same work as the above.

No. 2274. विष्णुपुराणम्.

VIṢṆUPURĀṆAM.

Substance, palm-leaf. Size, 15 × 1½ inches. Pages, 380. Lines, 8 on a page. Character, Grantha. Condition, much injured. Appearance, old.

Breaks off in the 24th Adhyāya of the 4th Aṁśa.

Same work as the above.

No. 2275. विष्णुपुराणम्.

VIṢṆUPURĀṆAM.

Substance, palm-leaf. Size, 18½ × 1½ inches. Pages, 112. Lines, 8 on a page. Character, Grantha and Tamil. Condition, injured. Appearance, old.

With Tamil notes by Vīrarāghava.

As the leaves are all disarranged, the extent of the work herein cannot be exactly made out. However, Aṁśas 1, 2, 6 and 4 are to be found.

Same work as the above.

No. 2276. विष्णुपुराणम्.

VIṢṆUPURĀṆAM.

Substance, palm-leaf (Śrītāla). Size, 13½ × 1⅞ inches. Pages, 200. Lines, 8 on a page. Character, Telugu. Condition, good. Appearance, old.

Breaks off in the 12th Adhyāya of the 3rd Aṁśa.

Same work as the above.

No. 2277. विष्णुपुराणम्.

VIṢṆUPURĀṆAM.

Substance, palm-leaf. Size, 17 × 1½ inches. Pages, 132. Lines, 13 on a page. Character, Grantha. Condition, injured. Appearance, old.

Aṁśas 1, 2, and 3 breaking off in the 18th Adhyāya, and 6

Same work as the above.

The copyist has added the following stanza at the end :—

भारद्वाजकुलाऽब्धीन्दोरम्मालार्यात्समुद्भवः ।
पुराणं वैष्णवं सम्यगलिखद्वीरराघवः ॥

No. 2278. विष्णुपुराणम्.

VIṢṆUPURĀṆAM.

Substance, palm-leaf. Size, 21½ × 1½ inches. Pages, 82. Lines, 10 on a page. Character, Grantha. Condition, fair. Appearance, old.

Aṁśas 1 and 2, complete ; the 3rd Aṁśa breaks off in the first Adhyāya.

Same work as the above.

No. 2279. विष्णुपुराणम.

VIṢṆUPURĀṆAM.

Substance, palm-leaf. Size, 10⅝ × 1 inches. Pages, 11. Lines, 4 on a page. Character, Nandināgarī. Condition, injured. Appearance, old.

Begins on fol. 17*a*. The other works herein are Navaratnamālā 1*a*, Śyāmalādaṇḍakam 2*a*, Hastāmalakastōtram 6*a*, Daśaślōkī 6*b*, Ṣaṭślōkī 7*b*, Triślōkī 8*b*, Ēkaślōkī 8*b*, Rāmadaṇḍaka 9*a*, Rudrādhyāyamantra 16*a*.

The first Aṁśa ; breaks off in the 21st Adhyāya.

Same work as the above.

No. 2280. विष्णुपुराणम्.

VIṢṆUPURĀṆAM.

Pages, 24. Lines, 18 on a page.

Begins on fol. 1*a* of the MS. described under No. 2109.

The first Aṁśa; breaks off in the 5th Adhyāya.

Same work as the above.

No. 2281. विष्णुपुराणम्.

VIṢṆUPURĀṆAM.

Pages, 319. Lines, 10 on a page.

Begins on fol. 1*a* of the MS. described under No. 631.

Complete.

Instead of the first four stanzas found in the MS. described under No. 2266, the following three stanzas are found herein :—

नारायणं नमस्कृत्य नरञ्चैव नरोत्तमम् ।
व्यासं सरस्वतीदेवीं ततो जयमुदीरयेत् ॥
प्रणम्य विष्णुं विश्वेशमात्मादीन् प्रणिपत्य च ।
गुरुं प्रणम्य वक्ष्यामि पुराणं वेदसम्मितम् ॥
इति स्तुत्य पुराणज्ञं वेदवेदाङ्गपारगम् ।
धर्मशास्त्रार्थतत्त्वज्ञं वसिष्ठतनयात्मजम् ॥

No. 2282. विष्णुपुराणव्याख्या.

VIṢṆUPURĀṆAVYĀKHYĀ.

Substance, paper. Size, 11½ × 7½ inches. Pages, 274. Lines, 22 on a page. Character, Telugu. Condition, good. Appearance, new.

Complete.

This commentary, called Viṣṇucittīya, is by a certain Viṣṇucitta.

Beginning :

श्रीविष्णुचित्तपदपङ्कजसङ्गमाय
चेतो मम स्पृहयते किमतः परेण ।
नो चेन्ममापि यतिशेखरभारतीनां
भावः कथं भवितुमर्हति वाग्विधेयः ॥

अथ भगवान् पराशरः श्रीमैत्रेयाय लोकहितार्थं श्रीविष्णुपुराणं प्रणेष्यन् प्रणिपातादिभिरुपपन्नाय सच्छिष्याय सदाचारवता तत्पृष्टेन गुरुणा स्वधर्मानुष्ठानाविरुद्धे मनःप्रसादाकरसमये पुराणाद्व्याख्येयमिति शास्त्रदर्शनात् पुराणप्रस्तावकं तत्प्रश्नं निबध्नाति—पराशरमिति श्लोकेन ।

Colophon :

इति श्रीविष्णुपुराणव्याख्याने श्रीविष्णुचित्तीये प्रथमेंऽशे प्रथमोऽध्यायः ॥

End :

मोक्षमाशासानः पुराणं पूरयति इत्युक्तप्रकारेण प्रकृतिर्व्यक्तात्मिका तस्याः परम् । अ . . . वत इति पाठः । अत्र प्रकृतिपुरुषयोः परस्माद्भेदः तयोः जगद्ब्रह्मासामानाधिकरण्यनिबन्धनं तद्रूपत्वम् अशेषपुंसामिति निर्देशादात्मनां परस्परभेदो भगवतस्सिद्धिप्रदेष्ट.

Colophon :

इति श्रीविष्णुपुराणव्याख्याने श्रीविष्णुचित्तीये षष्ठेंऽशे अष्टमोऽध्यायः ॥

No. 2283. विष्णुपुराणव्याख्या.

VIṢṆUPURĀṆAVYĀKHYĀ.

Substance, palm-leaf. Size, $19\frac{3}{8} \times 1\frac{3}{8}$ inches. Pages, 198. Lines, 10 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other works herein are Nyāsatilaka savyākhyāna 100*a*, Rahasyamañjarī 117*a*, Nyāsavimśati-

savyākhyā 126a, Śrīvacanabhūṣaṇavyākhyā 139a, Rahasyatrayasārādhikārasaṅgraha 209a, Rahasyatrayasārādhikārasaṅgrahavyākhyā 206a.

Complete.

Same work as the above.

No. 2284. विष्णुपुराणव्याख्या.
VIṢṆUPURĀṆAVYĀKHYĀ.

Substance, palm-leaf. Size, 16⅜ × 1⅜ inches. Pages, 299. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Complete.

Same work as the above.

No. 2285. विष्णुपुराणव्याख्या.
VIṢṆUPURĀṆAVYĀKHYĀ.

Substance, palm-leaf. Size, 15⅜ × 1¼ inches. Pages, 236. Lines, 8 on a page. Character, Grantha. Condition, much injured. Appearance, old.

Begins on fol. 1a. The other work herein is Muṇḍakōpaniṣadbhāṣyam 119a.

It is much injured, and many leaves are lost. The work, however, seems to have been complete.

This commentary seems to be that of Viṣṇucitta. The scribe's name is given as Vēṅkaṭādri of the village Erakara.

No. 2286. विष्णुपुराणव्याख्या.
VIṢṆUPURĀṆAVYĀKHYĀ.

Substance, palm-leaf. Size, 15 × 1½ inches. Pages, 320. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1a. The other work herein is Ārurukṣupañcaka 161a.

The commentary called Svaprakāśikā : by Śridharasvāmin.

Complete.

Beginning :

श्रीबन्धुं माधवं वन्दे परमानन्दविग्रहम् ।
वाचं विश्वेश्वरं गङ्गां पराशरमुखान् मुनीन् ॥
श्रीमच्चित्सुखयोगिमुख्यरचितव्याख्यां निरीक्ष्य स्फुटं
तन्मार्गेण सुबोधसुग्रहवतीमात्मप्रकाशाभिधाम् ।
श्रीमद्विष्णुपुराणसारविवृतिं कर्ता यतिश्श्रीधरः
स्वामी सद्गुरुपादपद्ममधुपः साधु स्वधी[ः]शुद्धये ॥
श्रीमद्विष्णुपुराणस्य व्याख्या स्वल्पातिविस्तरा ।
प्राचामालोक्य तद्व्याख्यां मयाद्येयं विधीयते ॥

अथ भगवान् श्रीपराशरमुनीश्वरो मैत्रेयं निमित्तीकृत्य श्रीविष्णुतत्त्वप्रतिपादकं पुराणमारभते—पराशरमित्यादिना । स्वस्मिन्नेव परोक्षनिर्देशो लोकोक्त्या देहाद्यनहङ्कारद्योतनार्थः । प्रणिपत्य दण्डवत्प्रणम्य पादग्रहणादिविधिना अभिवाद्य च बुभुत्सितमर्थं प्रष्टुं तत्कृतमनुग्रहमनुवदति त्वत्त इति द्वाभ्याम् ।

* * * *

इति श्रीविष्णुपुराणटीकायां श्रीधरस्वामिकृतायां स्वप्रकाशिकाव्याख्यायां प्रथमेंऽशे प्रथमोऽध्यायः ॥

End :

इति प्रकृतिपरात्ममयं प्रकृतिर्व्यक्ताव्यक्तरूपा पर ईश्वरः आत्मा पुरुषः तन्मयम् अपगतजन्मजरादिकां मोक्षलक्षणां सिद्धिं प्रदिशत्वित्याशीर्वादार्थः ॥

Colophon :

इति श्रीविष्णुपुराणटीकायां स्वप्रकाशिकाख्यायां श्रीधरस्वामिकृतौ षष्ठेंऽशे अष्टमोऽध्यायः ॥

समाप्तष्षष्ठोंऽशः ॥

समाप्ता च स्वप्रकाशिकाख्या टीका ॥

परमानन्दपादाब्जश्रीधरश्श्रीधरो यतिः ।
व्याख्यां विष्णुपुराणस्य स्वप्रकाशाह्वयां व्यधात् ॥

स्वप्रकाशाह्वया विष्णुपुराणव्याख्ययानया ।
परमानन्दरूपो मे माधवस्संप्रसीदतु ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्रामकृष्णेन्द्रपादारविन्दाभ्यां नमः ॥

रक्ताक्षिवत्सरोर्जे च पौर्णम्यां भृगुवासरे ।
व्याख्या विष्णुपुराणस्य पद्मनाभेन लेखिता ॥

No. 2287. स्कान्दपुराणम्.

SKĀNDAPURĀṆAM.

Substance, paper. Size, $11\frac{3}{4} \times 7\frac{3}{4}$ inches. Pages, 583. Lines, 22 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 109*a*. The other works herein are Pañcadaśīprakaraṇadīpikā 1*a*, Brahmasūtrabhāṣyam 25*a*.

Contains the following portions :—

109*a* Nāgarakhaṇḍa, Adhyāyas 1 to 12—*vide* No. 2300 for remarks and extracts.

169*a* Umāsaṁhitā, breaks off in the 12th Adhyāya and treat of the story of the Rāmāyaṇa.

241*a* Bhīmakhaṇḍa, breaks off in the 21st Adhyāya—*vide* No. 2310 for extracts and remarks.

324*a* Śaṅkarasaṁhitā, Adhyāyas 80 to 85, relating to Vīramāhēśvarakrama.

369*a* Upadēśakāṇḍa of the Śivarahasyakhaṇḍa of the Śaṅkarasaṁhitā, Adhyāyas 1 and 2. It gives a description of Kailāsa and its Lord.

380*a* Śivatattvasudhānidhi of Sanatkumārasaṁhitā, Adhyāyas 7 to 9, complete, the 10th being incomplete. The 7th Adhyāya contains Jīvanmuktaprakaraṇa, the 8th Vidēhamuktiprakaraṇa, and the 9th Mahāvākyaprakaraṇa.

392*b* Sētumāhātmyam, breaks off in the 10th Adhyāya; treats of the holiness and greatness of Sētu.

Beginning of Umāsaṁhitā :

सूतः—

पुरा कैलासशिखरे पार्वत्या सह शङ्करः ।
विचचार महायोगिस्वरूपमनुचिन्तयन् ॥
नानाप्रसूनवितते नानावृक्षसमाकुले ।
नानावल्लिसमाकीर्णे सिद्धचारणसेविते ॥

* * * *

रत्नसिंहासने शुभ्रे रत्नच्छत्रोपशोभिते ॥
ऋषिभिस्सनकाद्यैश्च स्तूयमानापदानकम् ।
उमा प्रणम्य पप्रच्छ देवदेवं पिनाकिनम् ॥
जय देव महादेव जय चन्द्रार्धशेखर ।
जय मन्नाथ लोक(केश)सृष्टिस्थित्यन्तकारक ॥

* * * *

इति स्तुतो गिरिजया प्रसादमकरोच्छिवः ।
किं(गोप्यम)स्ति ते देवि वु(उ)मे सर्वाङ्गसुन्दरी ॥
शृणु वक्ष्यामि तत्त्वेन मनसा सम्यगीप्सितान् ।

उमा—

भवता पुण्यमाख्यानमुक्तं विस्त(र)तः पुरा ।
तन्त्राणि च पुराणानि कथिताश्च सविस्तराः ॥

मन्त्राम्ना संहिता शम्भो प्रोक्ता का चन शङ्कर ।
तां पुनः श्रोतुमिच्छामि रघुनाथकथाफलम् ॥

को रामः सा कथा कीदृक् कीदृशस्तावकस्य च ।
का सीता लक्ष्मणः को वा शत्रुघ्नो भरतश्च कः ॥

विभीषणो दशग्रीवः कुम्भकर्णश्च कोभ(प)वान् ।
मेघनादः पराशादः सर्वे लङ्कालयास्तथा ॥

किष्किन्धानिलयाश्शूराः वानराः कीदृशाः स्मृताः ।
को वा दशरथस्याच(ध)जानकी कीदृशा(शी) स्मृता ॥

इति पृष्टो गिरिजया शिवः प्राह दयानिधिः ।

शिवः—

भक्तसंरक्षणार्थाय त्रिगुणोपाधिकस्य च ।
मूर्तित्रयमभूद्रूपमेकं शूलधरा पुरा ॥

चक्राङ्कितकरा ह्यन्या कमण्डलुधरा परा ।
सर्वसंहारकारिण्या(:) स्वरूपं त्रिविधं स्मृतम ॥

हिमाद्रिप्रभवा एका क्षीराब्धिप्रभवा परा ।
अन्या वाणीति विख्याता क्रमात् तेषान्तु वल्लभाः ॥

* * * *

Colophon:

इत्युमासंहितायां सुन्दरकाण्डे रामायणमाहात्म्यं नाम एकादशोऽध्यायः ॥

ईश्वरः—

युद्धकाण्डस्य माहात्म्यं प्रवक्ष्यामि शुभानने ।
श्रुत्वा हनुमतो वाक्यं यथावदनुभाषितम् ॥
रामः प्रीतिसमायुक्तो वाक्यमुत्तरमब्रवीत् ।
सीतावृत्तान्तसंतुष्टो रामो मारुतिमादरात् ॥

End:

मारुतिर्विद्धसंक्रुद्ध(:) पूजयत्र(न्प्र)त्यहं बुधः ।
यथाशक्ति द्विजान् भोज्यभक्ष्यव्यञ्जनसंयुतम् ॥
ताम्बूलदानं सर्वेषां श्रोतृणां परिकल्पयेत् ।
नत्वा नत्वा द्विजा राजन् शृणुयाद्विप्रवाक्यतः ॥
अस्य श्रीराम[य]स्तोत्रमन्त्रस्य वाल्मीकि ऋषिः,
अनुष्टुप्छन्दः, श्रीरामो देवता ।

* * * *

सहस्रादित्यसङ्काशं सर्वशत्रुनिबर्हणम् ।
स्रयागयोर्भिन्नपुरुषानुष्ठेया ।
रपि विरोधो युक्तः न तूभयोः ।
निःश्रेयसकर्मत्वमेवेति प्राप्तमिदमुच्यते ॥
साङ्ख्ययोगाः पृथक् बालाः प्रवदन्ति न पण्डिताः ।
एकमस्यास्ति(स्थि)तस्सम्यगुभयोर्विन्दते फलम् ॥

Begininng : Upadēśakāṇḍa.

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥
किंरूपोऽयमृषिश्रेष्ठ किंप्रमाणं किमुच्छ्रयः ।
एतत्सर्वं विशेषेण वक्तुमर्हसि तापस ॥

सूतः—

इति तेषां वचश्श्रुत्वा प्राह पौराणिकोत्तमः ।
शृणुध्वं ब्राह्मणास्सर्वे गुह्याद्गुह्यतरं परम् ॥

अस्ति मेरोरुदग्भागे महाकैलासपर्वतः ।
साम्बस्य सगणस्यायं सभक्तस्येन्दुमौलिनः ॥

संवासो योजनानां च विंशत्कोटिभिरायतः ।
औन्नत्यमेताद्द्विगुणमस्य ज्ञेयं द्विजोत्तमाः ॥

नवरत्नमयं तस्य मध्येशिखरमुत्तमम् ।
तत्रालयं महेशस्य नानारत्नविचित्रितम् ॥

* * * *

प्रत्यग्भागस्थितेष्वत्र विष्णवः परमेश्वरम् ।
उपासन्ते परं तत्त्वं ज्योतिर्लिङ्गाकृतिं शिवम् ॥

End:

प्राप कैलासमतुलं भुक्त्वा भोगान् यथेप्सितान् ।
उपमन्योरिदं श्रुत्वा कृष्णः कैलासमाप्तवान् ॥

कृष्णात् पृथुसुतः श्रुत्वा शत्रून् हत्वा युधि स्थितान् ।
कैलासमगमद्धीमान् ब्राह्मणानामधीश्वराः ॥

Colophon:

इत्यादिमहापुराणे स्कान्दे शङ्करसंहितायां शिवरहस्यखण्डे उपदेशकाण्डे द्वितीयोऽध्यायः ॥

No. 2288. स्कान्दपुराणम्.

SKĀNDAPURĀṆAM.

Substance, paper. Size, $12\frac{1}{2} \times 7\frac{5}{8}$ inches. Pages, 199. Lines, 22 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 110*b*. The other works herein are Sōmavāra-vratōdyāpanapaddhati 1*a*, Sōmavāravratakalpa 12*a*.

Contains the Īśānasaṁhitā (fol. 110*b*, Adhyāyas 70, 41 and 73 treating of Śivarātriprādurbhāva-tadvratapūjāvidhāna, Sukumāragaṇēśvarapradāna, and Śivarātrimāhātmya, respectively, and the Brahmōttarakhaṇḍa 12*a*, Adhs. 30, 31, 23 to 35 and 14 to 22. Adhyāyas 23 to 35 herein correspond to Adhyāyas 1 to 13 of the MS. described under No. 2303 where extracts and description are given.

Beginning: of Īśānasaṁhitā.

अगजाननपद्मार्कं गजाननमहर्निशम् ।
अनेकदन्तं भक्तानामेकदन्तमुपास्महे ॥

ऋषयः—

कृतानि पातकानीह त्वयोक्तानि महाभते ।
यैरश्चिताश्च जायन्ते क्रिमयः पक्षिणस्तथा ॥
ब्राह्मणाः क्षत्रिया वैश्याश्शूद्रो(द्रा)वा यतिनोऽपि वा ।
मूढो वा पण्डितो वापि श्रीमान्वा निर्धनोऽपि वा ।
विलोमजाश्च ये केचित्तथा वै चानुलोमजाः ॥
एवंविधानां पापानां राशिं मेरूपमं क्षणात् ।
केनाग्निना च दग्ध्वा तं शिवलोकं व्रजन्ति ते ।
लघूपायं हि नो ब्रूहि लोकानां हितकाम्यया ॥

सूतः—

वक्ष्याम्यहं मुनिश्रेष्ठाः सर्वपापप्रना(णा)शनम् ।
उपायं सर्वमर्त्यानामयत्नेन च मुक्तिदम् ॥
पुरा कैलासशिखरे [स]साम्बस्सानुचरश्शिवः ।
ब्रह्मादिभिस्सुरगणैः सेव्यमान(स)सदैव हि ॥

एकदा तु महादेवी शिवमक्षरमव्ययम् ।
प्रणिपत्य तमीशानमपृच्छद्वृषभध्वजम् ॥
श्रीदेव्युवाच—
सन्ति पापानि देवेश बहूनि विविधानि च ।
तानि पापानि दग्ध्वा तु त्वत्सायुज्यं कथं व्रजेत् ॥
देवदेव महादेव वद कारुण्यमस्ति चेत् ।
सूतः—
उक्तो देव्या महादेवः पार्वतीमभिनन्द्य च ।
शिवरात्रिव्रतं तस्यै प्रोक्तवान् शङ्करः स्वयम् ॥
षण्मुखाय पुरा प्रोक्तं पार्वत्या शिवभाषितम् ।
तदेव कथयिष्यामि द्वैपायनमुखाच्छ्रुतम् ॥

End:

यम संयमिनीं गच्छ दण्डमुद्रासमन्वितः ।
पापिष्ठानाञ्च सर्वेषां शासनं कुरु यत्नतः ॥
सूतः—
एतच्छ्रुत्वा वचस्सत्यं महादेवेन भाषितम् ।
प्रणिपत्य महादेवं स्तुत्वा च विविधस्तवैः ॥
दण्डमुद्रान्(द्रां)समादाय स्वां पुरीं (प्र)ययौ यमः ।

Colophon:

ओमित्यादिमहापुराणे श्रीस्कान्दे ईशानसंहितायां शिवरात्रिमाहात्म्ये शङ्करयमसंवादो नाम त्रिसप्ततितमोऽध्यायः ॥

No. 2289. उमासंहिता (स्कान्द).

UMĀSAṀHITĀ (SKĀNDA).

Substance, palm-leaf. Size, $17\frac{7}{8} \times 1\frac{3}{8}$ inches. Pages, 115. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, new.

Adhyāyas 1 to 12, complete.

Same as the Umāsaṁhitā described under No. 2287.

Colophon :

इति उमासंहितायां सुन्दरकाण्डे रामायणमाहात्म्यं नाम एकादशोऽ-
ध्यायः ॥

सुन्दरकाण्डस्समाप्तः ॥

ईश्वरः—

युद्धकाण्डस्य माहात्म्यं प्रवक्ष्यामि शुभानने ।
श्रुत्वा हनुमतो वाक्यं यथावदनुभाषितम् ॥

End :

सहस्रादित्यसंकाशं सर्वशत्रुनिबर्हणम् ।
स्यागयोर्भिन्नपुरुषानुष्ठेया . . . . रपि विरोधो युक्तः ।
सन्तूभयोः । निःश्रेयसकर्मत्वमेवेति प्राप्तमिदमुच्यते ॥

साङ्ख्ययोगाः पृथक् बालाः प्रवदन्ति न पण्डिताः ।
एकमस्यास्थितस्सम्यगुभयोर्विन्दते फलम् ॥

No. 2290. कालिकाखण्डः (स्कान्द).

KĀLIKĀKHAṆḌAḤ (SKĀNDA).

Substance, palm-leaf. Size, $15\frac{1}{4} \times 1\frac{1}{4}$ inches. Pages, 267. Lines, 7 on a page. Character, Telugu and Grantha. Condition, good. Appearance, old.

Adhyāyas 12 to 100.

This mainly treats of the greatness of Śiva and His worship, and of the wearing of Rudrākṣa beads and sacred ashes, denounces the practice of branding the body with the marks of conch and wheel, the emblems of Viṣṇu, and the wearing of the Ūrdhvapuṇḍra, and gives various stories to prove the superiority of Śiva to Viṣṇu.

Beginning:

सनत्कुमारः—

तस्य तद्वचनं श्रुत्वा विष्णोर्विष्णुपरायणः ।
उपासाश्चक्रिरे सर्वान् शिवभक्तान् सदैव हि ॥
भोजनायनदानाद्यैः प्रणामस्तुतिपूर्वकैः ।
भस्मदिग्धान् त्रिपुण्ड्राङ्कान् रुद्राक्षाभरणान् सदा ॥

* * * *

Colophon:

इति श्रीकाळिकाखण्डे द्वादशोऽध्यायः ॥

End:

शिवलोकमवाप्नोति सत्यमेतन्मुनीश्वराः ।
मुनयस्सूतवाक्येन हृष्टास्तमभिनन्द्य च ॥
जीव जीव शतं सूत त्वमस्माकं गतिः मुरा ।
इत्यूचुस्ते तदा सूतं ययौ सूतो यथागतम् ॥

Colophon:

इति श्रीस्कान्दे महापुराणे शतसहस्रिकायां सनत्कुमारसंहितायां काळिकाखण्डे शततमोऽध्यायः ॥

No. 2291. काशीखण्डः (स्कान्द).

KĀŚĪKHAṆḌAḤ (SKĀNDA).

Substance, paper. Size, $11\frac{1}{2} \times 7\frac{5}{8}$ inches. Pages, 997. Lines, 23 on a page. Character, Telugu. Condition, good. Appearance, new.

Adhyāyas 1 to 100, complete.

Treats of the greatness and holiness of Kāśī. For a list of the contents of the 100 chapters of this work see Aufrecht's Bodlean Catalogue No. 120.

Beginning:

तं मन्महे महेशानं महेशानप्रियार्भकम् ।
गणेशानं करिगणेशानाननमनामयम् ॥

भूयिष्ठाप्यनया च भूस्त्रिदिवतोऽप्युच्चैरधस्थापि या
या बद्धा भुवि मुक्तिदास्स्युरमृता यस्यां मृता जन्तवः ।
या नित्यं त्रिजगत्पवित्रतटिनीतीरे सुरैस्सेव्यते
सा काशी त्रिपुरारिराजनगरी पायादपायाज्जगत् ॥

नमस्तस्मै महेशाय यस्य सन्ध्यात्रयच्छलात् ।
यातायातं प्रकुर्वन्ति जगतां पतयेऽनिशम् ॥

अष्टादशपुराणानां कर्ता सत्यवतीसुतः ॥

सूताग्रे कथयामास कथां पापापनोदिनीम् ।

व्यास उवाच—

कदाचिन्नारदः श्रीमान् स्नात्वा श्रीनर्मदाम्भसि ।
श्रीमदोङ्कारमभ्यर्च्य सर्वदं सर्वदेहिनाम् ॥

End:

ब्राह्मणान् भोजयेत्पश्चाद्यथाविभवसारतः ।
सहस्रं वा शतं वापि पञ्चाशतमथापि वा ॥

पञ्चविंशतिकान्वापि ब्राह्मणान् ब्रह्मतत्परान् ।
एकादश द्विजान् वापि अष्टौ वापि द्विजोत्तमान् ॥

चतुरो ब्राह्मणान्वापि भोजयेत्प्रीतिपूर्वकम् ।
विश्वेशप्रीतये कुर्याद्भवान्याः प्रीतये तथा ॥

सर्वेषां मङ्गलानाञ्च महामङ्गलमुत्तमम् ।
गृहेऽपि लिखितं पूज्यं सर्वमङ्गलसिद्धये ॥

Colophon :

इति श्रीस्कान्दपुराणे काशीखण्डे अनुक्रमणिकाख्यानं नाम शततमोऽध्यायः ॥

No. 2292. काशीखण्डः (स्कान्दः).

KĀŚĪKHAṆḌAḤ : (SKĀNDAḤ).

Substance, palm-leaf. Size, 8⅞ × 1⅞ inches. Pages, 27. Lines, 6 on a page. Character, Nandināgarī. Condition, good. Appearance, old.

The 37th Adhyāya in the Kāśīkhaṇḍa. It treats of Strīlakṣaṇa.

No. 2293. काशीखण्डव्याख्या--पदयोजना.

KĀŚĪKHAṆḌAVYĀKHYĀ : PADAYŌJANĀ.

Substance, palm-leaf. Size, 16½ × 1⅝ inches. Pages, 398. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Adhyāyas 1 to 30.

A commentary on the Kāśīkhaṇḍa of the Skāndapurāṇa by Vēṅkaṭanārāyaṇa of Kōlacalama family, pupil of Gōpālēndrasarasvati.

Beginning :

श्रीगोपालपदारविन्दभजनप्राप्तात्मविज्ञानवान्
आत्मानन्दसुधानिधाननिधितस्वान्तांत्स्वसंपत्परान् ।
वेद्यानन्दितवेदनानृतविदे वेदार्थसंवेदनान्
गोपालेन्द्रसरस्वतीभगवतो नोनोमि नित्यं गुरून् ॥

नोनूमे(मो)नयविज्ञेयं नित्यं वैनायकं महः ।
नान्यानिति हि यद्ध्यानात्सद्यः प्रत्यूहजन्तमः ॥

पराणिभिर्जगत्राणीं वाणीं वाणीं स्वसंपदः ।
प्रणुवामि चतुर्भागां चतुरर्थप्रदायिनीम् ॥

नारायणेन विदुषा कोलचल्मान्वयेन्दुना ।
काशीखण्डस्य विवृतिः क्रियते गुर्वनुग्रहात् ॥

तत्रभगवान् श्रीवेदव्यासः काशीखण्डं प्रारिप्सुः प्रारिप्सितस्य ग्रन्थस्य निष्प्रत्यूहपरिपूरणाय विघ्नेश्वरं स्मरति । तमिति ॥

महेशानस्य महादेवस्य प्रियार्भकं प्रियपुत्रं करिगणेशानस्य गजश्रेष्ठस्य आननं मुखं यस्य तं गजवक्त्रमित्यर्थः । अनामयं निर्दुष्टं प्रमथगणानामीशानमधिपतिं महेशानं निग्रहानुग्रहसमर्थं तं वरप्रसिद्धं विघ्नेश्वरं मन्महे भजामः । अनन्तरं मुक्तिदां मुक्तिप्रदाय(यि)कां काशीं स्तौति भूयिष्ठेति ॥

End :

ततः कारणात् काशी तु कलिकालेन वर्जिता रहिता । स्कन्दः कुम्भसंभवं संबोधयन् काशीनामधेयान्याह वाराणसीति । हे द्विज । इतीति स्पष्टम् । तदिति । तत्तथाप्रसिद्धं काशिजं महद्रहस्यं तवाग्रे मया कथितम् । श्रावयित्वेति । हे कलशज अतः काशीमाहात्म्यात्परमन्यत्किं शुश्रूषसि श्रोतुमिच्छसि । तद्वद ॥

Colophon :

इति श्रीमत्कोलचलमान्वयसुधाम्बुधिसुधाकरेण वेङ्कटनारायणेन विरचिते पदयोजनासमाख्याने काशीखण्डव्याख्याने काशीमहिमानुवर्णनं नाम त्रिंशोऽध्यायः ॥

प्लवङ्गाब्दे तु वैशाखे कृष्णपक्षाष्टमीगुरौ ।
काशीखण्डस्य टीकायां लिखितं पूर्णत्रिंशत् ॥

No. 2294. काशीखण्डव्याख्या–पदयोजना.

KĀŚĪKHAṆḌAVYĀKHYĀ: PADYŌJANĀ.

Substance, palm-leaf. Size, $15\frac{3}{4} \times 1\frac{3}{8}$ inches. Pages, 514. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, new.

Adhyāyas 31 to 66, complete; 67th incomplete.

Same work as the above.

No. 2295. काशीखण्डव्याख्या—पदयोजना.

KĀŚĪKHAṆḌAVYĀKHYĀ: PADAYŌJANĀ.

Substance, palm-leaf. Size, $16\frac{7}{8} \times 1\frac{1}{2}$ inches. Pages, 249. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Adhyāyas 67 to 99, complete; 100th, incomplete.

Same work as the above.

Beginning:

मया सह यूयं समायात समागच्छत । वः युष्माकं, रत्नेशं दर्शयामि । इतीति । इत्येवमुक्त्वा ताश्चतस्स्त्री(ः) आहूय स्नानार्थं क्रीडावान्(पीम्)[म] निन्ये नीतवान् । वाटीं वर्णयते विचित्रेति । तत्रेति । ताः स्त्रियः । तेन रत्नचूडेन अभ्यनुजातास्सत्यः तत्र क्रीडावाप्यां निमज्य स्नात्वा ततः सचेलवस्त्राभरण(ा) भूत्वा पाताललोकाद्बहिर्निर्गत्य स्थगिताः निर्बन्ध प्राप्ता इव भुवं पश्यन्तः स्थित्वा रत्नेशस्य आलयं मण्टपमालोक्य रत्नेश्वरस्य खेला लीला . . . . वयमेव वा भ्रान्ताः वयमेव गन्धर्वो न किमु । इदं सर्वं किञ्चिदपि न जानीमः । उत्तरवहा उत्तरवाहिनी गङ्गा ।

काल एव सर्पस्तस्माज्जातं भयं नास्ति ।

* * * *

अविवाहितकन्यापि वा इममितिहासमाकर्ण्य मनोहरं पतिं लब्ध्वा पतिव्रता भविष्यति । इतिहासमिति स्पष्टम् ॥

Colophon :

इति श्रीमत्कोलचलमान्वयसुधाम्बुधिसुधांशुना वेङ्कटनारायणेन विरचिते पदयोजनासमाख्याने काशीखण्डव्याख्याने रत्नेश्वरोपाख्यानं नाम सप्तषष्टितमोऽध्यायः ॥

स्कन्दः कुम्भसंभवं संबोधयन्नाह अन्यदित्यादिना ।

End :

तद्वृत्तान्तं व्यासस्सूतं संबोधयन्नाह कृत्वेति । स मुनिरगस्त्यः अैमेयम् उमापुत्रं स्कन्दं प्रणम्य सन्ध्योपास्त्यै सन्ध्यावन्दनाय रहस्यमिति स्पष्टम् । आनन्दकाननस्येति स्पष्टम् । हे सत्तम । श्रीशुकादीनां पुरतः मया आख्यातम् । इदानीं किं प्रष्टुकामोऽसि तद्वदामि । श्रवणफलमाह-शृण्वती(श्रुत्वेति) कृती कृतकृत्यो भवेत् ।

Colophon :

इति काशीखण्डव्याख्याने एकोनशततमोऽध्यायः ॥

अथ श्रीवेदव्यासं सूतः पृच्छति—इतीदमिति ।

* * * *

मम बालस्य शृण्वतस्सतो वाराणसीमाहात्म्यं परिपृच्छन्त्याः जगदम्बिकाया गिरिजाया मम मातुः पुरतः स्वामिना देवदेवेन यथा भाषितं तथैव कथयिष्यामीति पदे.

No. 2296. काशीखण्डव्याख्या—पदयोजना.

KĀŚĪKHAṆḌAVYĀKHYĀ : PADAYŌJANĀ.

Substance, palm-leaf. Size, 17⅝ × 1½ inches. Pages, 216. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

Adhyāyas 12 to 30.

Same work as the above.

No. 2297. जम्बूद्वीपोद्भवः (स्कान्द).
JAMBŪDVĪPŌDBHAVAḤ: (SKĀNDA).

Pages, 210. Lines, 9 on a page.

Begins on fol. 104*a* of the MS described under No. 2160.

This contains Sahyāmalakagrāmamāhātmya, Adhyāyas 1 to 8; Adhyāya 9, Kēralakhaṇḍavarṇana; Adhyāya 10, Dakṣiṇakāṇḍa; Adhyāya 11, Kēraladvīpavarṇana; Adhyāyas 12 and 13, Nīlanadīvarṇana; Adhyāyas 14 and 15, Hēmādrikhaṇḍa; Adhyāya 16, Muktāpurīvarṇana; Adhyāya 17, Hēmēśvarīmāhātmya; Adhyāyas 18 to 20, Bhaviṣyadvaṁśāvalivarṇana; Adhyāya 21, Madhyāraṇyamāhātmya; Adhyāyas 23 and 24, Vaṭēśvarakṣētramāhātmya; Adhyāya 25, Śrīmukhakṣētramāhātmya; Adhyāya 26, Bhaviṣyatkattānuvarṇana.

Beginning:

कारुण्यसारनिधये करुणाकराय
काराधिनाथरमणीयमुखाम्बुजाय ।
हाराभिरामवपुषे हरये नमोऽस्तु
नारायणाय महितामलकालयाय ॥

सूतः—

श्रृणु पुण्यानि क्षेत्राणि स्थितो येषु सदा हरिः ।
नीळाया दक्षिणे भागे बिल्वाद्रिभुवि दुर्लभम् ॥
यत्र विष्णुर्जगन्नाथो नित्यं सन्निहितो हरिः ।
भार्गवेणात्र रामेण प्रतिमा स्थापिता पुरा ॥

End:

इत्युक्त्वा सा महादेवी हेमाम्बा सा महेश्वरी ।
सुभगी(गा)श्च समाश्वास्य स्वालयं प्राप पार्वती ॥
य इदं शृणुयान्नित्यं पठेद्वा भक्तिसंयुतः ।
इह लोके सुखी भूत्वाप्यन्ते मोक्षमवाप्स्यति ॥
अविश्वासं करोत्येव सर्वसम्पद्विनश्यति ।
तस्माद्विश्वाससंयुक्ताः श्रोतव्यं भक्तिपूर्वकम् ॥

ऋषयः—

सूत सूत पुराणज्ञ चिरंजीव सुखी भव ॥

Colophon:

इति स्कान्दे पुराणे जम्बूद्वीपोद्भवे कलियुगचरिते भविष्यत्कथानुवर्णनं नाम षडिंशोऽध्यायः ॥

No. **2298.** तुङ्गभद्राखण्डः (स्कान्द).

TUṄGABHADRĀKHAṆḌAḤ (SKĀNDA).

Substance, paper. Size, 13¼ × 8½ inches. Pages, 310. Lines, 20 on a page. Charact r, Telugu. Condition, good. Appearance, new.

Adhyāyas 1 to 52. Purporting to form part of the Sanatkumārasaṁhitā. Treats of the greatness and holiness of the Tuṅgabhadrā and of the holy places and tanks near it.

Beginning:

तुङ्गभद्राखण्डः—

नमस्सकलकल्याणदायिनेऽनन्तमूर्तये ।
मुनिवृन्दसदावन्द्यपादद्वन्द्वपरेश्वर ॥
कथितो भवता सर्गो विस्तरेण महेश्वर ।
नानाविधसुराणां च नराणां च विशेषतः ॥

* * * *

तुङ्गा चैव तदा भद्रा वामदक्षिणपार्श्वयोः ।
इत्युक्ता भवता पूर्वं श्रुतमेव मया पुरा ॥
संशयश्च महानासीदिह तं भेत्तुमर्हसि ।

ईश्वरः—

साधु साधु महाप्राज्ञ सर्वशास्त्रविशारद !
प्रवक्ष्यामि महासेन ब्रह्माण्डस्यास्य विस्तरम् ॥

End:

तस्मात्तु संगमे स्नात्वा दृष्ट्वा ब्रह्मेश्वरं शिवम् ।
घृतदीपं च संदीप्य कुलकोटिं समुद्धरेत् ॥

एतत्सङ्गममाहात्म्यं संक्षेपेण मया गुह ।
माहात्म्यं विस्तराद्वक्तुं कः क्षमो मां हरिं शृणु ॥

Colophon:

इति श्रीस्कान्दमहापुराणे सनत्कुमारसंहितायां तुङ्गभद्राखण्डे तुङ्गभद्रासङ्गमप्रशंसनं नाम द्विपञ्चाशोऽध्यायः ॥

No. 2299. धर्मखण्डः (स्कान्द).

DHARMAKHAṆḌAḤ: (SKĀNDA).

Substance, paper. Size, 11¾ × 7⅝ inches. Pages, 842. Lines, 26 on a page. Character, Telugu. Condition, good. Appearance, new.

Adhyāyas 1 to 113.

The story of the early life of Vālmīki is herein utilized to inculcate certain moral and religious Dharmas, and the greatness of the Rāmāyaṇa is also praised.

Beginning:

पार्वतीं परमानन्दं शिवं शम्भुं हरिं गुरुम् ।
लक्ष्मीं वाणीं विधातारं गणनाथं नतोऽस्म्यहम् ॥

शौनकाद्या मुनिगणा नैमिशारण्यवासिनः ।
सूतं धर्मार्थसहितं पप्रच्छुर्धर्ममुत्तमम् ॥

मुनयः—

सूत सूत महाभाग सर्वार्थकुशलो ह्यसि ।
वद श्रीरामचन्द्रस्य नाममाहात्म्यमुत्तमम् ॥

सूतः—

साधु पृष्टं महाभागाः प्रश्नोऽयं लोकसंमतः ।
यस्तु श्रीरामचन्द्रस्य पुनाति भुवनत्रयम् ॥
येषां समनुरूपं वः प्रश्नः प्रश्नवतां वराः ।
यथामति समाचक्षे शृणुध्वं मुनिपुङ्गवाः ॥
श्रीरामं श्यामलं शान्तं पीताम्बरधरं प्रभुम् ।
विशालाक्षमुदाराङ्गं धनुर्बाणधरं हरिम् ॥

End :

इति देवाः प्रशंसन्ति ऋषयश्च तपोधनाः ।
अध्यायं वा तदर्धं वा श्लोकं वानुदिनन्तथा ॥
श्लोकार्धं श्लोकपादं वा धर्मखण्डस्य यः पठेत् ।
सोऽप्येतत्फलमाप्नोति राजसूयाश्व(श्व)मेधयोः ।
इति कथितमशेषं मन्मथारेश्च विष्णोः
चरितमविकळङ्कं शृण्वतां स्वर्गदश्च ।
इदमनिशमघानां नाशकं ये पठन्तः
परमपुरुषवासं प्राप्य मोदन्ति ते च ॥

Colophon :

इति श्रीस्कान्दपुराणे धर्मखण्डे वाल्मीकिचरित्रे त्रयोदशाधिकशततमोऽध्यायः ॥

समाप्तः धर्मखण्डः ॥

No. **2300.** नागरखण्डः (स्कान्द).

NĀGARAKHAṆḌAḤ : (SKĀNDA).

Substance, palm-leaf. Size, 15 × 1¼ inches. Pages, 247. Lines, 4 on a page. Character, Telugu. Condition, good. Appearance, old.

Adhyāyas 1 to 13, complete.

The 13th Adhyāya is wrongly numbered as 121st.

This deals mainly with the artisan descendants of Viśvakarman, viz., goldsmiths, carpenters, etc. Described in detail on page 1347 of the India Office Library Catalogue.

Beginning:

श्रीकण्ठो जगदाधारो वेदवेद्यो महेश्वरः ।
उमापतिस्त्रिनयनः सर्वदेवमयो विभुः ॥
सर्वज्ञस्सच्चिदानन्दरूपो भुजगभूषणः ।
इन्द्रादिसुरसंसेव्यः पायाद्भस्मविलेपनः ॥
सर्वज्ञो जगतां पतिस्त्रिनयनः श्रीशप्रियः शङ्करो
वाणीवल्लभपूजितः स्वमहिमासंदीप्तलोकत्रयः ।
देवेन्द्रादिसुरार्चिताङ्घ्रियुगलश्चन्द्रार्धचूडामणिः
द्वन्द्याश्च(दद्यात्स)न्ततमम्बिकाप्रियधवो वः कीर्तिदीप्तिश्रियः ॥
लोकेऽस्मिन्नैमिशारण्यमस्ति सन्मुनिसेवितम् ।
नानाश्चर्यकरं पुण्यं नानाशिथि (सिद्ध)निशे(षे)वितम् ॥
दर्शनादेव सर्वेषां देना(वानां) सुग(ख)दायकम् ।

End:

स्तोतुं प्रचक्रमुर्विप्राः शुभावभवनं भवम् ।
विशाललोचनाम्भोजविजिताम्भोरुहप्रभा(भम्) ॥
वपुर्विशेषसुषमाजितमन्मथविग्रहम् ।
विजयस्व महेशान विश्वेशानन्ददायक ॥
इत्यात्मा(त्युक्त्वा) सुमुनीन्द्रास्ते तारकासुरहारिणा ।
अत्यन्तहृष्टमनसा प्रतिजग्मुर्यथायक(थ)म् ॥

Colophon:

इति श्रीस्कान्दपुराणे नागरखण्डे विश्वकर्मोपाख्याने एकविंशोत्तरशततमोऽध्यायः ॥

The MS. is dated: the 15th of Jyēṣṭha-Śuddha in Durmukhi.

No. 2301. नागरखण्ड:(स्कान्द).

NĀGARAKHAṆḌAḤ: (SKĀNDA).

Substance, palm-leaf. Size, $16\frac{1}{2} \times 1\frac{1}{2}$ inches. Pages, 39. Lines, 8 on a page. Character, Telugu. Condition, good. Appearance, new.

Adhyāyas 1 to 9, complete; the 10th, incomplete.

Same work as the above.

No. 2302. नागरखण्ड: (स्कान्द).

NĀGARAKHAṆḌAḤ: (SKĀNDA).

Substance, palm-leaf. Size, $17\frac{1}{4} \times 1\frac{1}{4}$ inches. Pages, 426. Lines, 8 on a page. Character, Grantha. Condition, much injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Vēdāraṇyamāhātmya 214*a*.

Adhyāyas 4 to 153.

This MS. seems mainly to treat of Hāṭakēśvaramāhātmya, a MS. of which is noticed in detail in the India Office Library Catalogue, page 1348.

Beginning:

दिष्ट्या मुक्तोऽसि राजेन्द्र चण्डालत्वेन साम्प्रतम् ।
दिव्य . . . . ॥
तस्माद्यज त्वं सत्रेण विधिवत् . . . वता ।
तेन सम्प्राप्स्यसे . . . . ॥
त्वत्कृते प्रार्थयिष्यामि स्वयं गत्वा पितामहम् ।
मखांशं सर्वदेवेशो येन गृह्णाति मे मखे ॥
तस्मादत्रैव सम्भारान् सर्वान् यज्ञसमुद्भवान् ।
आनय ब्रह्मलोकाच्च यावदागमनं . . ॥

. . . . . ध्याह मुनिस्संशितव्रतः ।
पितामहमुपागम्य प्रणिपत्याब्रवीद्वचः ॥
याजयिष्याम्यहं भूपं त्रिशङ्कुं प्रपितामह ।
मानुषेण शरीरेण प्रत्यागच्छति ते पदम् ॥

* * * *

Colophon :

इति श्रीस्कान्दपुराणे तृतीयपरिच्छेदे नागरखण्डे विश्वामित्रमाहात्म्ये चतुर्थोऽध्यायः ॥

End :

मुक्तो भवति विप्रेन्द्राः फलमिष्टमवाप्नुयात् ।
सर्वैर्देवगणैश्शम्भुः प्रीतोऽभीष्टश्च दास्यति ॥
विद्यार्थी चाप्नुयाद्विद्यां शिवभक्तिं तथेष्टदाम् ।
आख्यातं सर्वमेवेह हाटकेश्वरवैभवम् ॥
यूयं कृतार्था इत्युक्त्वा सूतश्चान्तर्हितोऽभवत् ।
सन्तुष्टा ब्राह्मणास्सर्वे हाटकेशं प्र(श)शंसिरे ॥

Colophon :

इति स्कान्दपुराणे तृतीयपरिच्छेदे नागरखण्डे हाटकेश्वरमाहात्म्ये मुक्तितीर्थप्रशंसा नाम त्रिपञ्चाशच्छततमोऽध्यायः ॥

हाटकेश्वरमाहात्म्यं सम्पूर्णम् ॥

No. **2303.** ब्रह्मोत्तरखण्डः (स्कान्द).

BRAHMŌTTARAKHAṆḌAḤ (SKĀNDA).

Substance, palm-leaf. Size, 13½ × 1¼ inches. Pages, 300. Lines, 6 on a page. Character, Grantha. Condition, much injured. Appearance, old.

Adhyāyas 1 to 22.

This is a portion of the Skāndapurāṇa, treating of the greatness of Śiva and of the value of devotion to Him.

Described under Nos. 127 and 128 in Aufrecht's Bodleian Catalogue.

Beginning :

ज्योतिर्मात्रावसानान्तनिर्मलज्ञानरूपिणे ।
नमो रुद्राय . . . . गुणवृत्तये ॥

ऋषयः—

आख्यातं भवता सूत विष्णोर्माहात्म्यमुत्तमम् ।
सर्वाघौघहरं पुण्यं संक्षेपेण श्रुतश्च नः ॥
इदानीं श्रोतुमिच्छामो माहात्म्यं त्रिपुरद्विषः ।

The end is much injured.

No. 2304. ब्रह्मोत्तरखण्डः (स्कान्द).

BRAHMŌTTARAKHAṆḌAḤ (SKĀNDA).

Substance, palm-leaf. Size, 14⅝ × 1⅛ inches. Pages, 228. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old.

Adhyāyas 1 to 21.

Same work as the above.

No. 2305. ब्रह्मोत्तरखण्डः (स्कान्द).

BRAHMŌTTARAKHAṆḌAḤ (SKĀNDA).

Substance, palm-leaf. Size, 15⅝ × 1⅝ inches. Pages, 180. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Adhyāyas 1 to 21, complete ; 22nd, imperfect.

Same work as the above.

No. 2306. ब्रह्मोत्तरखण्डः (स्कान्द).

BRAHMŌTTARAKHAṆḌAḤ (SKĀNDA).

Substance, palm-leaf. Size, $18\frac{1}{2} \times 1\frac{1}{2}$ inches. Pages, 74. Lines, 6 on a page. Character, Grantha. Condition, fair. Appearance, old.

Adyāyas 3 to 7 ; 8th incomplete.

First leaf is wanting.

Same work as the above.

No. 2307. ब्रह्मोत्तरखण्डः (स्कान्द).

BRAHMŌTTARAKHAṆḌAḤ (SKĀNDA).

Substance, palm-leaf (Śrītāla). Size, $12 \times 1\frac{7}{8}$ inches. Pages, 184. Lines, 10 on a page. Character, Grantha. Condition, good. Appearance, old.

Adhyāyas 23 to 44.

These Adhyāyas correspond to Adhyāyas 1 to 22 described above, though they are numbered as 23 to 44.

Beginning :

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥
मुद्रापुस्तकवह्निनानुविलसत्बा(द्बा)हुं प्रसन्नाननं
मुक्ताहारविभूषितं शशिकलाभास्वत्किरीटोज्ज्वलम् ।
अज्ञानापह(मीश)मादिमगिरामर्थं भवानीपतिं
न्यग्रोधान्तरवासिनं परगुरुं ध्यायेदभीष्टाप्तये ॥

* * * *

ऋषय ऊचुः—
आख्यातं भवता सूत विष्णोर्माहात्म्यमुत्तमम् ।
सर्वपापहरं पुण्यं समासेन श्रुतञ्च नः ॥

इदानीं श्रोतुमिच्छामो माहात्म्यं त्रिपुरद्विषः ।
तद्भक्तानाञ्च माहात्म्यं निश्शेषाघहरं परम् ॥
तन्मन्त्राणां तद्व्रतानां तत्पूज्यायास्समुन्नतिः ।
तत्कथायाश्च तद्भक्तिप्रभावमनुवर्णय ॥

* * * *

Colophon :

इति ब्रह्मोत्तरखण्डे पञ्चाक्षरमहिमानुवर्णनं नाम त्रयोविंशोऽध्यायः ॥

अथान्यदपि वक्ष्यामि माहात्म्यं त्रिपुरद्विषः ।
श्रुतमात्रेण तेनाशु भिद्यन्ते सर्वसंशयाः ॥

End :

विविधगुणविभेदैः नित्यमस्पष्टरूपं
जगति च बहिरन्तर्भासमानं महिम्ना ।
स्वमनसि विहरन्तं वाङ्मनोवृत्तिदूरं
परमशिवमनन्तानन्दमात्रं प्रपद्ये ॥
यः पठेच्छृणुयाच्चैतत् पुराणं शैवमुत्तमम् ।
विधूय सर्वपापानि शिवलोके महीयते ॥

Colophon :

इति ब्रह्मोत्तरखण्डे पुराणश्रवणमहिमानुवर्णनं नाम चतुश्चत्वारिंशोऽध्यायः ॥

No. **2308.** ब्रह्मोत्तरखण्डः (स्कान्द).

BRAHMŌTTARAKHAṆḌAḤ (SKĀNDA).

Substance, palm leaf. Size, $16\frac{1}{4} \times 1\frac{3}{8}$ inches. Pages, 167. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Adhyāyas 23 to 44.

Same work as the above

Dated: Wednesday, the 2nd Bahula of Caitra in the year Īśvara. The copyist's name is given as Mailavaram Nārāyaṇa-dīkṣita.

No. 2309. ब्रह्मोत्तरखण्डः (स्कान्द).

BRAHMŌTTARAKHAṆḌAḤ (SKĀNDA).

Substance, palm-leaf. Size, $16\frac{3}{4} \times 1\frac{1}{2}$ inches. Pages, 162. Lines, 7 on a page. Character, Telugu. Condition, injured Appearance, new.

Adhyāyas 23 to 44, complete.

Same work as the above.

Dated: Sunday, the 2nd of Āṣāḍha-Bahula in the year Yuva.

No. 2310. भीमखण्डः (स्कान्द).

BHĪMAKHAṆḌAḤ (SKĀNDA).

Substance, palm-leaf. Size, $16\frac{1}{2} \times 1\frac{1}{2}$ inches. Pages, 166. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Adhyāyas 1 to 32.

The first four Adhyāyas are similar to what is contained in the work of this name described in the India Office Library Catalogue on page 1357.

Dated: Friday, the 11th of Mārgaśira-Bahula in the year Plavaṅga.

Copied by Diriśavelli Subbanna from the MS. of Nanḍūru Kriṣṭnamma.

Beginning:

श्रीमद्गौरि(री)लताश्लिष्टं जप(टा)पल्लवशोभितम् ।
विबुधाभीष्टफलदं शम्भुकल्पद्रुमं भजे ॥
ऋषय ऊचुः—
विश्वशे(से)न तथा काश्यामधिक्षिप्तो महामुनिः ।
त्यक्त्वा मोक्षपदं काशिं(शीं)व्यासो मोक्षपदं हि नः ॥

शिष्यैस्सहावसत्कुत्र किं वा तीर्थमसेवत ।
तत्सर्वं वाग्विदां श्रेष्ठ वक्तुमर्हसि सूत नः ॥
वारणास्यां महेशस्य कोपेन चलितस्तथा ।
प्राप्य गङ्गानदीतीरं शिष्यसङ्घसमन्वितः ॥
मद्गुरुस्सर्वधर्मज्ञः कृष्णद्वैपायनो मुनिः ।
पृथिव्यां यानि तीर्थानि तानि सर्वाणि तापसाः ॥
तत्र शिष्यैस्सह प्राज्ञैः गणयित्वा परीक्ष्य सः ।
इदं सारार्थसंपन्नं वाक्यं तानब्रवीत्तदा ॥

End:

दीर्घायुर्बलमारोग्यमैश्वर्यं सुस्थिरं यशः ।
धर्माभिवृद्धिर्विजयः तुष्टिः पुष्टिर्मतिर्धृतिः ॥
नित्योत्सवसमृद्धिश्च श्रीबन्धुपशुसंपदः ।
सुपुत्रलाभः कुशलं ज्ञानं सुखमनारतम् ॥
संभवन्तीह देहान्ते शम्भुलोकसुखं भवेत् ।

Colophon:

इति श्रीस्कन्दपुराणे श्रीभीमखण्डे द्वात्रिंशोऽध्यायः ॥

No. **2311.** भीमखण्डः (स्कान्द).

BHĪMAKHAṆḌAḤ (SKĀNDA).

Substance, palm-leaf. Size, 17½ × 1⅝ inches. Pages, 131. Lines, 8 on a page. Character, Telugu. Condition, injured. Appearance, old.

Adhyāyas 1 to 32.

The following is herein found at the end—

भीमखण्डस्समाप्तः ॥

Dated: Monday, the 8th of Caitra-Śuddha in the year Yuva.

Copied by Yenugapalli Muttayya for Durkakaṇṭi Kōṭi Vyāsarāya Pantulu.

No. 2312. मोक्षखण्डः (स्कान्द).

MŌKṢAKHAṆḌAḤ (SKĀNDA).

Substance, paper. Size, 13¼ × 8⅜ inches. Pages, 398. Lines, 20 on a page. Character, Telugu. Condition, good. Appearance, new.

Adhyāyas 1 to 47.

A portion in the Śaṅkarasaṁhitā of Skānda; treats mainly of the rules of conduct and the means of salvation, and gives also the stories regarding the incarnations of Viṣṇu.

Beginning:

पार्वतीं परमानन्दं शिवं शम्भुं हरिं गुरुम् ।
लक्ष्मीं वाणीं विधातारं गणनाथं नतोऽस्म्यहम् ॥
शौनकाद्या मुनिगणा नैमिशारण्यवासिनः ।
सूतं धर्मार्थसहितं पप्रच्छुर्धर्ममुत्तमम् ॥
सूत सूत महाभाग धर्मार्थकुशलो ह्यसि ।
वद श्रीरामचन्द्रस्य नाममाहात्म्यमुत्तमम् ॥
श्रीसूतः—
साधु पृष्टं महाभागाः प्रश्नोऽयं लोकसम्मतः ।
